सरस्वतीभवन ग्रन्थमाला

(१५)

पारसीकप्रकाशः

विहारीकृष्णदासमिश्रविरचितः

वाराणसेय-संस्कृत-विश्वविद्यालयः

महापुरुष 28/7/83

SARASVATĪ BHAVANA GRANTHAMĀLĀ

Vol. 95

GENERAL EDITOR

Baladeva Upadhyaya

Director

Varanaseya Sanskrit Vishvavidyalaya,

Varanasi.

PĀRASĪKAPRAKĀŚA

by

BIHĀRI KṚṢṆA DASĀ MIŚRA

VARANASI

1965

Published by—
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Printed by :—
A. K. Bose, at the
Indian Press (Private) Ltd,
Maldahiya, Varanasi.

सरस्वतीभवन-ग्रन्थमाला

(९५)

पारसीकप्रकाशः

बिहारिकृष्णदासमिश्रविरचितः

सम्पादकः

श्रीविभूतिभूषणभट्टाचार्यः ।

वाराणस्याम्

१८८७ तमे शकाब्दे

प्राप्तिस्थानम्—
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी—२

मूल्यम्—५·५०

प्रास्ताविकम्

अद्य तावत् 'पारसीकप्रकाश' इत्यभिधेयं नितान्तं महत्त्वपूर्णं ग्रन्थं संस्कृत-विश्वविद्यालयीयग्रन्थमालायां प्रकाशयन् अमन्दं हर्षमनुभवामि। आकारतो ह्रस्वकायोऽप्ययं ग्रन्थो मूल्यतो दीर्घमाहात्म्यमावहति। ये खलु संस्कृतभाषाविदां भारतीयपण्डितानां कूपमण्डूकतामुद्घोषयन्तोऽकाण्डताण्डवान्नैव विरमन्ति, ये च मुधैव तेषामादरणीयेषु मूर्धसु समयानभिज्ञताप्रयुक्तमपवादकलङ्कपङ्कं मुहुरुत्क्षिपन्ति, ये च तेषां व्यवहाराज्ञानाभिजातं दोषराशिं स्वकल्पनाप्रसूतं मिथ्यैव कल्पयन्ति, तेषां मुखमुद्रणाय 'पारसीकप्रकाश'स्यैतत् प्रकाशनं भैषज्य-वटिकायमानं ध्रुवं भविष्यतीति मम निखिलो विश्वासः।

भारतीयेतिहासस्य मध्ययुगे मोहम्मदीयनरपतीनां शासनकाले पारसीक-भाषाया निखिलशासकीयकार्यकलापेषु प्रयुक्तत्वाद् हेतोर्जागर्ति कोऽपि महिमा-तिशयो। पठाननरपतीनां शासनकाले नैषाऽवस्था निभाल्यतेऽस्माभिः, परन्तु मोगलसम्राजां कार्यकाले तु पारसीकभाषाया विपुलः प्रचारः प्रसारश्च सर्वक्षेत्रेषु उररीक्रियेते इतिहासविद्भिः। अकब्बरनरेशस्य राज्यकाले तु पारसीकभाषा मोहम्मदीयेष्वभिजातवर्गेष्वेव स्वगौरवं प्रख्यापयितुं नो क्षमाऽभवत्, यावत् प्रजावर्गेष्वेव सा शासनकार्येषु स्वातिशयितप्रचारमुपलभ्य कि[illegible]पि गौरवमाससाद। फलतस्तस्मिन् युगे पारसीकभाषया सामान्यतोऽपि परि[illegible]तिः सर्वेषां कामना-विषयो बभूव। अकब्बरस्य वित्तकृष्यादिविभागानां व्यव[illegible]सञ्चालकेन महा-मतिना टोडरमल्लेति नाम्ना ख्यातेन महनीयेन मन्त्रिणा पारसीकभाषाया राज-कीयकार्येषु प्रभूतप्रचारोऽपि व्यधायि। स संस्कृतभाषाया अप्याश्रयदाताऽऽ-सीत्। तस्य सत्प्रेरणयैव निबद्धो 'टोडरानन्द' नामा आचार-प्रायश्चित-राजनीत्यादिविविधवर्गेषु विभक्तो धर्मशास्त्रीयो निबन्धग्रन्थः साम्प्रतं प्रकाश्य-मानस्तस्य देवभाषानुरागं स्फुटैः शब्दैराविष्करोति। तत्समसामयिकेन विद्वद्वर-विहारिकृष्णदासमिश्रेण विरचितोऽयं पारसीकप्रकाशनामा ग्रन्थस्तस्य सत्स्फूर्ति-

दानमुद्घोषयतीति मन्यामहे। तत्कालिकी राज्यव्यवस्था ह्यस्या कल्पनाया आधारभित्तिस्वरूपमावहतीति नैपरोक्षं प्रेक्षावताम्।

भागद्वयेन विभक्तो वैयाकरणशैलीमनुरुध्य सूत्रैरुपन्यस्तोऽयं पारसीप्रकाशो ग्रन्थो लेखकस्य पारसीकभाषाभिज्ञतां काम्यप्यभिव्यनक्ति। संस्कृतभाषाया प्रातिपदिकानां धातूनां च स्थाने पारसीकभाषाया प्रातिपदिकानि धातवश्च आदिश्यन्ते ग्रन्थकारेण। सेयम् आदेशप्रणाली संस्कृतव्याकरणस्य स्वाभिमता तद्विरचनानुकूला चेति ग्रन्थेऽस्मिन् सर्वत्र समादृता वर्तते। आधुनिकानां 'भाषाविज्ञान'विदां विदुषां मतेन नेयं प्रणाली विज्ञानसम्मता, न वा नव्यभाषाशास्त्रानुकूला। तथापि नव्यभाषाविज्ञानस्य समुदयात् शतत्रयवर्षपूर्वं निबद्धेऽस्मिन् ग्रन्थे नैव दोषः कथमप्युद्घाटयितुं पार्यते इतिहासपौर्वापर्यविद्भिर्विद्वद्भिः। यद्वा तद्वा भवतु, संस्कृतभाषया पारसीकभाषाया कोशव्याकरणयोस्तथ्यानामभिनवप्रकाशने नितान्तं चमत्कृतिसमन्वितं गौरवमाधत्तेऽयं साम्प्रतं प्रकाश्यमानो ग्रन्थ इति नूनमभिधातुं लभ्यते।

नानापरिशिष्टैर्ज्ञानवर्धनेन वक्तव्येन च साकमस्य ग्रन्थस्य सम्पादनं सरस्वतीभवनपुस्तकालयस्य हस्तलिखितग्रन्थविभागोपाध्यक्षेण श्रीविभूतिभूषणभट्टाचार्येण अतीव परिश्रमेण व्यधायि। हस्तलेखसामग्र्याः स्वल्पत्वाद् ग्रन्थसम्पादनं नाति सुकरमासीत्, तथापि भट्टाचार्यमहोदयो विमलमत्या निर्मलतर्केण च समन्वितः स्वकार्यमतीव परिष्कारेण निरवाहयदिति वक्तुं पारयामि। ग्रन्थस्यान्ते निविष्टानि त्रीणि परिशिष्टानि मूलग्रन्थस्य विषयाणामवगतौ विशिष्टमुपकारं करिष्यन्ति जिज्ञासूनाम्। तदर्थं विपश्चिदयं सर्वेषां पाठकानां धन्यवादानर्हतीति। पारसीकप्रकाशपद्धतिमनुरुध्य विरचितानामन्येषामपि ग्रन्थानां यथावसरं प्रकाशनाय यतिष्यतेऽयमनुसन्धानविभागः संस्कृतविश्वविद्यालयीय इति स्वाभिप्रायमाविष्कुर्वन् विरमत्ययं जनः॥

आग्रहायणकृष्णद्वितीया
११–११–६५
वाराणसी।

बलदेव उपाध्यायः
संचालकोऽनुसन्धानप्रतिष्ठानस्य।

निवेदनम्

अस्य खलु पारसीकप्रकाशस्य कोशप्रकरणमेव प्रथमतः १६२३ संवत्सरे वाराणस्यां शिलाक्षरैर्मुद्रितमभूत्, ततश्च १६४३ संवत्सरे श्रीमता वेबरमहोदयेन बर्लिननगरात् सीसकाक्षरैर्मुद्रयित्वा टिप्पण्यादिभिश्च भूषयित्वा प्रकाशितम्। तत्र च ग्रन्थान्ते तेनोक्तं यन्मुद्रणकार्यसमाप्त्यनन्तरं काशिकराजकीयसंस्कृतमहाविद्यालयाध्यक्षपदमलंकुर्वतः श्रीमतः थिबो-महोदयस्य सकाशात् पारसीकप्रकाशस्य काचित् पूर्णा प्रतिलिपिरधिगता। तत्र च पारसीकभाषायाः व्याकरणमपि ग्रन्थकारेण रचितं विद्यते, परन्तु मुद्रणसमाप्तिर्जातेति तस्य व्याकरणप्रकरणस्य समावेशोऽत्र नाभवदिति।

अंशतो मुद्रितस्यास्य ग्रन्थस्याध्ययनावसरे प्राचीनेन केनचित् संस्कृतज्ञेन विदुषा अकबरशाहराज्यकाल एव (१६१३-१६६२ सं०) इदानीन्तनानां पाश्चात्यभाषातत्त्वज्ञानां विदुषामिव द्वैभाषिकः कोशो व्याकरणप्रकरणसमन्वितो विरचित इति चिन्वतो मम महान् हर्षः समजनि। व्याकरणप्रकरणस्य चाध्ययनार्थं सम्पूर्णस्यास्य ग्रन्थस्यानुसन्धाने प्रवृत्तेन मया सरस्वतीभवनपुस्तकालय एव वेदभाष्यकर्तुर्महीधरभट्टस्य ग्रन्थसंग्रहे काचित् पूर्णा प्रतिलिपिरासादिता।

अस्मिन् ग्रन्थे आदौ कोशप्रकरणमन्ते च व्याकरणप्रकरणं विद्यते। तत्र कोशप्रकरणे स्वर्ग-दिक्-काल-नाट्य-पाताल वारि-ब्रह्म-क्षत्रिय-वैश्य शूद्र-विशेष्यनिघ्नाख्यानि एकादश प्रकरणानि विद्यन्ते। तथा व्याकरणप्रकरणे च—संख्याशब्दनिर्णयः—शब्द (सर्वनाम)-अव्यय कारक-समास तद्धित-आख्यात-कृदन्तेत्यष्टौ प्रकरणानि सन्ति।

कोशप्रकरणारम्भे च ग्रन्थरचनाकारणं ग्रन्थकारेणोक्तम्—

> कियतां पारसीकानां वचसां संग्रहो मया।
> विधीयते स्वबोधार्थं संस्कृतार्थविबोधनैः ॥५॥
> येऽवगाहितुमिच्छन्ति पारसीवाङ्महार्णवम्।
> तेषामर्थे कृष्णदासो निबध्नाति वचःप्लवम् ॥६॥

अपठित्वा तु तच्छास्त्रं श्रुत्वैवेमं करोम्यहम् ।
न्यूनातिरिक्ततामत्र क्षन्तुमर्हन्ति तद्विदः ॥७॥

यद्यपि ग्रन्थकारेण पारसीकव्याकरणादिशास्त्रपठनं न स्वीकृतम्; तथापि तद्रचितव्याकरणप्रकरणस्य तत्तत्स्थलदर्शनेनास्य पारसीकभाषाभिज्ञत्वं सुस्पष्टमेव, अनेन तु पारसीकभाषाया व्याकरणप्रणयने शर्ववर्माचार्यकृतकातन्त्रव्याकरणपरिगृहीताः परिभाषा अङ्गीकृताः। शब्दव्युत्पत्तौ त्वादेशरीतिमनुसृत्य संस्कृतशब्दानां स्थाने तत्तत्पारसीकशब्दानामादेशो विहितः। तथा च 'एक'शब्दस्य स्थाने 'यक्' आदेशं कृत्वा 'यक्' इत्येकशब्दार्थवाचिनः पारसीकशब्दस्य व्युत्पत्तिरनेन प्रदर्शिता। एवमेव आख्यातप्रकरणेऽपि पारसीकभाषायां भ्वादीनां धातूनां स्थाने 'शवद्' आद्यादेशेन तत्तदर्थवाचिनः पारसीकशब्दा अनेन साधिताः अवगन्तव्याः। इयमेव रीतिस्तिबादीनामाख्यातप्रत्ययानां स्थानेऽपि द्रष्टव्या।

इयञ्चादेशरीतिरिदानीन्तनानां पाश्चात्यभाषातत्त्वज्ञानां न मनोरमेति मत्वा मया तृतीयपरिशिष्टे पारसीकधातुभ्य एव पदसाधनार्थं सूत्रादिकं परिकल्पितम्। तत्र च पारसीका धातवोऽपि संस्कृतधातुपाठरीतिमनुसृत्य वर्गीकृताः। अनया रीत्या पदसाधने तु पारसीकशब्देभ्य एव पारसीकपदानां व्युत्पत्तिर्भवेदिति मन्तव्यम्। संस्कृतानामेव शब्दानां वाचकत्वमस्ति नान्येषामिति वादिनां कृते आदेशरीत्यनुसरणमगत्या करणीयम्। परन्तु संस्कृतशब्दानामेव वाचकत्वं नान्येषामिति प्रतिपादनानुकूलं किञ्चिद् दृढतरं प्रमाणमस्तीत्यत्रैव महान् सन्देहावसरोऽस्ति। अतः संस्कृतेतरभाषाव्याकरणप्रणयने आदेशरीत्यनुसरणं न मनोरमं प्रतिभाति। आशासे यदागामिनि काले आदेशरीतिं परिहृत्य पारसीकभाषाव्याकरणं संस्कृतभाषायां विरचयिष्यते।

प्रस्तुतस्य पारसीकप्रकाशस्य रचयिता विहारिकृष्णमिश्रस्तावत् शाकद्वीपीतिप्रसिद्धे ब्राह्मणकुले प्रसूत आसीदिति कल्प्यतेऽस्य सूर्यनमस्कारादिना। अनेन च 'मगव्यक्ति' नामकः, मग इति शाकद्वीपीति वा प्रसिद्धस्य ब्राह्मणसमाजस्येतिवृत्तात्मकः कश्चिद् ग्रन्थो रचित इत्यपि कल्प्यते। पारसीकप्रकाशे मगव्यक्तौ वा नैवंविधः कश्चिद् विषयो येन ग्रन्थकारयोरनयोस्तादात्म्यमेकान्ततो निश्चेतुं शक्येत।

नामसाम्यदर्शनमात्रेणैव व्यक्त्योस्तादात्म्यख्यापनं युक्तिसिद्धं न भवतीति ग्रन्थकार-परिचयविषयेऽहं मौनमेव साधु मन्ये। अयं च अकबरशाहराजसभायामासीदिति तु स्पष्टमेव पारसीकप्रकाशादवगम्यते। अतोऽस्य स्थितिकालः अकबरशाहस्य काल एवेति निर्विवादम्। अकबरशाहश्च १६१३ संवत्सरे सिंहासनमारुरोह, १६६२ संवत्सरे च परलोकं गत इति प्रसिद्धमेव, एतत्कालाभ्यन्तर एव पारसीक-प्रकाशस्य निर्माणकाल इत्यत्र नास्ति सन्देहावसरः।

विहारिकृष्णमिश्रादनन्तरं कामरूपवास्तव्येन कविकर्णपूरेणापि पारसीकपद-प्रकाशाख्यः कोशव्याकरणात्मक एको ग्रन्थः संस्कृतभाषायां रचित आसीत्। तस्मिंश्च ग्रन्थे आदेशरीतिर्नैवानुसृता ग्रन्थकारेण। तस्माच्च ग्रन्थात् काश्चिद् व्याकरणविषयिण्यः कारिका मया तुलनार्थमुद्धृत्य द्वितीये परिशिष्टे प्रदर्शिताः। तत्रत्या पदशोधनप्रणाली सर्वेषां मनोरमेति सोऽपि ग्रन्थः पारसीकभाषानुशीलन-परैः संस्कृतज्ञैरनुशीलनार्ह इति ज्ञेयम्।

छत्रपतिशिवाजीराज्यकाले च महाराष्ट्रराज्यशासनकार्यपरिचालनार्थं प्रचलितानां पारसीकशब्दानां संस्कृतभाषायां तुल्यार्थकशब्दसङ्ग्रयोऽपि राज-व्यवहारकोशनामके ग्रन्थे कृत आसीदिति मन्तव्यम्।

पारसीकवर्णमालाविषये ज्ञातव्यमितिहासादिकं तदुच्चारणादि च प्रथमपरि-शिष्टे संक्षेपेण प्रदर्शितम्।

पारसीकभाषाव्याकरणादेः संस्कृतभाषायां प्रणयनं [illegible]लं कौतूहलवशे-नैव जातमिति मतिस्तु भ्रमात्मिकैव। यतो भारते व[illegible] अकबरवित्तमन्त्रिणः टोडरमल्लस्य कालादेव तदादेशेन राजकीयायव्ययादि[illegible]तकलेखनेषु देव-नागराक्षरस्थाने पारसीकभाषा-अक्षराणि च प्रतिष्ठितानि, [illegible] च हिन्दूनां करणानामायव्ययलेखकानां कृते तच्छिक्षणं परमावश्यकं जातम्। व्यतीते किञ्चित्काले तैर्हिन्दुभिः पारसीकभाषासु एवंविधा पटुता संपादिता, यथा ते मोहम्मदीयानामपि पारसीकभाषाशिक्षकाः संजाता इति तु "आइन-इ-अकबरी" ग्रन्थतो ज्ञायते। पारसीकभाषाशि[illegible]णोऽनभिज्ञानां स्वभावतः संस्कृतविदुषां राजकार्यैनियुक्तानां हिन्दूनां तद्भाषापाटवसंपादनार्थं कोशव्याकरणाद्यपे-

अपठित्वा तु तच्छास्त्रं श्रुत्वैवेमं करोम्यहम् ।
न्यूनातिरिक्ततामत्र क्षन्तुमर्हन्ति तद्विदः ॥७॥

यद्यपि ग्रन्थकारेण पारसीकव्याकरणादिशास्त्रपठनं न स्वीकृतम्; तथापि तद्रचितव्याकरणप्रकरणस्य तत्तत्स्थलदर्शनेनास्य पारसीकभाषाभिज्ञत्वं सुस्पष्टमेव, अनेन तु पारसीकभाषाया व्याकरणप्रणयने शर्ववर्माचार्यकृतकातन्त्रव्याकरणपरिगृहीताः परिभाषा अङ्गीकृताः। शब्दव्युत्पत्तौ त्वादेशरीतिमनुसृत्य संस्कृतशब्दानां स्थाने तत्तत्पारसीकशब्दानामादेशो विहितः। तथा च 'एक'शब्दस्य स्थाने 'यक्' आदेशं कृत्वा 'यक्' इत्येकशब्दार्थवाचिनः पारसीकशब्दस्य व्युत्पत्तिरनेन प्रदर्शिता। एवमेव आख्यातप्रकरणेऽपि पारसीकभाषायां भ्वादीनां धातूनां स्थाने 'शवद्' आद्यादेशेन तत्तदर्थवाचिनः पारसीकशब्दा अनेन साधिताः अवगन्तव्याः। इयमेव रीतिस्तिबादीनामाख्यातप्रत्ययानां स्थानेऽपि द्रष्टव्या।

इयञ्चादेशरीतिरिदानीन्तनानां पाश्चात्यभाषातत्त्वज्ञानां न मनोरमेति मत्वा मया तृतीयपरिशिष्टे पारसीकधातुभ्य एव पदसाधनार्थं सूत्रादिकं परिकल्पितम्। तत्र च पारसीका धातवोऽपि संस्कृतधातुपाठरीतिमनुसृत्य वर्गीकृताः। अनया रीत्या पदसाधने तु पारसीकशब्देभ्य एव पारसीकपदानां व्युत्पत्तिर्भवेदिति मन्तव्यम्। संस्कृतानामेव शब्दानां वाचकत्वमस्ति नान्येषामिति वादिनां कृते आदेशरीत्यनुसरणमगत्या करणीयम्। परन्तु संस्कृतशब्दानामेव वाचकत्वं नान्येषामिति प्रतिपादनानुकूलं किञ्चिद् दृढतरं प्रमाणमस्तीत्यत्रैव महान् सन्देहावसरोऽस्ति। अतः संस्कृतेतरभाषाव्याकरणप्रणयने आदेशरीत्यनुसरणं न मनोरमं प्रतिभाति। आशासे यदागामिनि काले आदेशरीतिं परिहृत्य पारसीकभाषाव्याकरणं संस्कृतभाषायां विरचयिष्यते।

प्रस्तुतस्य पारसीकप्रकाशस्य रचयिता विहारिकृष्णमिश्रस्तावत् शाकद्वीपीतिप्रसिद्धे ब्राह्मणकुले प्रसूत आसीदिति कल्प्यतेऽस्य सूर्यनमस्कारादिना। अनेन च 'मगव्यक्ति' नामकः, मग इति शाकद्वीपीति वा प्रसिद्धस्य ब्राह्मणसमाजस्येतिवृत्तात्मकः कश्चिद् ग्रन्थो रचित इत्यपि कल्प्यते। पारसीकप्रकाशे मगव्यक्तौ वा नैवंविधः कश्चिद् विषयो येन ग्रन्थकारयोरनयोस्तादात्म्यमेकान्ततो निश्चेतुं शक्येत।

नामसाम्यदर्शनमात्रेणैव व्यक्त्योस्तादात्म्यख्यापनं युक्तिसिद्धं न भवतीति ग्रन्थकार-परिचयविषयेऽहं मौनमेव साधु मन्ये । अयं च अकबरशाहराजसभायामासीदिति तु स्पष्टमेव पारसीकप्रकाशादवगम्यते । अतोऽस्य स्थितिकालः अकबरशाहस्य काल एवेति निर्विवादम् । अकबरशाहश्च १६१३ संवत्सरे सिंहासनमारुरोह, १६६२ संवत्सरे च परलोकं गत इति प्रसिद्धमेव, एतत्कालाभ्यन्तर एव पारसीक-प्रकाशस्य निर्माणकाल इत्यत्र नास्ति सन्देहावसरः ।

विहारिकृष्णमिश्रादनन्तरं कामरूपवास्तव्येन कविकर्णपूरेणापि पारसीकपद-प्रकाशाख्यः कोशव्याकरणात्मक एको ग्रन्थः संस्कृतभाषायां रचित आसीत् । तस्मिंश्च ग्रन्थे आदेशरीतिर्नैवानुसृता ग्रन्थकारेण । तस्माच्च ग्रन्थात् काश्चिद् व्याकरणविषयिण्यः कारिका मया तुलनार्थमुद्धृत्य द्वितीये परिशिष्टे प्रदर्शिताः । तत्रत्या पदसाधनप्रणाली सर्वेषां मनोरमेति सोऽपि ग्रन्थः पारसीकभाषानुशीलन-परैः संस्कृतज्ञैरनुशीलनार्ह इति ज्ञेयम् ।

छत्रपतिशिवाजीराज्यकाले च महाराष्ट्रराज्यशासनकार्यपरिचालनार्थं प्रचलितानां पारसीकशब्दानां संस्कृतभाषायां तुल्यार्थकशब्दसङ्ग्रहोऽपि राज-व्यवहारकोशनामके ग्रन्थे कृत आसीदिति मन्तव्यम् ।

पारसीकवर्णमालाविषये ज्ञातव्यमितिहासादिकं तदुच्चारणादि च प्रथमपरि-शिष्टे संक्षेपेण प्रदर्शितम् ।

पारसीकभाषाव्याकरणादेः संस्कृतभाषायां प्रणयनं केवलं कौतूहलवशे-नैव जातमिति मतिस्तु भ्रमात्मिकैव । यतो भारते वर्षे अकबरवित्तमन्त्रिणः टोडरमल्लस्य कालादेव तदादेशेन राजकीयायव्ययादिपुस्तकलेखनेषु देव-नागराक्षरस्थाने पारसीकभाषा-अक्षराणि च प्रतिष्ठितानि, ततश्च हिन्दूनां करणानामायव्ययलेखकानां कृते तच्छिक्षणं परमावश्यकं जातम् । व्यतीते किञ्चित्काले तैर्हिन्दुभिः पारसीकभाषासु एवंविधा पटुता संपादिता, यया ते मोहम्मदीयानामपि पारसीकभाषाशिक्षकाः संजाता इति तु "आइन-इ-अकबरी" ग्रन्थतो ज्ञायते । पारसीकभाषाशिक्षणेऽनभिज्ञानां स्वभावतः संस्कृतविदुषां राजकार्ये नियुक्तानां हिन्दूनां तद्भाषापाटवसंपादनार्थं कोशव्याकरणाद्यपे-

ञ्चितमासीदित्यत्र नास्ति विवादावसरः। तत्र कोशव्याकरणात्मकग्रन्थप्रणयने विहारिकृष्णमिश्रस्य अकबरसमकालिकस्यैव प्रथमः प्रयत्न आसीदिति संभाव्यते।

पारसीकभाषाया अनुशीलनं त्विदानीं संस्कृतभाषाया व्याकरणशास्त्रादिषु लब्धप्रवेशानां जनानां कृते पाणिन्यादिभिरुपस्थापितानां शब्दतत्त्वानां सार्वभौमिकत्वस्थापनार्थमपि परमावश्यकम्। ततश्च व्याकरणविषयेऽनुसन्धित्सुभिश्छात्रैर्नव्य-मध्य-प्राचीनपारसीकभाषाया अध्ययनमवश्यं विधेयमिति। इदानीन्तनास्वपि हिन्दीवङ्गादिभाषासु सुबहोः कालादेव पारसीकशब्दानां कारकादिविभक्तीनाञ्च प्रयोगोऽङ्गीकृतः। यथा च दृश्यते प्रचलितयोर्हिन्दीवङ्गभाषयोर्यवनराज्यकालत एव प्रातिपदिकानाम् 'रा' 'हारा' (मेरा, तुम्हारा इत्यादौ) अन्तत्वम्; 'इँहार, उँहार, याहा, ताहा' आदिपारसीकशब्दानां क्वापि शुद्धः प्रयोगो वङ्गभाषायाम्. तथा च वङ्गभाषायां बहुवचनप्रकाशनार्थम् 'दिगर्' शब्दान्तत्वमपि बहुशः दृश्यते, अतः तासां भाषाणां विशेषाध्ययनेऽपि पारसीकभाषायाः कोशव्याकरणादिकानां ज्ञानमावश्यकमेवेति मन्तव्यम्॥

सरस्वतीभवनम्
२२।१०।६५

विभूतिभूषणभट्टाचार्यः

एतद्ग्रन्थसंपादने उपयोजिता ग्रन्थाः

क—पारसीकप्रकाशः

वाराणसेयसंस्कृतविश्वविद्यालयीयपुस्तकालये महीधरसंग्रहस्थः ४०३२६ संख्यकः १६६५ संवत्सरे लिखितः। पत्र सं० १-६६। आकारः६.८ × ३.४। कर्गदोपरि देवनागराक्षरैर्लिखितः।

एतस्य पुष्पिकायाम् – इति श्रीमहीमहेन्द्र-श्रीमदकबरशाहकारिते विहारि-कृष्णदासमिश्रकृते पारसीकप्रकाशे कृत्प्रकरणं समाप्तम् ॥ संपूर्णोऽयं ग्रन्थः पारसीप्रकाशः ॥ शुभमस्तु ॥ संवत् १६६५ आश्विनकृष्णाष्टम्यां बुधे [illegible]भद्रेण लेखीदम् ॥

ग्रन्थोप[illegible] बहिर्भागे लिखितम्—कस्यापि लेखितुमपि न दातव्यं नामास्य ग्रंथस्य पुस्तकम् ॥

मठपति-जयगोपालभट-सुत-ब्रजभूषणस्येदं भट्टवेणीदत्तस्य दत्तं ब्रज-भूषणेस्तेभ्यः।

ख—वाराणसेय सं० वि० विद्यालयपुस्तकालये द्विवेदीसंग्रहस्थः ४०३२५ संख्यकः, पत्र सं० १–२८, अपूर्णः, आकारः ६.६ × ४.३. देवना०, कर्गदे,

एतस्यान्ते—वर्फगतौ भ्वादिः, वर्फ हिममित्यर्थः। रंजरागे, रंजो रंगः, रंगः श्वेतादिः। शासु अनुशासने, शास्ते श्यास—

ग घ—एशियाटिक सोसाइटी-बंगालस्थौ द्वौ ग्रन्थौ।

विषयानुक्रमः

पारसीक प्रकाशः

कोश प्रकरणम्

श्रीसूर्य्याय नमो विधाय विधिवत् सन्धाय चित्तं रवौ
दिव्यान्पूर्व पारसीकवचसां कुर्वे प्रकाशं नवम् ।
सम्राट् शाहजलालदीन्द्रसदसि प्राज्ञप्रमोदप्रदं
वाह्यध्वान्तमिवापहन्तु शठतां पूषान्तरस्थंतमः ।। १
यद् ब्रह्म वेदेन विकारहीनं प्रगीयते स्म प्रकृतेः परस्तात् ।
तदेष गोब्राह्मणपालनार्थं महीमहेन्द्रोऽकवरः प्रजातः ।। २

यदस्य नामाखिलशास्त्रसागरे
स्मृतीतिहासादिषु साधु विश्रुतम् ।
गतं त्रिलोकीषु चिरस्थितिं ततस्
स्तदाख्यया तन्त्रमिदं वितन्यते ।। ३

यद् गोपालसुतेन कृष्णविभुना गावस्तथा पालिता
रामैर्भूसुरदैवतैर्द्विजवरास्त्राता न चित्रं हि तत् ।
गोविप्राभिभवप्रिये यवनजे वंशेऽवतीर्णो विभुः
गोविप्रान् प्रतिपालयत्यकवरो विष्णुर्विचित्रं महत् ।। ४
कियतां पारसीकानां वचसां सङ्ग्रहो मया ।
विधीयते स्वबोधार्थं संस्कृतार्थावबोधनैः ।। ५

येऽवगाहितुमिच्छन्ति पारसीवाङ्महार्णवम् ।
तेषामर्थे कृष्णदासो निबध्नाति वचःप्लवम् ॥ ६

अपठित्वा तु तच्छास्त्रं श्रुत्वैवेमं करोम्यहम् ।
न्यूनातिरिक्ततामत्र क्षन्तुमर्हन्ति तद्विदः ॥ ७

श्रीसूर्य्य उक्त आफ्ताबोऽलामनूरोऽपि कथ्यते ।
नैयर आजमश्चापि तवको भुवनेषु च ॥ ८

इलाही स्याच्च नूरानी देवतायामथासुरे ।
इब्लीसो देव शैतानौ खुदायः परमेश्वरे ॥ ९

पातशाही च विभूतौ स्यात् साहिवी सा निगद्यते ।
आवहयातस्तु पीयूषे तूवा कल्पतरौ भवेत् ॥ १०

अप्सरःसु परी ज्ञेया विमाने अर्श ईरितः ।
आतशस्तु भवेद्वह्नौ शोलह् तस्य शिखासु [illegible] ॥ ११

दशाया[illegible] फतीलह् स्यात् चिरागो दीप उच्यते ।
दीपालये तु ताकः स्याद्धूमे दू[illegible] इति स्मृतः ॥ १२

यत्र ईलो यमे प्रोक्तो वाते वा[illegible] इतीरितः ।
राक्षसे त्वा[illegible]मीखारः श्[illegible] जूद इति स्मृतः ॥ १३

समये तु [illegible]नह् स्यात् सन्तते तु हमेशहः ।
रात्रौ [illegible]ब्यातो दिवसे रोज इष्यते ॥ १४

[illegible]ाते स्यात् सायं शाम इतीरितः ।
[illegible] प्रहरे प्रोक्तो मुहूर्त्ते सायतं भवेत् ॥ १५

[illegible]स्तु मासमात्रे स्यादृतुमात्रे फसल् भवेत् ।
[illegible]ीतकाले जमिश्तानो वहारः सुरभौ भवेत् ॥ १६

ताविस्तानस्तूष्मकाले वर्सातं जलदागमे ।
गुजस्त स्यादतीतेऽर्थे आयन्दह् स्याद्भविष्यति ॥ १७

हालह् स्याद्वर्त्तमानेऽर्थे मौजूदः सिद्धवस्तुनि ।
समाप्ते तु तमामः स्यादारम्भे शुरु स्मृतः ॥ १८
सकूनत् स्यात् स्थिरे चाले हरकतम् परिकीर्त्तितम् ।
शीते सरमा भवेद् गरमा तृष्णामात्रे प्रकीर्त्तितः ॥ १९
वारीदनं वर्षणे स्यात् तुन्दः स्याद्वेगवत्यपि ॥

॥ इति स्वर्गवर्गः ॥

आस्मानं व्योमनि प्रोक्तं दिशासु तरफो भवेत् ॥ २०
मण्डले दायरह् प्रोक्तो बुर्जं लग्नेषु कथ्यते ।
वारं वृष्टौ दुर्दिनादौ हवा स्यात् पारसीमते ॥२१
स्.. ड्मिन्यां वरक् प्रोक्तं गुम् स्यादन्तर्द्धिवाचकः ।
माहश्च.. कलायान्तु हिलालः परिकीर्त्तितः ॥ २२
पार्चह् खण्डे ..द्रिकायां महताव इतीरितः ।
कलङ्के तास इत्युक्त..ासु हुस्नं प्रकथ्यते ॥ २३ ॥
वर्फ भवेत्तुषारे च यखं स्याद्धिमसंहतौ ।
कुतुवस्तु ध्रुवे प्रोक्तः सोहे..कुम्भसम्भवे ॥ २४
राहौ राशः केतुषु स्यात् जनवः सूर्य्यपर्व्वणि ।
कुसूफः स्यात् खुसूफस्तु चन्द्रपर्व्वणि ..थ्यते ।२५
हालह् स्यात् परिधौ चन्द्रसूर्य्ययोः पारसं.. ॥
तारासु स्याच्च सितारा मुश्तरी च बृहस्पतौ ॥ ..।
शुक्रे तु जोहरा प्रोक्तो जोहला च शनैश्चरे ।
मिरीखो मङ्गले प्रोक्तो बुधेऽपि च अतारिदः ॥ २..
सप्तर्षिषु स्याद् हफ्तनाम विहिस्तः स्वर्ग उच्यते ।
उष्णो गरम् सर्द शीते कोष्णो शीरगरम् भवेत् ॥ २८
सुरावो मृगतृष्णायां तीक्ष्णो तेजः प्रकीर्त्तितः ।

॥ इति दिग्वर्गः ॥

संवत्सरे तु सालः स्यात् प्रलये स्यात् कयामतः ॥ २६
पापे गुनाह इत्युक्तः सवावः पुण्य उच्यते ।
आनन्दे खुशहाली स्याद् अस्लं कारण ईरितम् ॥ ३०
जीवात्मनि तु जानः स्याजन्मनि स्यात् तवल्लुदः ।
जानदारः प्राणिनि प्रोक्तो जातौ जात इतीरितः ॥ ३१
दिलं तु मानसे प्रोक्तं जुदायी पृथगात्मता ।

॥ इति कालवर्गः ॥

खिरदस्तु भवेद्बुद्धौ सङ्कल्पे नजर् इष्यते ॥ ३२
तर्के कयासः सन्देहे जन इत्यभिधीयते ।
यकीनं निश्चये प्रोक्तं हल्लं सिद्धान्त ईरितम् ॥ ३३
अङ्गीकारे कबूलं स्याद्विज्ञाने हूनरं भवेत् ।
ज्ञाने [illegible] अक्लकुल्लः स्यात् फलाहो मुक्ति[illegible]कः ॥ ३४
अज्ञाने [illegible]त्यात्तु नादानी दानायी त[illegible]ध्ययेये ।
रूपे स्या[illegible] सूरतः शब्देष्वावाजः [illegible]रिकीर्त्तितः ॥ ३५
गन्धे वूयं लज्जतः स्याद्रसे [illegible]पर्शे तु लामसः ।
जुमुख्तरीन्तु कषाये स्[illegible] शीरीं तु मधुरे मतः ॥ ३६
नमक[illegible] तेजः कटौ तिक्ते तथा तलख् ।
[illegible]श्रिते स्याद् आमेख्तः पारसीमते ॥ ३७
[illegible]वूई स्यात् सपेदः श्वेतवर्णके ।
[illegible]ु श्यामवर्णे स्यात् पीते जर्द इतीरितः ॥ ३८
[illegible]जं भवेद्धरिद्वर्णे रक्ते सुर्खः प्रकीर्त्तितम् ।
[illegible]खवरः किम्वदन्त्यां स्याद्वचने सखुनं भवेत् ॥ ३९
सोखनश्च भवेद् भस्म सुखतश्च निगद्यते ।
तलवन्तु तथाह्वाने नाम्नि स्याद् इस्म नाम च ॥ ४०

विवादे बहसः प्रोक्तः शपथे कसमो भवेत् ।
पुरसीदनं भवेत्प्रश्ने पासुख स्तूत्तरे भवेत् ॥ ४१
सिफतस्तु स्तवे प्रोक्तो नेक्नामी यशसि स्मृतः ।
प्रतापे तु शिकोहः स्यान्निन्दायां गीवति भवेत् ॥ ४२
यावहः स्यात् प्रलापार्थे सत्ये रास्तमितीरितः ।
मिथ्यार्थे तु दुरोगः स्यात् गौगा कोलाहले भवेत् ॥ ४३
नक्कारः पटहे भेर्य्यां नफीरः परिकीर्त्तितः ।
रक्सं नृत्येषु रक्कासो नर्त्तके परिकीर्त्तितः ॥ ४४
मेहर् स्यात्करुणायाञ्च खन्दा हासे प्रकीर्त्तितः ।
तवस्सुमं स्मिते प्रोक्तं वीभत्से जिश्त उच्यते ॥ ४५
आ[illegible]र्य्ये तु अजब् बीमं भयानक इति स्मृतम् ।
अहङ्कारे खु[illegible]ी माने नाज त्रासे तरस् मतम् ॥ ४६
आदरे स्याच्च[illegible]जीमो वेताजीमी त्वनादरे ।
क्षमायां वरदाश्तं स्य[illegible] लज्जायां च हया शरम् ॥ ४७
हसदं स्यादसूयायां वैरे स्यात् दुश्मनीति च ।
सुबुकं तु लघौ ज्ञेयं संगीनन्तु[illegible]रौ भवेत् ॥ ४८
बारीकन्तु भवेत् सूक्ष्मे तले तहे[illegible]रितः ।
गमः शोकेऽफसोसस्तु पश्चात्तापे गज[illegible]रुषि ।४९
शीले त्वसालतिः प्रोक्तो वेदिली चित्तविभ्रमे ।[illegible] ॥
अखूलासस्तु भवेत्स्नेहे आरजू स्यान्मनोरथे ।[illegible] ।
अन्देसा स्यात्तु चिन्तायां कामे कामश्च खाहि[illegible]
उत्साहे तु भवेत् शादी उत्कण्ठायां तवज्जुहम् ॥ ५१
कपटे मकरः प्रोक्तः प्रमादे गाफिली मता ।
कार्म्मणेषु च जादू स्यात् क्रिया पुंसा कृतेषु च ॥ ५२
अरकस्तु भवेद् घर्म्मे वाजी स्यात्कौतुकेषु च ।
जृम्भायां खमयाजः स्याद्रुदिते गिरियह् भवेत् ॥ ५३

लर्जह् कम्पे च निद्रायां ख्वावः स्यात् पारसीमते ।

॥ इति नाट्यवर्गः ॥

अस्फलः स्याच्च पाताले सूराखो विल उच्यते ॥ ५४

अन्धकारे तु तारीकी सर्पे मार इति स्मृतः ।

जहरस्तु विषे प्रोक्तः खरातीन् कञ्चुके मतम् ॥ ५५

व्यालग्राहिणि मारूगीरो नरके दोजखं भवेत् ।

स्यासति यातनायां स्यात् नारकेषु च दोजखी ॥ ५६

अलमस्तु भवेद् दुःखे राहतः सुख उच्यते ।

॥ इति पातालवर्गः ॥

दरिया स्यात् समुद्रेषु शोरःशब्दादिचिह्नितः ॥ ५७

आवः स्यादप्सु;मौजस्तु तरङ्गे परिकीर्त्तितः ।

विन्दौ स्यात् कतरह् कूज़े किनारः परिकीर्त्तितः ॥ ५८

अन्तरीपे जजीरह् स्यात् कर्दमे गिल [illegible] यते ।

जाले दाम इति ख्यातो रज्जौ रेस [illegible] न् प्रकीर्त्तितः ॥ ५९

सदफस्तु भवेत् शुक्तौ शङ्खादौ मोहरः स्मृतः ।

पल्वले च [illegible] रः प्रोक्तो ज [illegible] लः शैवले भवेत् ॥ ६०

नौकायान्तु भवेत् कि [illegible] ती कलुषे चिर्कीनं भवेत् ।

गम्भीरे [illegible] वो मत्स्ये माही प्रकीर्त्तिता ॥ ६१

[illegible] प्रोक्तो संगपुस्तश्चापि कथ्यते ।

[illegible] स्यात् जलौकायां वजको भेक उच्यते ॥ ६२

[illegible] पुष्करिण्यां स्यात् कूपे चाहः प्रकीर्त्तितः ।

[illegible] तु वाउली प्रोक्ता परिखायान्तु खन्दकः ॥ ६३

[illegible] रिया जलाशयेषु स्यात् पद्मे नीलोफरं मतम् ।

॥ इति वारिवर्गः ॥

उपर्य्यर्थे भवेद् वालाऽधोऽर्थे पायीन् तदन्तरे ॥ ६४

सियानः स्यात् स्थले जायो जमीन् भूमौ प्रकीर्त्तितः ।
निम्ने पस्ती विलन्द्युच्चे हम्वारस्तु समे भवेत् ॥ ६५
कुल्लह् शृङ्गे गिरेर्गर्त्ते गारः कोहो गिरौ भवेत् ।
वने तु जंगलो वृक्षे·दरख्तः पत्रके वरग् ॥ ६६
पुष्पे गुलं फले मेवा वारौ तुख्मन्तु वीजके ।
मूले वेखश्च शाखायां शाखः शृङ्गे पशोरपि ॥ ६७
साया छाया सुवृक्षादेर्व्याघ्रे शेरः प्रकीर्त्तितः ।
आहू मृगे गजे फीलो दुम् पुच्छे पश्म रोमसु ॥ ६८
शशके खरगोशः स्याद् गर्द्दभे तु खरो भवेत् ।
सगः शुनि शृगाले तु शिगालोऽश्वे ऽस्प उच्यते ॥ ६९
उष्ट्रेऽजूदर् वृश्चिके तु कजूदुम् हैवान् पशौ भवेत् ।
खगे मु[illegible]स्तु परिन्दा रविन्दा भूचरो भवेत् ॥ ७०
गवि गावं भक्वुज् छागे मेषे कोचः प्रकीर्त्तितः ।
तस्य पत्नी भवेद् ग[illegible] पारसीकमते ध्रुवम् ॥ ७१
पुच्छोपलक्षितो यस्तु गो[illegible]पन्दः स इहोच्यते ।
शिशुस्तु तत्सुतो वरह् तद्व[illegible] वहवो मताः ॥ ७२
नरो नरि स्त्रीषु मादा गाव्मे[illegible] महिषे स्मृ[illegible]ः ।
शुके तूती वानरे तु मैमून गुर्वा विड़[illegible]लके ॥ ७३
मूशः स्यान्मूषके काके कुलागो याग इत्[illegible]।
कवूतरः कपोते स्यात् कुञ्जिश्कश्चटके भवेत् [illegible]
शाखापुरे सरायः स्यान्नगरे शहरो भवेत् ।
मध्यमे तु पुरे कस्वा पत्तने गञ्ज उच्यते ॥ ७५
दुकानं स्त्वापणो ख्यातो हट्टे वाजार उच्यते ।
वप्रे स्यात् चारदीवारी भित्तौ दीवार उच्यते ॥ ७६
हुजरह् तु गुफायां स्यात् गृहे खानह् प्रकीर्त्तितः ।
पायगाहोऽश्वशालायां कारखानह् शिल्पवेश्मनि ॥ ७७

गवाक्षे पञ्जरः प्रोक्तो हर्म्यादौ महलो भवेत्।
अन्तःपुरे सरायः स्यात् सहनस्तु गृहाङ्गणे॥ ७८
द्वारे तु दरवाजः स्यात् कपाटे तख्ता उच्यते।
तिर्य्यक्काष्ठद्वयं वाजू ऊर्ध्वे सरदरः स्मृतः॥ ७९
जेरदरः स्यादधःकाष्ठे चारचोवश्चतुष्टये।
लोहवेण्यान्तु जंजीरः कुफलं स्यात्तदर्गले॥ ८०
उद्घाटने लोहकुंच्यां किलीदः परिकीर्त्तितः।
वेणीनिबन्धकोण्टायां हल्कह् स्यात्पारसीमते॥ ८१
जीनह् पारोहणे जारोव् मार्ज्जन्यां सीम्नि हद्द च।
जगदर्थे आलमः स्यान्मृदि खाकः प्रकीर्त्तितः॥ ८२
देशे [illegible]लायतश्च स्यात् पुलः सेतावथाध्वनि।
राहः [illegible]ोशे किरोहः स्यात् संगः पाषाणवाचकः॥ [illegible]
कानः [illegible]नौ तथारामे वागः श्रेण्यां कतार[illegible]त्।
इन्धने [illegible]ुमः प्रोक्तः काष्ठे चोव इति [illegible]ृतः॥ ८४
गुञ्चा तु [illegible]ोरके फुल्ले शगुफ्ता [illegible]सुमे भवेत्।
खूकस्तु शूकरे ऋक्षे खिर्सः [illegible]र्खाव् रथाङ्गके॥ ८५
मगसो म[illegible]कायां स्याद्[illegible] भ्रमरे जम्बुरः स्मृतः।
ताऊसः [illegible] मयूरे[illegible] कवकस्तु चकोरके॥ ८६
वालः [illegible]ारे वाजू वच्चा शिशौ भवेत्।
[illegible]हे स्याद् अम्बोहा ऽतिकदम्बके॥ ८७
[illegible]गे जुफ्तो मर्दः पुंसि जनः स्त्रियाम्।
[illegible]गिनीस्त्रीषु धर्म्मपत्न्यान्तु औरतिः॥ ८८
[illegible]गो हष्टरजसि जवानो युवती भवेत्।
दास्यां दायः फाहिशः स्याद्वेश्यायां कुट्टनी दल्लह्॥ ८९
दुपुस्तं गर्भिणीषु स्यात् पुत्रे तु पिसरो भवेत्।
दुख्तरस्तु सुतायां स्यात् मादरो मातरि स्मृतः॥ ९०

ख्वाहरस्तु भगिन्यां स्याद् दामादस्तु सुताधवे।
जनके पदरः प्रोक्तः शौहरस्तु धवे भवेत्॥ ९१

गर्भे त्वाविस्तनः प्रोक्तो नामर्द स्तु नपुंसके।
जरायान्तु भवेत् पीरी वाल्ये तिफ्ली च वालके॥ ९२

तिफ्लो वृद्धे भवेत् पीरो भ्रातरि स्याद् विरादरः।
अग्रजे तु कलानः स्यादनुजे खुर्द इत्यपि॥ ९३

दुर्व्वले लागरः प्रोक्तो वलिनि स्याज् जोरावरः।
तुन्दिले फरवेहः स्यात् करस्तु वधिरे भवेत्॥ ९४

चिकित्सायां इलाज स्याद् दारू स्यादौषधेषु च।
व्याधौ मरजस्तु छिक्कायां अत्सह् सिध्मनि वैवफा॥ ९५

शुं... कासे चुलः कण्डवां शोथे त्वामास उच्यते।
जखमस्तु व्रणो कुष्ठे वाद् फिरङ्गः प्रकीर्त्तितः॥ ९६

वर्स श्वित्रेषु खा... कण्डूषु रसकेषु च।
दुर्नाम्नि स्याद् ववासी ... ज्वरे तप इतीरितः॥ ९७

उन्मत्ते स्यात्तु मज्नून स्तेह्... भावे जुनून् भवेत्।
अन्धे कोरस्तु वीमारो व्याधि... तु मरग् मृतौ॥ ९८

वेहोसो मूर्छिते मूर्छा वेहोसी पारसी...।
नुत्फा शुक्रे च गोस्तं स्यान्मांसे खूनन्तु श...॥ ९...

अस्तखाणां भवेदस्थिन मगज मज्जनि कीर्त्तितं...।
चरवी मेदसि प्रोक्ता शिरासु रग उच्यते॥ १००

नाड्यां नज् इति प्रोक्तः पारसीक मते ध्रुवम्।
शाशा मूत्रे च पेशाब सरगीन गुह्यौ मले॥ १०१

वितस्तौ तु विलिस्तः स्यात् तमाचा तु चपेटके।
रास्तस्तु दक्षिणे वामे चपोऽग्रे पेश उच्यते॥ १०२

पश्चात् पशः कुण्डले तु गोशवार इति स्मृतः।

केषाञ्चित्तु मते स्त्रीणां नृणां हल्कह् प्रकीर्त्तितः ॥ १०३
आरायिशस्तु नेपथ्ये मालायां तसवी स्मृता ।
अंगुश्तरी तूर्म्मिकायां मुद्रायां मोहर् उच्यते ॥ १०४
वस्त्रे पार्चह विशेषे तु पट्टजे आवरेशमी ।
सामान्ये करपासः स्यात्सधातौ जरकशी भवेत् ॥ १०५
शालः स्याद्राङ्कवे चान्ये सूफ मष्मल कादयः ।
दैर्घ्यं तूलं परीणाहे अर्जं शुस्त स्तु धाविते ॥ १०६
चादरी तु निचोले स्यात् चौले तु तिलकादयः ।
वितने शामियानह् स्यात् तम्बू स्याद्वस्त्रवेश्मनि ॥ १०७
लुङ्गः भवेद्धोवस्त्रे जामा स्यात् कञ्चुके तथा ।
भवेद् [illegible] स्तारमुष्णीषे कमर्वन्दः कटौ तु यत् ॥ १०८
पोशीह नी परीधाने चासने स्यात् निशीमनम् ।
कनातं प्रतिसीरायाम् इजारः स्यादधोंऽशुके ॥ १०९
धावने [illegible] स्तनं प्रोक्तं गुस्लं स्नाने प्र[illegible]र्त्तितम् ।
कुङ्कुमे जा[illegible]राला खो लाक्षायां प[illegible]र्त्तितः ॥ ११०
करन्फलं लवङ्गे स्याद् दार[illegible]नी गुडत्वचि ।
[दानचीनी चीनजाते क[illegible]क च निगद्यते ।]॥ १११
काफूरो घन[illegible]रे स्या[illegible] मुष्को मृगमदे भवेत् ।
ऊदो[illegible]वाप्य [illegible]श्चन्दने सन्तलं भवेत् ॥ ११२
ज[illegible]फले तु जौ[illegible] जा स्याद् अवीरं पटवासके ।
वज्वाजं [illegible]तपत्री स्याल् लायूची त्वेला प्रकीर्त्तिता ॥ ११३
[जौजो [illegible]तीफले चोवनाय स्याद् देवदारुणि ।
ज[illegible]व स्तु हरिद्रायां चोवका पीतदारुणि ॥ ११४
[illegible]र म्वाद स्तु कचूरे जंजवीलं तु नागरे ।
अदरकं शृङ्गवेरे स्यात् फिल्फिलं मरिचे मतम् ॥ ११५
फिल्फिलदराजस्तु पिप्पल्यां सेतलख् त्रिकटौ भवेत् ।

ह लेला तु हरीतक्यां व लेला तु विभीतके ॥११६

धात्र्याञ्च आ म ल ह प्रोक्तम् जु वा न कु ञ्जि श्क लिङ्गके।

वा दि या सो फ शतपुष्पायां कि श्नी ज कु स्तु म्ब रौ तथा ॥ ११७

वचासु च गु रं वा दिः त मा ल व र्ग स्तु पत्रके।

त्वचि दा र सा र गु लं नागकेशरे परिकीर्त्तितम् ॥ ११८

[बु ख्वो य स्त्वजमोदायां ए कां गी च पलाशके।]

वा लि श्त मुपधाने स्यात् शय्यायां बि स्त रं मतम् ॥ ११६

पर्य्यङ्के च हा र पा ई स्यादूर्णाढ्यं न म दं मतम्।

[रल्लके स क ली तः स्याद् वा ला पो श स्तु तूलिका।] ॥ १२०

हु क्का स्यात् सम्पुटे शा ना प्रसाधन्यां प्रकीर्त्तितम्।

आ ईना दर्पणे तु स्याद् व्यजने वा द वी ज न म् ॥ १२१

अ सी ल स्तु कुलीने स्याद् दा नि श्म न्द स्तु पण्डिते।

मौ ला ना ऽऽचार्य्ये आ खो न्द उपाध्याये समीरितः ॥ १२२

शा गि र्दः शिष्यसंज्ञे स्यात् खा दि मः परिचारके।

[लेखके का ति वः प्रोक्तो लेख्ये प र वा न ह स्मृतम् ॥ १२३

मन्त्रदातरि पी रः स्यात् मन्त्रशिष्ये मु री द च।]

सन्ध्यायां च नि मा जः स्याद् इ मा मश्चोपदेष्टरि ॥ १२४

क ल मा मूलमन्त्रे स्यात् ख्वा जः व्युत्पन्नमानुषे।

सभायां म ज् लि सः सभ्ये म ज् लि सी स्यात् स खा व त म् ॥ १२५

दाने श्राद्धे उ र्स च स्यान्निवापे र वा ह इत्यपि।

कार्य्यादौ मन्त्रपाठे च फा ति हा परिकीर्त्तितः ॥ १२६

याञ्चायाञ्च ग दा यी स्यान् मि ह मा नोऽतिथौ भवेत्।

अभ्युत्थाने च ता जी मः पूजायां पो जि शं भवेत् ॥ १२७

शुश्रूषा खि ज् म तिः प्रोक्ताऽटाट्या ग र्दी द नं भवेत्।

इ स्ता द नं पथि स्थित्यां खा मो शी मौन उच्यते ॥ १२८

अतिक्रमे ज्या द ती स्याद् वा री पर्य्याय उच्यते ।
उपवासे तु फा का स्याद्व्रते रो जा प्रकीर्त्तितः ॥ १२६
दृष्टान्ते तु द ली लः स्याद्विचारे तु त अ म्मु लः ।
वु जु र्ग स्तु भवेन्मुख्ये न्या ज वन्द्य भिवादने ॥ १३०
महांस्तु का मि लः प्रोक्तः आ मि ल स्तापसो भवेत् ।
खा मो शः स्यान्मुनि र्दा ना ज्ञानयुक्त ऋषावपि ॥ १३१
यतौ तु द र वे शः स्यात्प्रयते पा क उच्यते ।
मु ल्हि दः स्यात्तु पाषण्डे भवेच्चर्म्मणि च र्म च ॥ १३२
क द्खु दा ई विवाहे स्याद्व्रते शो ह व ति र्मता ।
व्रतभ्रंशे खा र जी स्यादव्रते रा फ जी भवेत् ॥ १३३
मुक्तौ ना ला सी मुक्तस्तु ख ला सः परिकीर्त्तितः ।
उदये तु लु अ ह् प्रोक्तो गु रू बोऽस्ते प्रकीर्त्तितः ॥ १३४

॥ इति ब्रह्मवर्गः ॥

पा त शा ह्क नृपे प्रोक्तः सु ल ता न स्ततोऽधिके ।
शा ह न् शा हो नृपाधीशे व जी रो मन्त्रिणि स्मृतः ॥ १३५
शा होऽपि सीमन्नरपतौ शा ह जा द स्तदात्मजे ।
मी रे अ द ल गपाड्विन्नक द र वा न् द्वारपालके ॥ १३६
अ म ल्दा रोऽधिकारी स्यान् मी रः स्यान् मुख्यमुद्गले ।
मीरात्मजे तु मि र जा आ ग हः साधुमुद्गले ॥ १३७
बहूनां यवनानां यः प्रभुः खा नः स कथ्यते ।
न वा व श्च स एवोक्तो मी यां स्याद्यवनोत्तमे ॥ १३८
यः सर्व्वगुणसम्पन्नः सर्व्वशास्त्रार्थकोविदः ।
ज्ञानोपदेष्टा सर्व्वेषां स ना, ह ज र तः स्मृतः ॥ ३९
कर्मोपदेष्टा सर्वेषां शास्त्रमार्गानुसारतः ।
स्वयं ज्ञानेन सम्पन्नो म ख दू मः स कथ्यते ॥ १४०

षण्ढे खो ज स रा यः स्याद् दो स्तं मित्रे प्रकीर्त्तितम् ।
ह म् जो ली तु वयस्ये स्याद् दु श्म न स्तु रिपौ भवेत् ॥ १४१
नरा म ह र मा राज्ञो ये स्युरन्तरचारिणः ।
जा सू सः स्याच्चरे विज्ञे मे व रा धावने भवेत् ॥ १४२
क द खु दा गृहस्थे स्यात् न जू मी तान्त्रिके भवेत् ।
व की ल स्तु भवेद् दूते तस्य कर्म व का ल तः ॥ १४३
मु सा फि र स्तु पथिके विदेशे स फ रो भवेत् ।
जा द ल स्तु जिगीषौ स्यात् ख जा नः कोषसञ्चये ॥ १४४
कि ल अ स्याद् गढे राष्ट्रे मु ल क श्च वि ला य त म् ।
ल श्क र स्तु वले मुख्येषु उ म रा परिकीर्त्तितः ॥ १४५
[illegible]ज वा स्यादमात्येषु सन्धावा स्ती निगद्यते ।
आश्रय [illegible] प ना हः स्याद्विग्रहे जं ग उच्यते ॥ १४६
राज्ये स ल्त न भे[illegible] प्रोक्ता दौ ल तिः सा हि वी च सा ।
मन्त्रे म स्ल ह तं प्रोग[illegible]ये फ त ह उच्यते ॥ १४७
नीतौ अ दा ल तिः प्रोक्ता [illegible]दुर्नीतौ जु ल्म मित्यपि ।
जु ल्मा ना तु भवेद्दण्डे साहसे [illegible] अ जी म तः ॥ १४[illegible]
व द रा ही उपजापे स्याज् ज रू रं [illegible]वश्यके भवेत् ।
म व ज्ज ह न्तु युक्ते स्याद्वन्दने वा जी सम[illegible] ॥ १[illegible]
अपराधे गु ना हः स्यात् शासने हु क्म इत्या[illegible] ।
बन्धने व स्त नं प्रोक्तं करे सौ गा त इत्यपि ॥ १५०
उपायने च तु ह् फ ह् स्याद् ज का तः शुल्क उच्यते ।
गजे फी ल स्तुरङ्गे ऽ स् पः सा य र स्तु विनीतयोः ॥ १५१
पा य ल स्ते ज इत्येतौ वेगवन्तौ स्मृतौ बुधैः ।
द वी द नं धावने स्यात् षु री स्यान्नर्त्तनेऽपि च ॥ १५२
खलीनेतु ल गा मः स्यात् खुरे सु म्मः प्रकीर्त्तितः ।
अ या लः स्यात् स्कन्धकेशेषु पर्य्यायो जी न इत्यपि ॥ १५३

[ख्व गी रो जयनाधारे प्रोक्तस्तत्कासके ह ना ।
तत्पत्तती ज ना खः स्यात् तल्लमे द मे युग्मकम् ॥ १५४
पादाधारे र के वः स्याद् उ म शी ल म मेठिका ।
सि का र वं द स्तत्स्तवेषु पे श्वं दो हृदिचर्मणि ॥१ ५५
पेदारके च तं गः स्यात् तद्युक्ते क चि का पु जी ।
सूत्रपदे जे र वं दो जी न पो शो जयनाम्बरे ॥ १५६
अश्वाम्बरे तु हृ स; स्यात् कां धी स्कन्धाम्बरे मता ।
नेत्रावरणसूत्रेषु म ग स दा न् इतीरितः ॥ १५७
पादत्राणे लोहकृते ना ल इत्यभिधीयते ॥
मलहोरिणि रोमोत्थे शिल्ये ह श्थी ति कथ्यते ॥ १५८
अश्वकण्डूयने लोहे प्रोच्यते ख र ख रा बुधैः ।
कीलेषु से षा इत्युक्तं] कशायां चा बु कं मतम् ॥ १५९
अश्वारोहे स वा रः स्यात् [अ स वा रो ऽपि क [illegible]ते ।
उष्ट्रारोहे शु तु र् वा न्] फी ल वा न् ह[illegible]रोहके ॥ १६०
सैनिके स्[illegible]र दा रः स्यान् मं र्दा ना[illegible] शूर उच्यते ।
त र क श् [illegible]न्द स्तु सुभटे सेना[illegible] ल श्क रो मतः ॥ १६१
व ख्त रः कोचे प्रोक्तो जि[illegible] हः कञ्चुके भवेत् ।
मु स्त अ दा[illegible]स्तु सन्नद्धे या जी पत्तौ प्रकीर्त्तितः ॥ १६२
धनुर्द्ध[illegible] क मा न् दा रः ती र न्दा ज श्च कथ्यते ।
[illegible]सरे पे श र वः प रा गं द श्च मन्थिते ॥ १६३
सम्पत्तौ तु [illegible]वेत् सा मा न् मु श्कि लं स्यात्तथापदि ।
आपन्न[illegible] तथा ऽऽसा नः सि ला हो निखिलायुधे ॥ १६४
क म[illegible] नं तु भवेत् शार्ङ्गे को शा कोटौ प्रकीर्त्तिता ।
[illegible]ल्ला ज्यायां नि शा ना स्याल्लक्ष्ये ती रः शरे भवेत् ॥ १५६
ज ह् रा लू दो विषाक्ते स्यात्तूने त र क शं भवेत् ।
श म् शे र स्तु भवेत् खड्गे त्सरौ क ब्जः प्रकीर्त्तितः ॥ १६६

सिपरः स्यात्तु फलके कार्दः शस्त्र्यां निगद्यते ।
नेजा शल्ये भवेत्कुन्ते गुर्जा इत्यभिधीयते ॥ १६७
राज्यारम्भाभिषेके तु कुतूवः स्यात् पारसीमते ।
प्रस्थाने कूच इत्युक्तो मुकामः सन्निवेशने ॥ १६८
धूलौ गर्दो ध्वजे तोगा वैरको ऽल्पे निगद्यते ।
दुन्दुभौ तु दमामा स्यात् शौर्य्ये मर्दानगी मता ॥ १६९
पलायने गुरेजः स्यात् पायन्दारः स्थिरे भवेत् ।
जदनं तु प्रहारे स्यान् मुर्दा तु मृतके भवेत् ॥ १७०
वन्दिस्तु वन्द्यां कारायां जिन्दान् स्यात् पारसीमते ।
वले तु जोर इत्युक्तो नैरू स्यात् कुव्वतश्च ह ॥ १७१
[illegible]नं मारणे प्रोक्तं जिन्दगी जीवने भवेत् ।

॥ इति क्षत्रियवर्गः ॥

सौदागरा भव[illegible]न्ते ये व्यापारपरा नराः ॥ १७२
सौदा तत्कर्म्मणि [illegible] वक्कालः स्याद्वणिग्जने ।
वर्त्तने रोजगारः स्यात् जिरायत् तु कृषौ भवेत् ॥ १७३
ऋणे कर्ज समाख्यातं कर्ज[illegible]दः कुशीदके ।
कृषीवले वर्जगर् स्यात् कुलूखो [illegible] उच्यते ॥ १७४
(खाकिस्तरं भस्मनि स्यात् इष्टका खि[illegible]त उच्य[illegible] ।)
खले खरमनः ख्यातो यवे जेव इतीरितः ॥ १७५
खोयीदो वालपत्रे स्यात् तोक्मे तु दुलमुलं भवेत् ।
गन्दुमः स्यात्तु गोधूमे चनके नखुदो भवेत् ॥ १७६
कुञ्जिदस्तु तिले ख्यातः स्यात् खोशः शस्यमञ्जरी ।
शाली धान्येषु सर्व्वेषु तुषे वुश मितीरितम् ॥ १७७
खुर्जीनं तु भवेत्स्यूते वोरिया तु कटे भवेत् ।
वावर्ची सूदमात्रे स्यात् पाकाध्यक्षे वकावुलः ॥ १७८
वावर्चीखाना पाकगृहे विरञ्ज स्तण्डुले भवेत् ।

चुल्यान्तु दे ग दा नं स्यात्स्थाल्यां दे गः प्रकीर्त्तितः ॥ १७९
हसन्त्यां म न्क लं प्रोक्तं त नू रः कन्दुसंज्ञके ।
कुम्भे कू जा पि या ला स्यात् पानपात्रे प्रकीर्त्तिता ॥ १८०
पात्रे ज र्फ मिति ख्यातं शाके श व् जी प्रकीर्त्तिता ।
जी रः स्याज्जीरके गि र्द फि ल्फि लो मरिचे भवेत् ॥ १८१
फि ल्फि लु द रा जः पिप्पल्यामाद्रके ऽद र क उच्यते ।
शुण्ठ्यान्तु जं ज वी लं स्यात् कि श्नि जं धान्यके मतम् ॥ १८२
ज र्द चो वः हरिद्रायां अ ङ्गो जा हिङ्गुनि स्मृतम् ।
न म क् स्यात्सर्वलवणे श क रं शर्करासु च ॥ १८३
मत्स्यण्डिका न वा तः स्यात् क न्दं स्यात् सुगुडादिषु ।
शी र्बं न्तु शूल्यमांसे स्यात् क वा वं भर्जिते मतम् ॥ १८४
गो श्तं तु मांसमात्रे स्यात् क्षीरे शी रं प्रकीर्त्तितम् ।
लशुने सी र मित्युक्तं यूकासु शि पु सं भवेत् ॥ १८५
भक्ते पु श्क पु ला वः स्यान्मण्डे शो र्बः प्रकीर्त्तिता ।
रो ग नं स्नेहमात्रे स्यात् म स्का स्यान्नवनीतके ॥ १८६
जो घ रा तं तु दध्नि स्याद् म्रा [illegible] लु क्मा प्रकीर्त्तिता ।
आहारे खु र्द नी प्रोक्ता [illegible]लायां उ ल्श मुच्यते ॥ १८७
से री तृप्तौ [illegible] तृप्ते [illegible]यात् से रोऽजीर्णो तु इ म्ति ला ।
ग [illegible] न श्च चारे स्यात् चौ पा न् स्यात्पशुचारके ॥ १८८
गौ शा लः स्याद्वत्समात्रे कीलके मे ष उच्यते ।
मनावा द [illegible] इत्युक्तो है वाऽस्य स्याद् गृहेश्वरी ॥ १८९
तदप [illegible] मनुष्यः स्याद् आ द मी पारसीमते ।
[illegible] रः शिरसि पे शा नी ललाटे ब्रू भ्रु वीक्षणे ॥ १९०
च स्म वी नी तु नासायां कर्णयो गौं श उच्यते ।
मुखे द ह न जिह्वायां ज वाँ द न्दा न् रदे भवेत् ॥ १९१

तालौ का मो ल व स्त्वोष्ठे ना यः कण्ठप्रणालके ।
मि ज गां नेत्रपालौ स्यात्कपोले आ रि जो भवेत् ॥१६२
हनौ ज न ख इत्युक्तस्तदधो ग व् ग वो भवेत् ।
ग्रीवायां ग र्द निः प्रोक्ता तथा कण्ठे गु लू भवेत् ॥१६३
स्कन्धे स्यातां दो ष क स्फौ पारसीकमते ध्रुवम् ।
पृष्ठे पु श्तं शि क म् कोष्ठे ना फो नाभौ कटौ क म र् ॥१६४
पि स्ता स्यात्स्तनयोः स्त्रीणां सी ना स्यादुरसि द्वयोः ।
प ह लू स्यात्पार्श्वदेशे मणिबन्धे मु धो भवेत् ॥१६५
हस्ते द स्तः कुर्पूरे स्याद् आ र ञ्ज च तले क फः ।
अं गु श्त स्त्वङ्गुलीषु स्यान् ना खु न स्तु नखेषु च ॥१६६
वस्तौ ज हा रा इत्युक्तः सु री न स्तु नितम्बयोः ।
रा न स्तूर्व्वोर्जानुदेशे जा नू सा क स्तु जङ्घयोः ॥१६७
कक्षे व ग ल इत्युक्तः [illegible] या स्यादण्डकोषयोः ।
पार्ष्ण्यौ पा स्ना पा चरणे [illegible] के रः शिश्ने कु सो भगे ॥१[illegible]८
गुदे कू नः सर्व्वकेशे मो यो री [illegible] व रू त कौ ।
श्मश्रुवौष्ठकेशयोः स्यातामस्थ्नि चो स्[illegible] खा मित्यपि ॥१[illegible]६
रो दा चान्त्रे यकृत्पिण्डे जि ग र् पो स्तं त्व[illegible]चि स्मृतः ।
आश्लेषे स्याद् वा ल ई च बु श ह् स्याच्चुम्बने[illegible]पि च ॥[illegible]००
दुर्भिक्षे च . ग रा नी स्याद् अ र्जा नी स्यात्सुभिक्षके ।
समर्घे ऽर्जा महार्घे तु गि रा स्यात्पारसीमते ॥२०१
गु र स न गी क्षुधायां स्यात्तृष्णायां ति ष्ण गी मता ।
तनौ व द न त र् की वो देहे रु य् मुखमण्डले ॥२०२
अंगे ज वा रि हो गुल्फे सि ता लिं ग इति स्मृतः ।
शु तु र न्तु भवेदुष्ट्रे मूल्ये स्यात् की म ति र्वहा ॥२०३
पण्याजीवे दु का न् दा रो मा य ह् मूलधने भवेत् ।

विक्रयी स्यात् फ रो श न्द ह् ख री दा रः क्रयी भवेत् ॥२०४
फा य दा तु भवेल्लाभे न्यासे तु स्याद् अ मा न त म् ।
ख री द स्तु क्रये प्रोक्तः फ रो ख्तो विक्रये भवेत् ॥२०५
सु र ख दा न ह् तु गुञ्जायां कर्षं तो ला प्रकीर्त्तितः ।
दि र मं द्रव्यमात्रे स्याद्रत्नमात्रे ज वा हि र म् ॥२०६
या कू तं स्यात्पद्मरागे इ ल्मा सं हीरके भवेत् ।
मुक्तायां म खा री दः फि रो जा हरिते मणौ ॥२०७
म र्जा नो विद्रुमे प्रोक्तः ति ला स्वर्णे प्रकीर्त्तितम् ।
नु क्र ह स्तु भवेद्रुप्ये मि सं ताम्रे प्रकीर्त्तितम् ॥२०८
वि र ज स्तु भवेद्रीतौ रो यी कांस्ये प्रकीर्त्तितः ।
लौहे स्याद् आ ह नं काचे शी शा स्यादभ्रकेऽब्र क म् ॥२०९
सी म ा वः पारदे प्रोक्तः सु र्मे ह् स्रोतोऽञ्जने भवेत् ।
गो गि र्द गन्धके ताले ज र नी कं प्रकीर्तितम् ॥२१०
अ र्जी ं तु भवेद्वङ्गे सु र् व शीशक उच्यते ।
तूले पु म्बः अ स ल म् क्षौद्रे सिक्थके मो म उच्यते ॥२११
स्याद्धिङ्गुले शं ग र फं शिलायां म न् शि लं भवेत् ।

॥ इति वैश्यवर्गः ॥

कुम्भकारे कु ला लः स्यान्मालाकारे तु वा ग वा न् ॥२१२
स्थपतौ मे ज मा रः स्याद् वा फ न्द ह् तन्तुवायके ।
द र जी तुन्नवाये स्यात् श य् क ल ग र् शस्त्रमार्जके ॥२१३
सूच्यग्रे तु सो ज नः प्रोक्तस्तन्तौ रि स्त ह् प्रकीर्त्तितः ।
रङ्गाजीवे रं ग रे जः प्रोच्यते पारसीमते ॥२१४
क फ श्दो ज श्चर्म्मकारे आ ह नु ग र् लोहकारके ।
ज र ग रः स्वर्णकारे स्यान् मि स ग रः ताम्रकुट्टके ॥२१५
ह ज्जा मो नापिते प्रोक्तो द रु द् ग र् वर्द्धकौ भवेत् ।

गा जु रो रजकेषु स्यात् ख मा रः शौरिडके भवेत् ॥२१६
बा जी ग रो मायिके स्याद् बा जी सर्व्वेन्द्रजालके ।
गायने स्यात्तु गो य न्द ह् सा ज न्द ह् स्याच्च वादके ॥२१७
सर्व्वव्याधेषु सै या दो म जू दू रो भृतिभुक् भवेत् ।
ह म्मा लो भारवाहे स्यात् पामरे या म उच्यते ॥२१८
गु ला म स्तु भवेद्दासे का ह ल स्त्वलसे भवेत् ।
मृगयायां शि का रः स्याद् दु ज्द श्चोरे प्रकीर्त्तितः ॥२१६
तन्तौ ता रः समाख्यातो दु ज्दी स्यात् स्तेयकर्म्मणि ।
बा फ्त न न्तु भवेद्वाणौ पुत्रिकासु च सू र तः ॥२२०
मो ज ह् त्वनुपदीनायां पा पो शः स्यादुपानहि ।
कशायां ता जि या न ह् स्यान् म ह कं निकषे भवेत् ॥२२१
य क्म न्तु प्रतिविम्बे स्यात् सदृशे स्याद् ब रा ब रिः ।
म जू दू री कर्ममूल्ये स्यात् श रा ब स्त्वासवे भवेत् ॥२२२
द्यूतकारे कि मा र् बा जो मो र पाशक ईरितः ।
द स्त ह् तु मुशले प्रोक्तो हा व नं स्यादुदूखले ॥२२३
य ग् ला गु स्तु भवेद्दर्व्यां चालन्याम् ग ल को भवेत् ।

॥ इति शूद्रवर्गः ॥

ने की का रः सुकृती स्याद् बु जु र्ग स्तु महाशयः ॥२२४
दि ला व रः सहृदये दा ना स्यान्निपुणेऽपि च ।
महान्तमुद्यमं कर्त्ता यस्तस्मिन् पु र् त र ह्दु दः ॥२२५
स य ग द क़ु म न्द स्यात् संशयापन्नमानसः ।
अ का वि र स्तु पूज्ये स्याद् रा स्तः स्याद्दक्षिणीयके ॥२२६
उ म र् द रा ज़् आयुष्मान् वदान्ये तु स खी भवेत् ।
परीक्षके श ना सि न्द ह् मु ला ना शास्त्रवेत्तरि ॥२२७
आ र् ज़ू दे ह् स्यात्तु वरदे श गु फ्त ह् हृष्टमानसे ।

उन्मनस्यपि चा कः स्याद् दि ल्गी रो दुर्म्मनस्यपि ॥२२८
जु ऑं म र्द उदारे स्यात् पु र् का रः कुशलेऽपि च ।
ख्याते तु म श हू रः स्यात् ज र् दा रो धनिनि स्मृतः ॥२२६
सा हि व स्तु प्रभौ प्रोक्त अ वा दा नः समृद्धके ।
गुं गो मूके दयालौ तु मे ह र वां न इति स्मृतः ॥२३०
परतन्त्रे गि रि फ्ता र आ जा द ह् स्यात् स्वतन्त्रके ।
ढ़ ख्त ह् तु दीर्घसूत्रे स्यात् सं जी द ह् सावधानके ॥२३१
अक्ल हो घस्मरे प्रोक्तो गु र स न् क्षुधिते भवेत् ।
ख्यातः शि क म् प र स्तो ऽत्र यः स्यात् कुक्षिम्भरिर्नरः ॥२३२
ला जू जो लोलुपे प्रोक्तो ह री फो लोभवत्यपि ।
वि ाफ्ृ या ज विनीते स्यात् दे वा नो न्मत्तसंज्ञके ॥२३३
म स्तः ऽपि च भवेन्मत्ते धृष्टे वे अ द बः स्मृतः ।
द र् रा क स्तु प्रगल्भे स्यान् ना म र्दः कातरे भवेत् ॥२३४
गृहयालौ गि रि न्दः स्यात् श्रद्धालौ फ़ रिंदां स ला ।
या व ह् गो मुखरे गोया वक्तरि स्यात्तु कद्वदे ॥२३५
व दू स खु न् पु र् स खु न् चापि वाचाले परिकीर्त्तितः ।
ना दा नो ऽज्ञे च निद्रालौ पु र् ख्वा वो ऽत्र निगद्यते ॥२३६
क्रोधने स्यात् ख श्म ना को नि या ज् म न्दो ऽभिवादके ।
खा मों श इति तुष्णीके वे र ह न ह् तु दिगम्बरे ॥२३७
वे इ ज्ज तो ऽभिभूते स्याद् व स्तो बद्धे प्रकीर्त्तितः ।
आपन्ने व द हा लः स्याद् आ शि को व्यसनार्त्तके ॥२३८
प रे शा नो व्याकुले स्याद् वे हा लो विह्वले भवेत् ।
ब द अ क्लो दुष्टबुद्धौ स्यान् ने क अ क्लः सुमतौ भवेत् ॥२३९
व द फै ल श्चाततायी स्याद्बध्ये स्यात् कु श्त नी ति च ।
क र्जे ऽनृजौ व दा मो जः खले खू नी तु घातके ॥२४०
धूर्त्ते रि न्दः कदर्य्ये तु व दं कौ लः परिकीर्त्तितः ।

मु फ्लि स स्तु दरिद्रे स्याद् ग दा स्याद् याचके तथा ।।२४१
ज मा दो गिरिधात्वादौ न वा तो भूरुहादिषु ।
तिर्य्यंक्तु स्याच्च है वा न इ न्सा नो मनुजेऽपि च ।।२४२
सुन्दरे म ह् बू वः स्याद् रु वा य न्द ह् प्रिये भवेत् ।
व दो ऽधमे चि र् कि न न्तु मलिने परिकीर्त्तितम् ।।२४३
पवित्रे पा क इत्युक्तः पा की ज ह् स्यात्तु निर्म्मले ।
स र दा र् मुख्येषु विख्यातो वे म र तो ऽसारवस्तुनि ।।२४४
फ रा क स्तु विशाले स्यात् फ र व ह स्यात्स्थूलवस्तुनि ।
कृशे तु ला ग रः प्रोक्तो लेशे ज रा प्रकीर्तितः ।।२४५
प्रचुरे वि स या रः स्यात् ह म ह् स्यान्निखिलेऽपि च ।
समग्रे तु त मा मः स्यात् न ज् दी कं निकटे भवेत् ।।२४६
वे प र्द ह् त्वव्यवहिते दूरे दू र इति स्मृतः ।
गि र्द स्याद्वर्त्तुले प्रोच्चे व ल न्दः परिकीर्त्तितः ।।२४७
वामने प स्त इत्युक्त ऋजौ रा स्तः प्रकीर्त्यते ।
सदातने तु पा य न्द ह् वे पा य न्द ह् तु नश्वरे ।।२४८
ना जु वि न्दः स्थिरतरे जु वि न्द ह् नु चरे भवेत् ।
न्यूने क मो म सा वी तु समे ज या दो ऽधिके भवेत् ।।२४९
नूतने तु न वः प्रोक्तः कोमले न र मो भवेत् ।
कठोरे तु दु रु स्तः स्यात्पुराणे को ह ना स्मृतः ।।२५०
प्रत्यक्षे जा हि रः प्रोक्तः आ खि रो ऽन्ते प्रकीर्त्तितः ।
अ व्व ल स्तु भवेदादौ मोघे वे फा य दः स्मृतः ।।२५१
पो स्त् क न्द ह् स्यादतिव्यक्ते सुगुप्ते पो शी द ह् स्मृतः ।
एकाकी त न हा प्रोक्तः सर्वगे ह म् र वः स्मृतः ।।२५२
जि द् दः स्यात्प्रतिकूलेषु स्वा फि क स्तद्विपर्य्यये ।
सङ्कीर्णे तु भवेत् तं ग स्त रा सी द ह् तु मुण्डिते ।।२५३
संस्मृते दा शु दः ख्यातो फ रा मो श स्तु विस्मृते ।

ग्रन्थिते स्यात्तु पे व न्दो वो यी दो ग्रात उच्यते ॥२५४
वेष्टिते गि र्द क र्दः स्यात् ते जः स्यात्तेजितेऽपि च ।
पक्के पो ख्त इति ख्यातः श र्मि न्दः स्याच्च लज्जिते ॥२५५
को फ्तोऽवचूर्णिते ज्ञेयो वा फ्त ह् प्रोते निगद्यते ।
सो ख्त ह् स्यादग्निदग्धे तु सु कु फ्त ह् हृष्ट उच्यते ॥२५६
प्राप्ते र सी द इत्युक्तो जु श्त श्चान्वेषिते भवेत् ।
आर्द्रं त र श्च विख्यातः खु स्कं शुष्के प्रकीर्त्तितम् ॥२५७
स्यूते दो ख्त इति ख्यातः सर्वतः पारसीमते ।
आ मो ख्त उपदिष्टे स्यात्स्यात् श ना ख्तः परीचिते ॥२५८
म सीमात्रे भवेत् स्या ही लेखन्यां क ल मो भवेत् ।
दो आ त न्तु मषीपात्रे ह र फ स्त्वक्षरे भवेत् ॥२५९
स त र स्तु भवेत्पङ्क्तौ मात्रासु नु कु त ह् स्मृतः ।
शा य रः कविमात्रे स्यात्कवितायान्तु शा य री ॥२६०
रु बा यी तु भवेत् श्लोके ब य तं पद्यमात्रके ।
मि स र स्तु पदे प्रोक्तः छन्दोबद्धे न ज म् भवेत् ॥२६१

॥ इति विशेष्यनिघ्नवर्गः ॥

मा ह श्चन्द्रे च मासे च गुरौ कर्यिणा मु स्त री ।
सिद्धान्ते पेषणे ह ल्लो मे ह र् स्यात्करुणार्कयोः ॥२६२
रू यः स्यात्कांस्यमुखयोः क फः फेणे तले कफे ।
फे रं गः कथ्यते तज्ज्ञैः कुष्ठदेशविशेषयोः ॥२६३
शा ख स्तु वृक्षशाखायां पशोः शृङ्गेऽपि कीर्त्तितः ।
अ र्जे विज्ञापने वस्त्रपरिणाहेऽपि कीर्त्तितम् ॥२६४
प्रत्युद्गमे कञ्चुके च पे श वा ज् पारसीमते ।
शा न ह् केशप्रसाधिन्यां भवेच्चास्थिविशेषके ॥२६५
निमाजाग्रसरे मुख्ये स्मार्त्ते ई मा म ईरितः ।

शा य द् योग्येऽनुमानेच कि ना र ह् स्कन्धकूलयोः ॥२६६
विदेशमृतिमासेषु स फ रो ऽल म् मदाशयोः।
भवेद् द र् द्वारिविषये य म ल् कर्म्माधिकारयोः ॥२६७
स र् मस्तके निदर्शे स्यादुपर्य्यर्थे फले च व र्।
क म र् कटौ च चन्द्रे च वा ज् उद्घाटनिवृत्तयोः ॥२६८
आ व् जले च प्रतिष्ठायां सर्वतः पारसीमते।
प्रायश्छन्दोऽनुरोधेन सम्यगुच्चारणाय च
सिरकारश्च शब्दान्ते प्रयुक्तौ यौ न तौ स्थिरौ ॥२६६

इति श्रीमहीमहेन्द्रश्रीमदकवरशाहकारिते
विहारिकृष्णदासमिश्रकृते
पारसीकप्रकाशे कोशप्रकरणं
समाप्तम् ॥
शुभमस्तु ॥

अथ व्याकरणप्रकरणं निरूप्यते—

नात्र संज्ञा सङ्ग्रहः ॥१॥

क्वचिदपेक्षया संस्कृतसंज्ञयैव कार्यसिद्धेर्वक्ष्यमाणत्वात्[१]।

न सन्धिकार्यं पारसीकभाषायाञ्च ॥२॥

पारसीकभाषायां संस्कृतोक्तं सन्धिकार्यं न भवति। चकारात् क्वचित् कार्यवशतो भवत्यपि। अर्थात् प्रकृत्या तिष्ठतीति प्रकृतिसन्धिरेवात्र बलवान्। अतएव पदार्थाभिव्यक्तये न स्वरसन्धिव्यञ्जनसन्धी च क्रियेते। नचात्र विसर्गसन्धिः विसर्गाभावात्[२]।

विवक्षया पारसीकभाषायां स्वरस्य एकारादेशो व्यञ्जनस्य एकारागमो वा वक्तव्यो नाम्नि परपदे सति ॥३॥

यथा शाह अकबर। शाहे अकबर[३] इत्यादि।

अथातः सङ्ख्याशब्दा निरूप्यन्ते[४]—

---

१ पारसीकभाषायाः व्याकरणेषु पारिभाषिकीणां संज्ञानां सद्भावेऽपि ग्रन्थकृता एतद्ग्रन्थरचनाविषये शर्ववर्मोक्तरीतिरादृता इत्यतस्तासां संज्ञानां अत्र प्रयोजनाभावादेवासङ्ग्रहः नतु अभावादिति मन्तव्यम्।

२ पारसीकवर्णमालाविषयमधिकृत्य वक्तव्यादिकं भूमिकायां द्रष्टव्यम्।

३ एकारादेशागमयोर्विशेषस्तु Phillot. रचिते पारसीव्याकरणे— ch. ii. 26, ch. iii. 30-33, 39, ch. v. 43, 44, 46, ch. vi. 47, 48, 49, ch. vii. 60, ch. xiii. 117 द्रष्टव्यः।

अयं खलु एकारः पारसीव्याकरणे इजाफत् संज्ञकः इ, ए, यि ध्वनीनामन्यतमस्य द्योतको भवति। द्रष्टव्यः Phillot. P. 433 (foot note. 1.)

४ पारसीकभाषायां संख्यावाचकशब्दस्य इस्म इ अदद् इति संज्ञा वर्त्तते। अत्रचादर्शेषु पारसीकात्सेर्लुक्' इति (४२ सू०) लिखितं वर्त्तते। तत्तु अस्माभिरप्रयोजनीयत्वात् परित्यक्तम्।

एकस्य यक् सङ्ख्यायाम् ॥४॥

एकशब्दस्य यक् इत्यादेशो भवति पारसीकभाषायाम्। यक् एक इत्यर्थः

द्वेर्दू ॥५॥

द्विशब्दस्य दू[1] इत्यादेशो भवति पारसीकभाषायाम्। दू द्वावित्यर्थः।

त्रेः से ॥६॥

त्रिशब्दस्य से[2] इत्यादेशो भवति पारसीकभाषायाम्। से त्रय इत्यर्थः।

चतुरः चहार् चार् च ॥७॥

चहार्, चार्, चत्वार इत्यर्थः।

पञ्चानां पञ्ज् ॥८॥

पञ्ज् पञ्चेत्यर्थः।

षण्णां शश् ॥९॥

शश् षडित्यर्थः।

सप्तानां हफ्त् ॥१०॥

हफ्त् सप्तेत्यर्थः।

अष्टानां हश्त् ॥११॥

हश्त् अष्टावित्यर्थः।

नवानां नुह् ॥१२॥

नुह् नवेत्यर्थः।

दशानां दह् ॥१३॥

दह् दशेत्यर्थः।

यकादेरज़् दहे ॥१४॥

यकादेः अज् आगमो भवति दहे परे।

क्वचित् क लोपो वक्तव्यः ॥१५॥

---

१ दु इति ह्रस्वेकारान्तः पाठः शुद्धः।

२ सि इति Phillot मते शुद्धः पाठः। परन्तु Persian Self Taught ग्रन्थे शेख हश्नेन तु से इत्येव लिखितम।

एकेनाधिका दशेति वाच्ये याज़् दह्[1] एकादशेत्यर्थः ।

द्वेर्द्वा ॥१६॥

द्विशब्दस्य द्वा इत्यादेशो भवति दहे परे पारसीकभाषायाम् । द्वाज़् दह्[2] द्वादशेत्यर्थः । सीज़् दह्[3] त्रयोदशेत्यर्थः ।

चतुरोनाज़् ॥१७॥

चहार्दह् चतुर्दशेत्यर्थः ।

पञ्चानां पा दहशदोः ॥१८॥

पारसीके क्वचित् अर्द्धानुस्वारो[4] वक्तव्यः ॥१९॥

पाँज़् दह् पञ्चदशेत्यर्थः ।

शशः शाँ[5] दहे ॥२०॥

---

१ यद्यपि आदर्शपुस्तके याय् दह् इति पाठस्तथा १४ सूत्रेऽपि यकादेश्य् दहे इत्येव पाठस्तथापि वस्तुस्थितिमनुसृत्य १४ सूत्रे अज् दहे इति, अत्र च याज़् दह् इति च पाठः कल्पितः । अत्र याँज़् दह इत्यपि भवतीति ज्ञेयम् ।

२ अत्र Phillot कृते व्याकरणे तु द्वा इत्यस्यस्थाने दवा इति दृश्यते । तथाच दवाज़् दह द्वादशेत्यर्थः । अत्रापि दवाँज़् दह इत्यपि भवति ।

३ आदर्शपुस्तके सेऽय् दह् इति पाठे सत्यपि पारसीकभाषायां सि शब्दस्यैव त्रिशब्दस्थानापन्नत्वदर्शनेन Phillot कृतग्रन्थप्रामाण्येन च सीज़् दह् इत्येव पाठः मुद्रितः । सीँज़् दह् इत्यपि दृश्यते ।

४ Phillot कृतग्रन्थप्रामाण्येन एकादश, द्वादश, त्रयोदश, पञ्चदश, षोड़श, ऊनविंश प्रभृतिषु शब्देषु पारसीकभाषायामर्द्धानुस्वारो दृश्यत इति मन्तव्यम् । यद्यपि आदर्शपुस्तके न कुत्राप्यस्य अर्द्धानुस्वारस्य प्रयोगो दृश्यते तथाप्यत्र अर्द्धानुस्वारस्थानीयत्वेन ँ चिह्नं प्रदत्तम् ।

५ आदर्शपुस्तके सा इत्येव दृश्यते परन्तु पारसीकानामुच्चारणानुरोधात् Phillot प्रामाण्येन च शाँ इत्येव पाठः स्वीकृतः । घ पुस्तकेऽपि शां इत्येव दृश्यते ।

शाँज़् दह् षोड़शेत्यर्थः ।

हफ्तानां हफ्त् दहे ॥२१॥

हफ्तदह्[१] सप्तदशेत्यर्थः ।

हश्तानां हश्[२] दहे ॥२२॥

हश्दह् अष्टादशेत्यर्थः ।

नवानां नूज़्[३] दहे ॥२३॥

नूज़् दह् एकोनविंशतिरित्यर्थः ।

दशभिरधिकादशेति वीस्त् ॥२४॥

वीस्त् विंशतिरित्यर्थः ।

वीस्तादेरु यकादिषु ॥२५॥

वीस्त् उ यक् एकविंशतिरित्यर्थः । वीस्त् उ दू, वीस्त् उ से, वीस्त् उ चहार्, वीस्त् उ पञ्ज्, वीस्त् उ शश्, वीस्त् उ हफ्त्, वीस्त् उ हश्त्, बीस्त् उ नुह् ।

त्रयाणां दशानां[४] समाहारे सी[५] ॥२६॥

---

१ हफ्दह इत्यपि भवतीति Phillot. अत्र अजागमाभावो द्रष्टव्यः ।

२ आदर्शे तु हश्तानां हज्दहे इत्येव सूत्राकारः । परन्तु Phillot प्रामाण्येन हश् इति पाठोऽत्र मुद्रितः । अत्रापि अजागमाभावो द्रष्टव्यः । हश्त्दह् इति वैकल्पिकं पदमिति Phillot. ग पुस्तकेऽपि हश्त्दह इत्येव पाठः ।

३ आदर्शपुस्तके तु नोय् इति पाठः । परन्तु Phillot प्रामाण्येन नूज़् इत्यस्माभिः कल्पितः । अत्र अजागमाभावः पूर्ववत् । नुवाँज़् दह इति वैकल्पिकं पदमिति Phillot.

४ आदर्शान्तरे च दहानां इति पाठो दृश्यते । तत्रापि केनचित् हकारोपरि शकारः लिखितोऽस्ति ।

५ Phillot मते सि इत्यनेन त्रयः, सी इत्यनेन च त्रिंशद् बोध्यन्ते । परन्तु सीसद् इत्यनेन शतत्रयाणां बोधो भवतीति मन्तव्यम् ।

सी त्रिंशदित्यर्थः। उकारागमः पूर्ववत्।

सी उ यक्, सी उ दू, सी उ से, सी उ चहार्, सी उ पञ्ज्, सी उ शश्, सी उ हफ्त्, सी उ हश्त्, सी उ नुह्।

चतुर्णां दशानां समाहारे चिहिल् चिल् वा[1] ॥२७॥

चिहिल्, कचित् चिल् चत्वारिंशदित्यर्थः। चिहिल् उ यक्, चिहिल् उ दू, चिहिल् उ से, चिहिल् उ चहार्, चिहिल् उ पञ्ज्, चिहिल् उ शश्, चिहिल् उ हफ्त, चिहिल् उ हश्त्, चिहिल् उ नुह्।

पञ्चानां दशानां समाहारे पञ्जाह् ॥२८॥

पञ्जाह् पञ्चाशदित्यर्थः। पञ्जाह् उ यक्, पञ्जाह् उ दू, पञ्जाह् उ से, पञ्जाह् उ चहार्, पञ्जाह् उ पञ्ज्, पञ्जाह् उ शश्, पञ्जाह् उ हफ्त्, पञ्जाह् उ हश्त्, पञ्जाह उ नुह्।

षण्णां दशानां समाहारे दशानां तः ॥२९॥

शश्त् षष्टिरित्यर्थः। शश्त् उ यक्, शश्त् उ दू, शश्त् उ से, शश्त् उ चहार्, शश्त् उ पञ्ज्, शश्त् उ हफ्त्, शश्त् उ हफ्त्, शश्त् उ हश्त्, शश्त् उ नुह्।

सप्तानां दशानां समाहारे दशानां आद् ॥३०॥

सप्तानां दशानां समाहारः हफ्ताद् सप्ततिरित्यर्थः। हफ्ताद् उ यक्, हफ्ताद् उ दू, हफ्ताद् उ से, हफ्ताद् उ चहार्, हफ्ताद् उ पञ्ज, हफ्ताद् उ शश्, हफ्ताद् उ हफ्त्, हफ्ताद् उ हश्त्, हफ्ताद् उ नुह्।

अष्टानां दशानां समाहारे दशानां आद् ॥३१॥

अष्टानां दशानां समाहारः हश्ताद् अशीतिरित्यर्थः। हश्ताद् उ यक्, हश्ताद् उ दू, हश्ताद् उ से, हश्ताद् उ चहार्, हश्ताद् उ पञ्ज्, हश्ताद् उ शश्, हश्ताद् उ हफ्त्, हश्ताद् उ हश्त्, हश्ताद् उ नुह्।

नवानां दशानां समाहारे नवानां नव दशानां द श्च ॥३२॥

---

[1] Phillot मते चिल् इत्येव पदम् न तु आदर्शलिखितं चिल्व इति।

नवानां दशानां समाहारः नवद् नवतिरित्यर्थः। नवद् उ यक्, नवद् उ दू, नवद् उ से, नवद् उ चहार्, नवद् उ पञ्ज्, नवद् उ शश्, नवद् उ हफ्त्, नवद् उ हश्त्, नवद् उ नुह्।

दशानां दशानां समाहारे सद्[1] ॥३४॥

प्रथमदशशब्दस्य सः द्वितीयस्य दः। सद् शतमित्यर्थः।

सद् उ यक् सद् उ दू, सद् उ से, सद् उ चहार्, इत्यादि। यक् सद्, दू सद्[2]।

दू शब्दात् परस्य सद् शब्दस्य वेस्त् आदेशो वा वक्तव्यः ॥३४॥

दू वेस्त्[3], से सद्[3], चहार सद्, पाँ सद्[3], शश्सद्, हफ्त् सद्, हश्त् सद्, नुह् सद् इत्यादि।

दशानां शतानां समाहारे हजार् ॥३५॥

दशानां शतानां समाहारः हजार्[4] सहस्रमित्यर्थः।

लक्षस्य लक्[5] ॥३६॥

---

१ अत्र शतशब्दस्य सद् आदेश एव प्रक्रियालाघवम् मन्तव्यम्।

२ दूसद् इति तु लिख्यते न तु कथ्यत इति Phillot.

३ दूवीस्त्, सीसद्, पान् सद् इति Phillot.

४ अत्रापि सहस्रस्य हजार् आदेश एव लाघवम्। आदर्शे तु हजारम् इति वर्त्तते।

५ आदर्शे तु लक्षस्य लख् इत्येव पाठः। परं Phillot प्रामाण्येन अत्र लक् इत्येवादृतोऽस्माभिः। तन्मते भारते वर्षे लक्षस्य स्थाने भाषायां लाख् इति प्रयोगो दृश्यते। लाख् शब्दस्य स्थान एव लक् इति प्रयुज्यते भारतीयैः पारसीकभाषाविद्भिरिति मन्तव्यम्। वस्तुतः सद् हजार् शब्द एव लक्षसंख्या-बोधकः पारसीकभाषायामिति Phillot. अस्य शब्दस्य ककारान्त एव लेखो दृश्यते पारसीकभाषायाम्।

लक् लक्षमित्यर्थः ।

कोटेः कुरूर्[1] ॥३७॥

कुरूर् कोटिरित्यर्थः ।

अर्द्धस्य नीम्[2] समेंऽशे निस्फः ॥३८॥

नीम् अर्द्धमित्यर्थः । निस्फ् अर्द्धमित्यर्थः ।

चतुर्थांशस्य रुब्य्[3] ॥३९॥

रुब्य् चतुर्थोंऽश इत्यर्थः ।

यकादेः पूरणे डुम्[4] ॥४०॥

यकादेः संख्याशब्दात् डुम् प्रत्ययो भवति पूरणेऽर्थे पारसीकभाषायाम् । यकस्य पूरणः यकुम् । डिति टेर्लोपः ।

दू सि इत्येतयोर्यागमो डुमि वक्तव्यः[5] ॥४१॥

---

१ आदर्शे तु करोरिः इत्येव पाठः । परन्तु Phillot कृतग्रन्थमनुसृत्य अत्र कुरूर् इत्येव पाठः स्वीकृतः । तन्मते लक्षपञ्चकमात्रबोधकमिदं कुरूर् पदं पारस्यदेशे । तद्देशे तत्रैव गणनाविश्रान्तिरपि तेनोक्ता ।

२ इदानीं समासस्थले नीम् शब्दस्य बहुलः प्रयोगः, कथने तु निस्फस्यैवेति Phillot. नीम इति स्वरान्तोऽपि शब्दोऽनेकत्र प्रयुज्यत इति तत्रैव ।

३ अस्य पदस्यान्ते हलन्तयकारेण ग्रन्थकृता यस्य वर्णस्योचारणं सङ्केतितं तच्च विलक्षणं मन्तव्यम् । अस्योच्चारणं तु कथमपि अ-य् तुल्यमिति द्रष्टव्यम् ।

४ अत्र द्वितीयादर्शे तु उम् (ऊम्) प्रत्यय इति दृश्यते । तत्र डिति टेर्लोप इति नास्ति ।

५ अत्र Phillot प्रामाण्येन य् इति आगमस्वरूपम् मन्तव्यम्, नतु आदर्शोपदिष्टं य, या वा । तन्मते दुयुम् इत्येव पदं नतु आदर्शोक्तं दूयोम् सेयोम् वा । त्रयाणां पूरणः इति नास्ति प्रथमे आदर्शे ।

द्वयोः पूरणः दूयुम्,* त्रयाणां पूरणः सियुम्,* चहारुम्, पञ्जुम्, शशुम्, हफ्तुम्, हश्तुम्, नुहुम्, दहुम्, याज़्दहुम् इत्यादि। वीस्तुम्, सीउम्, चिहिलुम्, पञ्जाहुम्, [शश्तुम्, हफ्तादुम्] (हश्तादुम्, नवदुम्) सद् उ यकुम् ‡ विस्त् उ यकुम्, सी उ दहुम् इत्यादि।

इति म० श्रीमदकवरशाहकारिते विहारिकृष्णदासमिश्रकृते पारसीकप्रकाशे संख्याशब्दनिर्णयः।

अथ शब्दप्रकरणं निरूप्यते—

तत्रादौ आफ्ताव् शब्दात् स्यादिविभक्तयो योज्यन्ते। आफ्ताव् सि इति स्थिते—

पारसीकात् सेर्लुक् ॥४२॥

पारसीकशब्दात् परस्य सेर्लुक् भवति सर्वत्र। आफ्ताव्[1]।

पारसीकभाषायां द्विवचनाभावः[2] ॥४३॥

आफ्ताव जस् इति स्थिते—

जसो हा ॥४४॥

पारसीकशब्दात् परस्य जसो हा[3] आदेशो भवति। आफ्ताव् हा।

[ ] चिह्नमध्यगतयोः पदयोः स्थाने आदर्शयोः सदुम्, ह्यारुम्, इति पदद्वयं वर्त्तते। ( ) चिह्नमध्यगते पदे अस्माभिर्निवेशिते। ‡ एवं चिह्नस्थले द्वितीयादर्शे दहुयकुम् इति पदं वर्त्तते। * Phillot मते दुव्वुम्, सिव्वुम् इति वैकल्पिके पदे ज्ञातव्ये।

१ कुत्रचिदादर्शे तु अकारान्त एव आफ्ताव् शब्दो दृश्यते।

२ प्राचीनपारसीकभाषायान्तु आसीद् द्विवचनमपीति मन्तव्यम्।

३ Phillot महोदयमते तु अप्राणिवाचकानां निकृष्टप्राणिवाचकानाञ्च बहुवचने हा आदेशो भवति।

आफ्ताबादेरान् विवक्षया बहुवचनस्य ॥४५॥

आफ्ताबादेः शब्दात् परस्य प्रथमादिविभक्तेर्बहुवचनस्य विवक्षया आन्[1] आदेशो भवति। आफ्ताबान्।

आफ्ताब् अम् इति स्थिते—

द्वितीयायाः षष्ठ्याश्च रा[2] ॥४६॥

पारसीकशब्दात् परस्या द्वितीयायाः षष्ठ्याश्च रा आदेशो भवति। आफ्ताब्रा।

---

१ उक्तमहोदयमते बुद्धिमत्प्राणिवाचकानां, कदाचिच्च प्रशंसार्थमन्येषामपि शब्दानां, बहुवचने आन् आदेशो भवति। आदर्शे तु अन् इत्येव आदेशस्वरूपं वर्त्तते, परं Phillot प्रामाण्येन आन् इत्येवात्र गृहीतम्।

पारसीकभाषायां आकारान्तानां शब्दानां बहुवचने य् आगमो भवति। यथा दाना, दानायान्।

अय् भागान्तानां एकवचने, लुप्तयकाराणां केषाञ्चिच्छब्दानां बहुवचने च य आगमो भवति। परीरू, परीरूयान्।

ऊकारान्तानां केषाञ्चिद् बहुवचने ह्रस्वभावमापन्नानां व् आगमो भवति।

यथा—बाज़ू; बाज़ुवान्।

अर्द्धहकारान्तानां शब्दानां बहुवचने आन् आदेशे जाते अर्द्धहकारस्य गा आदेशो भवति। यथा—मुर्दह् मुर्दगान्। अप्राणिवाचकानां अर्द्धहकारान्तानां बहुवचने हा आदेशे सति अर्द्धस्य हकारस्य लोपो दृश्यते। यथा—नामह् नामहा।

क्वचिच्च पारसीके बहुवचनविषये आत् आदेशोऽपि दृश्यते। यथा—नवाज़िशात्, फ़र्मायिशात्।

बहुवचनविषये अधिकन्तु Phillot कृते ग्रन्थे द्रष्टव्यम्।

२ षष्ठीविभक्तिविषये रा आदेशः Phillot सम्मतो नेति प्रतिभाति। तन्मते सम्बन्धबोधकः ई आगम (इज़ाफत् संज्ञकः) एव प्रायो भवति।

वहुवचने हागमः ॥४७॥

पारसीकशब्दानां हा आगमो भवति वहुवचनविषये। आफ्ताव्हारा, आफ्तवाँरा।

पारसीके नस्य अनुस्वारो[1] वक्तव्यः ॥४८॥

तृतीयायाः बा[2] अस्य पूर्वनिपातश्च ॥४९॥

पारसीकशब्दात् परस्यास्तृतीयाया बा इत्यादेशो भवति। बा इत्यस्य पूर्वनिपातश्च। बा आफ्ताव्, बा आफ्ताव्हा, बा आफ्ताबान्।

वश्च विभाषया ॥५०॥

पारसीकशब्दात् परस्यास्तृतीयाया विभाषया ब[3] इत्यादेशश्च भवति। तस्य पूर्वनिपातश्च। ब आफ्ताव्, ब आफ्ताव्हा, ब आफ्ताबान्।

चतुर्थ्या बराय् ॥५१॥

पारसीकशब्दात् परस्याश्चतुर्थ्याः बराय्[4] इत्यादेशो भवति। तस्य पूर्वनिपातश्च। बराय् आफ्ताव्, बराय् आफ्ताव्हा, बराय् आफ्ताबान्।

अज़् पञ्चम्याः ॥५२॥

पारसीकशब्दात्परस्याः पञ्चम्याः अज़्[5] इत्यादेशो भवति। तस्य पूर्वनिपातश्च। अज़् आफ्ताव्, अज़् आफ्ताव्हा, अज़् आफ्ताबान्।

---

१ Phillot मते पारसीके अनुनासिकवर्णाभावो विद्यते। तेनोक्तं भारतीयाः पारसीकज्ञाः बहुत्र अनुनासिकवर्णं प्रयुञ्जन्ते। परन्तु तन्न साध्विति मन्तव्यम् इति।

२ बा इत्यस्य कदाचित् काव्यादौ अबा इत्यपि रूपान्तरं भवति।

३ पारस्यदेशे तु बि इत्येवादेशस्य स्वरूपम्। भारते तु ब इति भवति। पारस्यदेशेऽपि कुत्रचित् ब इत्यपि व्यवह्रियते। आरबीभाषायां सर्वत्र बि इत्येव ज्ञातव्यम्।

४ Phillot मते बराय् इत्यस्य अव्ययस्य निमित्ते तादर्थ्ये वा प्रयोगः। न तु सर्वत्र चतुर्थीविभक्तौ बराय् इत्यादेशः। अधिकन्तु कारकप्रकरणे द्रष्टव्यम्।

५ आदर्शे तु अय् इति पाठः। परं Phillot आदिप्रामाण्येन अज़ इत्येवात्र गृहीतः। पद्यादौ अज़् इत्यस्य ज़ि इत्यपि रूपं दृश्यते।

षष्ठ्या रा पूर्ववत्[1]। आफ्ताब्रा आफ्ताब्हारा; आफ्ताबाँरा।

सप्तम्या दर् ॥५३॥

पारसीकशब्दात्परस्याः सप्तम्या दर् इत्यादेशो भवति। तस्य पूर्वनिपातश्च। दर् आफ्ताब्, दर् आफ्ताब्हा, दर् आफ्ताबान्।

उपरि बर ॥५४॥

पारसीकशब्दात्परस्याः सप्तम्या बर् इत्यादेशो भवति उपर्यर्थे। तस्य पूर्वनिपातश्च। बर् आफ्ताब्, बर् आफ्ताबहा, बर् आफ्तबान्। एवं बर् अश्प। बर् देवार्[2]। बर् कोह्। बर् दरख्त् इत्यादि।

सम्बोधनाभिव्यक्तये पारसीके ये[3] शब्दः प्राक् प्रयोक्तव्यः ॥५५॥

ये आफ्ताब्। ये आफ्ताब्हा। ये आफ्ताबान्। एवमेव सर्वे पारसीकशब्दा बोद्धव्या।

यथा—शाह्	शाह्हा, शाहान्
शाह्रा	शाहहारा, शाहाराँ
बा शाह् }	बा शाह्हा, बा शाहान्
ब शाह् }	ब शाह्हा, ब शाहान्
बराय् शाह्	बराय् शाहहा, बराय् शाहान्
अज़् शाह्	अज़् शाहहा, अज़ शाहान्
शाह्रा	शाह्हारा, शाहाराँ
दर् शाह्	दर्शाह्हा, दर्शाहान्

(अय्, या) ये शाह् (अय्, या) ये शाहहा (शाहान्)

—:o:—

१ पूर्वोक्तं (४६ सू०) द्रष्टव्यम्।

२ घ पुस्तके बर् फील् इत्यधिकः पाठः।

३ Phillot सम्मत्या अय् या वा सम्बोधनार्थे शब्दात् प्राक् प्रयोक्तव्यः। कदाचित् आ आदेशोऽपि सम्बोधनैकवचने दृश्यते इति ज्ञेयम्। ये शब्दः सम्बोधनार्थे कुत्रापि Phillot महोदयेन न प्रदर्शितम्।

अकबर् अकबर्हा, अकबरान्
अकबरra
अकबरra अकबर्हारा, अकबराराँ
बा अकबर् } बा अकबर्हा, बा अकबरान्
व अकबर् } व अकबर्हा, व अकबरान्
बराय् अकबर् बराय् अकबरहा, बराय् अकबरान्
अज़् अकबर् अज़् अकबरहा, अज़् अकबरान्
अकबर्रा अकबर्हारा; अकबराराँ
दर् अकबर् दर् अकबर्हा, दर् अकबरान्
अय्, या, ये अकबर् ये अकबरान्

सर्वनाम प्रकरणम्—

सर्वादिशब्दानामादेशमात्रं[1] विशिष्यते। साधनिका तु पूर्ववत्॥

स्यादौ हमः सर्वस्य ॥५६॥

सर्वशब्दस्य हमः इत्यादेशो भवति स्यादिविभक्तौ परतः। पारसीक भाषायामकारान्तशब्दोच्चारणार्थं व्यञ्जनहकारं अर्द्धोच्चरितमन्ते पठन्ति[2]। यथा हमह्। अत्रास्माकं अकारान्त एव पाठः। हम। हमहा।

आन् क्वचिन्न भवति ॥५७॥

हमरा। हमहारा। दर् हम्। दर् हमहा। ये हम। ये हमहा।

स्वस्य खुद् ॥५८॥

स्वशब्दस्य खुद् इत्यादेशो भवति। खुद्। साधनिका तु पूर्ववत्।

अन्यस्य दीगर् ॥५६॥

अन्यशब्दस्य दीगर्[3] इत्यादेशो भवति। दीगर्। दीगर्हा। दीगरान्।

---

१ मात्रमिति घ पुस्तक एव दृश्यते।

२ विशेषविवरणन्तु Phillot कृते ग्रन्थे द्रष्टव्यम्।

३ दिगर इति पाठः आदर्शेऽस्ति।

एसाँ एतदो बहुत्वञ्च ॥६०॥

एतच्छब्दस्य एसाँ इत्यादेशो भवति तस्य बहुवचनान्तत्वञ्च। एसाँ। एसाँरा। बा एसाँ। बराय् एसाँ। अज़् एसाँ। एसाँरा दर् एसाँ।

एतदादेः सम्बोधनाभावः ॥६१॥

अदसः उ ऊन् वा ॥६२॥

अदस् शब्दस्य उ इत्यादेशो भवति ऊन् च वा। उ असावित्यर्थः। पक्षे ऊन् स एवार्थः। उहा, ऊँहा। उरा, ऊँरा। उहारा, ऊँहारा। बा उ, बउ, बा ऊन, ब ऊन। बा उहा, ब उहा, बा ऊँहा, ब ऊँहा। बराय् उ, बराय् ऊन्। बराय् उहा, बराय् ऊँहा। अज़् उ, अज़् ऊन्। अज् उहा अज़् ऊँहा। उरा, ऊँरा। उहारा, ऊँहारा। दर् उ, दर् ऊन्। दर् उहा दर् ऊँहा।

अदस आन् च ॥६३॥

अदस् शब्दस्य आन् आदेशश्च भवति। आन्, आँहा[२], आँहारा इत्यादि।

इदमः ईन् ॥६४॥

इदम् शब्दस्य ईन् इत्यादेशो भवति। ईन, ईँहा,[३] ईँरा, ईँहारा बा ईन्, ब ईन्, बा ईँहा, ब ईँहा, बराय् ईन्, बराय् ईँहा। अज़् ईन्, अज़् ईँहा। ईँरा, ईँहारा। दर् ईन्, दर् ईँहा।

---

१ अत्र Phillot कृतग्रन्थानुसारेण ईशान् आदेश एव सम्यक्। तन्मते अफगान्देशीयैः ईशान् शब्दः एसान् इति उच्चार्यते। तद्देशीयैस्तु एसानान् इत्यपि रूपं प्रयुज्यते। आदर्शानुगतं एसा इति रूपन्तु न Phillot सम्मतम्।

२ आँहा इत्यस्य आनान् इत्यपि वैकल्पिकं रूपं Phillot सम्मतम्।

३ ईँहा इत्यस्य ईनान् इत्यपि वैकल्पिकं रूपं ज्ञेयम्।

किमः के ॥६५॥

किम् शब्दस्य के[1] इत्यादेशो भवति। के, केहा। केरा, केहारा। वा के व के, वा केहा, व केहा। बराय् के, बराय् केहा। अज़् के, अज़् केहा। केरा, केहारा। दर् के, दर् केहा।

युष्मदस्मदोस्तोमन्नेकत्वे शुमामा बहुत्वे ॥६६॥

युष्मदस्मदोरेकवचनेषु तो[2], मन्; बहुवचनेषु शुमा, मा; इत्येते आदेशा भवन्ति यथासङ्ख्यम्।

तो त्वमित्यर्थः मन् अहमित्यर्थः
शुमा यूयमित्यर्थः मा वयमित्यर्थः।

युष्मदस्मदोर्जसो लोपो वक्तव्यः ॥६७॥

अतएव शुमा मा इत्युभयत्र न हा आदेशः। तोरा त्वामित्यर्थः।

मनो न लोपो रा परतः ॥६८॥

मन् इत्यस्य नकारस्य लोपो भवति रा इत्यस्मिन् परे। मरा मामित्यर्थः। शुमारा युष्मानित्यर्थः। मारा अस्मानित्यर्थः। वा तो त्वया इत्यर्थः। वा मन् मया इत्यर्थः।

वा शुमा युष्माभिरित्यर्थः वा मा अस्माभिरित्यर्थः
बराय् तो तुभ्यमित्यर्थः बराय् मन् मह्यमित्यर्थः
बराय् शुमा युष्मभ्यमित्यर्थः बराय् मा अस्मभ्यमित्यर्थः
अज़् तो त्वत् इत्यर्थः अज़् मन् मत् इत्यर्थः
अज़् शुमा युष्मत् इत्यर्थः अज़् मा अस्मत् इत्यर्थः
तोरा तव इत्यर्थः मरा मम इत्यर्थः
शुमारा युष्माकमित्यर्थः मारा अस्माकमित्यर्थः

---

१ पारस्यदेशीयं रूपन्तु कि इति Phillot.

२ पारस्यदेशीयैः तो इत्यस्य तु इत्येव रूपं व्यवह्रियते इति Phillot.

दर् तो त्वयि इत्यर्थः । दर् मन् मयि इत्यर्थः
दर् शुमा युष्मासु इत्यर्थः । दर् मा अस्मासु इत्यर्थः

युष्मदस्मदोरिव पारसीकशब्दानां न लिङ्गनियमः ॥

सर्वादेः सप्तम्या जा ॥६६॥

सर्वादेः परस्याः सप्तम्या जा आदेशो भवति । सर्वस्मिन्निति—सर्वादौ हमः सर्वस्ये (५६ सू०) त्यनेन सर्वस्य हमः आदेशः । अनेन (६६ सू०) सप्तम्या जा । हमजा सर्वत्रेत्यर्थः । अस्मिन्निति इदमः ईन (६६ सू०), अनेन (६६ सू०) जा, ईनजा[1] अत्रेत्यर्थः । अमुस्मिन्निति अदसः उ ऊन वा (६२ सू०) इत्यूनादेशः । उजा, ऊनजा । अदसः आन् च (६३) इति आनूजा अमुत्रेत्यर्थः ।

कस्मिन्निति—

किमः कुजादेशः ॥७०॥

कुजा कुत्रेत्यर्थः । हरिजा चन्दजा इत्यादि ।

हमजादेः पुनः स्यादिर्वक्तव्यः ॥७१॥

हमजा, हमजाहा इत्यादि । हमजारा, हमजाहारा इत्यादि बोद्धव्यम् ।

मर्द शब्दात् सिः—पारसीकात् सेलुक् (४२सू०) मर्द । मर्द जस् इति स्थिते—बहुवचनस्य (४५ सू०) आन् मर्दान् । शेषं पूर्ववत् । मर्दरा । मर्दाँरा । बा मर्द, बा मर्दान् । वराय् मर्द, वराय मर्दान् । अज् मर्द, अज् मर्दान् । षष्ठी द्वितीयावत् । दर् मर्द, दर् मर्दान् । ये मर्द, ये मर्दान् इत्यादि ।

इति श्रीम० श्रीमदकबरशाहकारिते विहारिकृष्णदासमिश्रकृते पारसीकप्रकाशे शब्दप्रकरणम् ॥

---

१ घ पुस्तके ईँजा, ऊँजा, आँजा इति पाठः क्रमशः ईनजा, ऊनजा, आनजा स्थाने वर्त्तते ।

अथाव्ययाः* —

इश्विन, हम्विनी एवार्थे ।	गाहे कदाचिदर्थे ।
हमराह सहार्थे ।	गैर विनार्थे ।
मा, न, ला, वे निषेधार्थे ।	गैरह् अन्यत्रार्थे ।
बा सहार्थे ।	यूद शीघ्रार्थे ।
सही सत्यार्थे ।	जीनहार शरणार्थे ।
हम्[1] अप्यर्थे समानार्थे च ।	निगाह दर्शने ।
हमी, हमीन् एवार्थे ।	निशा निर्नीतबोधे ।
चि किमर्थे ।	चिगून् किमिवार्थे
अन्दक मनागर्थे ।	हम्चु[3] एवमर्थे ।
विसियार् वह्वर्थे ।	कस् कश्चिदित्यर्थे ।
अन्दरून् अन्तरर्थे ।	गुम् तिरोऽर्थे ।
वेरून् वहिरर्थे ।	देर् चिरार्थे ।
अगर् चेदर्थे ।	हाजा[4] प्रत्यक्षार्थे ।
ता तावदर्थे ।	कवूल इत्यङ्गीकारे ।
जुदा पृथगर्थे ।	दी अनन्तरगतदिवसे ।
वाद, वादज पश्चादर्थे ।	परे[5] गतानन्तरदिवसे ।
चरा[2] किमर्थमित्यर्थे ।	परेर् परेद्युरित्यर्थे ।
हमेशह् सदार्थे ।	फर्दा अनन्तरागतदिवसे ।

* अधोलिखितानामव्ययानां अचारणादिकं परिशिष्टे द्रष्टव्यम् ।

१ अत्र क आदर्शे = यथा ई हम् । हमयमान् । हमनिशान् । हमसहरी इति पार्श्वटिप्पण्यां वर्त्तते । घ पुस्तकेऽपि तथैव ।

२ क आदर्शे चिरा इति पाठः ।

३ हमु एवमर्थे इति घ पुस्तके

४ हजा प्रत्यक्षार्थे इति घ पुस्तके ।

५ ख आदर्शे परे इति नास्ति । परन्तु स्थानं रिक्तं वर्त्तते .
पो गतानन्तरदिवसे इति पाठः घ पुस्तके ।

पस फर्दात्[१] द्वितीयदिवसे ।	चन्दान् नानार्थे ।
पार् अनन्तरगतवर्षे ।	हमून्, हमीन् परिच्छेदे ।
परेयार् गतानन्तरवर्षे ।	एहतियाज्, गरज्, मकसूद इत्येते प्रयोजनार्थे ।
दरग्, एहमाल, चिर चिरार्थे ।	वादजा पश्चादर्थे ।*
हा है इत्येतौ शोकपश्चात्तापाद्यर्थे ।	हरि परशब्दार्थव्यक्तीकरणे ।
तौर प्रकारार्थे ।	वदर् निष्कासने ।
वाय् पुनरर्थे ।	दर प्रवेशने ।
याह्[२] विकल्पार्थे ।	शायद् योग्येऽनुमाने च ।
वा चार्थे ।	पारा द्विधार्थे ।
हेचन्[३] किञ्चिदित्यर्थे ।	ईन् साक्षादर्थे ।
नेस्,[४] ने, नास्तीत्यर्थे ।	ऊन् विप्रकृष्टार्थे ।
हस्त अस्तीत्यर्थे ।	खो[७] पाद पूरणे ।
अलवत्तह् अवश्यमित्यर्थे ।	कए कदाचिदर्थे ।
चू[५] कथमित्यर्थे ।	हाला[८] अधुनार्थे ।
कदरि, मेख्दार[६] इत्येतौ परिमाणोल्लेखे ।	लायतन्, मलामत् धिगर्थे ।
चन्द् कियदित्यर्थे ।	

१ पस् फरदा इति घ पुस्तके ।

२ क आदर्शे याः इति विसर्गान्तः पाठः । घ पुस्तकेऽपि ।

३ हेच नकिञ्चिदर्थे इति घ पुस्तके ।

४ नेस्तः ने नास्तीत्यर्थे इति घ पुस्तके ।

५ च कथमित्यर्थे इति घ पुस्तके ।

६ क, ख आदर्शयोः मेष्दार इत्येव लिखितमस्ति । मेकदार इति घ पुस्तके ।

७ आदर्शयोः षो इति वर्त्तते । पो इति घ पुस्तके ।

८ हाल इति घ पुस्तके ।

* द्विरुक्तमेतत् ।

गैरह्	अन्यत्रेत्यर्थे ।	पेस्	पुरत इत्यर्थे ।
[illegible]नहार	कथञ्चिदर्थे ।	मियान्	मध्यार्थे ।
[illegible]आदा	कदाचिदर्थे ।	सलाया	चूर्णीकरणे ।
[illegible]लक्	अनुमाने ।	वुजू	शौचार्थे ।
[illegible]रोग्	मिथ्यार्थे ।	निमाज	नित्यकर्मणि ।
[illegible]स्त	सत्यार्थे ।	गनीमत्	धर्मपूर्वकवस्तुलाभे ।
रोजा	व्रतार्थे ।	अस्	सत्तायाम् ।
पस्	पश्चादर्थे ।	आरे	अङ्गीकारे । इत्यादि ॥

इति श्रीम० श्रीमदकबरशाहकारिते बिहारिकृष्णदासमिश्रकृते पारसीकप्रकाशे अव्ययप्रकरणम् ॥

पारसीकभाषायां स्त्रीप्रत्यया न दृश्यन्ते ॥

अथ कारकप्रकरणम् ॥

लिङ्गार्थे प्रथमा ॥७२॥

संस्कृतवत् पारसीकभाषायां शब्दार्थमात्रे प्रथमाविभक्तिर्भवति । हजरत् शाहे अकबर देर वे मानद्[१] । श्रीअकबरशाहश्चिरं जीवतु इत्यर्थः ।

आमन्त्रणे च ॥७३॥

आमन्त्रणे चाभिमुखीकरणेऽपि प्रथमाविभक्तिः पारसीकभाषायाम् । ये हजरत् शाहे जल्लालदीन् दस्तगीर शव मरा दर दीन व दुनिआ । हे श्रीशाह जल्लालदीन् मम हस्तावलम्बप्रदो भव अमुत्रेह चेत्यर्थः ।

---

१ ख आदर्शेतु हजर साहे अकबर देर वोनाद इत्येव पाठः ।

शेषाः कार्ये साधने दानपात्रे विशेषावधौ सम्बन्ध आधारभावयोः ॥७४॥

शेषाः द्वितीयाद्या विभक्तयः एष्वर्थेषु भवन्ति। कार्ये-कर्मकारके, उत्पाद्ये, आप्ये, संस्कार्ये, विकार्ये च द्वितीया विभक्तिर्भवति। शाहान् शाही शस्तरा मेसायद्। महीमहेन्द्रोऽङ्गुलित्राणं घटयतीत्यर्थः।

पारसीकभाषायां कारके क्वचिद् द्वितीयाया लोपो वक्तव्यः ॥७५॥

अतएव शाहान् शाही शस्त मेसायद् इत्यपि भवति। आलम नाह हजरत आफ्ताबरा मेबीनद्। जगदेकशरण्यः श्रीसूर्य्यं पश्यति इत्यर्थः। शाहजल्लालदीन अज् यदालति[1] खुद् कलियुगरा सत्ययुग कर्द। शाहजल्लालदीनोऽतीवधार्म्मिकः[2]। श्रीमदकबरो निजसुनयप्रतापात् कलियुगं सत्ययुगमकरोदित्यर्थः। हुकुमे आतश् शाहे अकबर दुश्मने जङ्गलरा खाकिस्तर मेकुनद्। शाहअकबरशासनाग्निः शत्रुवनं भस्मसात् करोतीत्यर्थः॥

प्रतिवद् व योगे द्वितीया वक्तव्या ॥७६॥

ब दरबाररा मेरवद्[3]। राजद्वारं प्रतिव्रजतीत्यर्थः॥

साधने करणे च[4] तृतीयाविभक्तिर्भवति ॥७७॥

बा कार्द मेबुरद्, बाकार्द मेबुरद्। छुरिकया छिनत्ति इत्यर्थ इत्यादि।

पारसीकभाषायां कर्त्तरि तृतीया न[5] दृश्यते ॥७८॥

१। उभयत्रादर्श एव अय् यदालति इति वर्त्तते।

२। उभयत्रादर्शे शाहजल्लालदीनोऽतीव धार्म्मिक इति पाठः वर्त्तते परन्तु न ज्ञायते कस्य पारसीकवाक्यस्येदं संस्कृतं रूपमिति। घ पुस्तकेऽपि एवमेव वर्त्तते।

३ खुद दरबाररा मेरवद् इति घ पुस्तके।

४। ख आदर्शे तु साधारणे करणे च इति पाठः।

५ अत्र Phillot कृते ग्रन्थे वाच्ये कर्मणि विषये (P. 285-288) यदुक्तं तद् द्रष्टव्यम्।

नुक्तकर्त्तुरभावात् । उक्ते कर्त्तरि प्रथमाविभक्तिरेव भवति ।

बा योगे तृतीया चतुर्थ्यौ तल्लोपश्च ॥७९॥

बा इत्यस्य योगे तृतीयाचतुर्थ्यौ विभक्ती भवतः । तयोर्विभक्त्योः लोपश्च व्यवस्थया ।

बा इत्यस्य पूर्वनिपातश्च वक्तव्यः ॥८०॥

बा मुर्शिद तालिव[1] मेरवद् । गुरुणा सह शिष्यो गच्छतीत्यर्थः ।

दानपात्रे सम्प्रदानकारके चतुर्थीविभक्तिर्भवति ॥८१॥

हजरत अकबर शाह बा बुजुर्गां खिताब मेदिहद । श्रीअकबरशाहो महद्भ्यः पदवीं ददाति । बा रब्बानी[2] मन्दी मेकुनद् । परमेश्वराय नमस्करोति इत्यर्थः ।

सम्प्रदानकारके सम्बन्धमात्रमपेक्ष्य षष्ठी भवति ॥८२॥

महतां पदवीं ददाति इत्यर्थः ।[3]

निमित्तार्थे चतुर्थी वक्तव्या ॥८३॥

बराय् कारे अकबरशाह सरे खुदरा निगाह् मेदारम् । अकबरशाहकार्य्याय शिर आत्मनः संधारयामीत्यर्थः ।

विश्लेषो विभागस्तत्र योऽवधिश्चलतया अचलतया वा विवक्षितस्तत्रापादाने पञ्चमी ॥८४॥

अज़् अस्प दवान् अफ्ताद् । धावतोऽश्वादपतदित्यर्थः । अज़् दरख्त् बरग् मेअफ्तद् । वृक्षात् पत्रं पततीत्यर्थः ।

भयहेतौ च पञ्चमी वक्तव्या ॥ ८५॥

अज़् दुज्द् मेतरसद् । चौरात् त्रस्यतीत्यर्थः इत्यादि ।

---

१ तालिव इत्यस्य स्थाने क आदर्शे सालिव इति वर्त्तते ।

२ अत्र बा रब्बनियाय इति क पुस्तके, खुनियाय इति च घ पुस्तके दृश्यते !

३ अत्र पारसीकवाक्यन्तु सर्वत्रादर्शे एव नोल्लिखितम् ।

षष्ठ्यर्थे क्वचित्पञ्चमी वक्तव्या ॥ ८६॥

ई" फील अज़् के अस्? अज़् अकबरशाह इत्यादि। अयं हस्ती कस्यास्ति इति प्रश्ने अकबरशाहस्येत्यर्थः।

सम्बन्धे षष्ठी ॥८७॥

हुकुम् शाहरा। आज्ञाराज्ञ इत्यर्थः।

आधारे सप्तमी ॥८८॥

पञ्चविधमधिकरणम्। औपश्लेषिकम्, सामीपिकम्, अभिव्यापकम्, वैषयिकम्, औपचारिकञ्चेति। फकीर दर् बोरिआ मेख्वाबद्। दीनः कटे शेते इत्यर्थः। दर् वाग मेख्वाबद्। आरामे शेते इत्यर्थः। दर् कुञ्जिद् रोगन् हस्त्। तिले तैलमस्ति इत्यर्थः। वर् सरे अङ्गुस्त सद् फील मेरवद। अङ्गुल्यग्रे करीणां शतं गच्छतीत्यर्थः। एवं वर् अस्प मेरवद्। वर् दीवार् मेरवद्।

अत्र प्रकरणे ज्ञेया विवक्षैव वलीयसी।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥
उक्तस्यार्थस्य गृह्णन्ति सङ्ख्यानं त्यादयः परम्।
लिङ्गसङ्ख्याविभक्तीस्तु कृत्तद्धितसमासजाः॥

यथा—शाह आफ्ताबरा मेबीनद्। महीमहेन्द्रः सूर्यं पश्यति। शाहान् आफ्ताबरा मेबीनन्द। राजानः सूर्यं पश्यन्तीत्यर्थः। पारसीके कर्मण्याख्यात प्रत्ययो न दृश्यते॥

इतिम० श्रीमदकबरशाहकारिते बिहारिकृष्णदासमिश्रकृते पारसीकप्रकाशे कारकप्रकरणम्॥

अथ समासप्रकरणम्॥

समासश्चान्वये नाम्नाम् ॥८९॥

नाम्नां अन्वययोग्यत्वे सत्येव समासो भवति। स च षडविधः। अव्ययीभावस्तत्पुरुषोद्वन्द्वोबहुव्रीहिः कर्मधारयोद्विगुश्चेति।

तत्र पूर्वेऽव्ययेऽव्ययीभावः समासो भवति ॥६०॥

बा क़दूरि कुदूरति मेदिहद्। यथाशक्ति ददातीत्यर्थः। जाय् बेमगस्। निर्मक्षिकं स्थानमित्यर्थः।

समासे प्रत्यययोः ॥६१॥

समासे वर्त्तमानायाः विभक्तेः प्रत्यये च परे लुग् भवति[१]।

अमादौ तत्पुरुषः ॥६२॥

द्वितीयाद्यन्ते पूर्वपदे सति तत्पुरुषसंज्ञकः समासो भवति। अकबर शाहरा हुकुम् हुकुमे[२] अकबर शाह। विशेषणं पूर्वं निपतति इत्यादि यथालाभं प्रयोज्यमिति।

पारसीकभाषायां द्वन्द्वसमासो न दृश्यते ॥६३॥

सङ्ख्यापूर्वः समासो द्विगुर्वक्तव्यः ॥६४॥

हफ्ताँरा नामाँरा समाहारः हफ्तनामह्[३] सप्तर्षय इत्यर्थः। यक्कस् आदम्। दूकस् मर्द, इत्यादि ज्ञेयम्।

बहुव्रीहिरन्यार्थे ॥६५॥

अन्यपदार्थे प्रधाने यः समासः स बहुव्रीहिसंज्ञो भवति। नेक् यमल् यस्य स[४] नेकयमल् सुकर्म्मेत्यर्थः। बद् फयल् यस्य स बद्फयल् दुष्कर्मेत्यर्थः। पाक् मामलह् यस्यासौ पाकमामलह् पवित्रव्यवहार इत्यर्थः। पुर् जर्[५] यस्मिन् तत् पुर्जर् खानह. पूर्णधनं गृहमित्यर्थः। पूर् मेवह् ईँ दरख्त् बहुफलो वृक्ष इत्यर्थः इत्यादि ज्ञेयम्।

---

१ सूत्रार्थोऽस्पष्टः। प्रत्यये च परे इत्यस्य प्रयोजनं न प्रदर्शितम्।

२ हुकुमे अकबरशाह इत्यत्र एकारागमो तृतीय सूत्रानुसारेणेति मन्तव्यम्।

३ क आदर्शे हफ्तानां समाहारः हफ्तनामह् इत्यस्ति। हफ्त सितारानां (मां) समाहारः हफ्तनामंद इति घ पुस्तके।

४ क आदर्शे तु केवलं नेक् यमल् सुकर्मेत्यर्थः इत्यस्ति।

५ क आदर्शे तु पुर् धन् यस्मिन्निति वर्त्तते। ख आदर्शे च पुरुजर्खानह् इति विद्यते।

कर्मधारयस्तुल्यार्थे ॥९६॥

पदद्वये तुल्यार्थे[१] एकार्थनिष्ठे सति कर्मधारयः समासो भवति । शाहश्चासावकबरश्चेति शाहयकबर् अकबरशाह ।

क्वचिद्विशेषणस्य पूर्वनिपातो वक्तव्यः ॥९७॥

नेक चासौ मर्दश्चेति नेकमर्द साधुपुरुष इत्यर्थे इत्यादि यथा सम्भवं ज्ञेयमिति ।

अत्यादरे द्वित्वं वक्तव्यम् ॥९८॥

आलम् आलम् । फौज् फौज् इत्यादि[२] वीप्सा ज्ञेया ।

इति श्रीम० श्रीमदकबरशाहकारिते विहारिकृष्णदासमिश्रकृते पारसीकप्रकाशे समासप्रकरणम्

अथ तद्धितप्रकरणं निरूप्यते ॥

अपत्ये जादह्[३] ॥९९॥

नाम्नोऽपत्येऽर्थे जादह् प्रत्ययो भवति पारसीकभाषायाम् । शाहस्यापत्यम् शाहजादह् । खानस्यापत्यम् खानजादह् । शेखस्यापत्यम् शेखजादह् । सैयदस्यापत्यम् सैयद्जादह् । अशीलस्यापत्यम् अशीलजादह् । बुजरुकस्यापत्यम् बुजरुकजादह् । आदमीजादह् इत्यादि ।

तत्र जाते डी ॥१००॥

नाम्नो डी प्रत्ययो भवति तत्र जात इत्यर्थे पारसीकभाषायाम् । काबुले जातः काबुली । माहरनहरे जातः माहरनहरी । कन्धारे[४] जातः कन्धारी ।

---

१ पदद्वये तु एकार्थ निष्ठे सति इति घ पुस्तके ।

२ फौज् फौज् इत्यादरे वीप्सा ज्ञेया इति घ पुस्तके ।

३ उभयत्रादर्शे यादह् इति प्रत्ययस्वरूपम् ।

४ क आदर्शे तु मावरनहरे जातः मावरनहरी इति वर्त्तते । कन्धार इत्यत्र गंधार इति घ पुस्तके ।

रूमे जातः रूमी । अरबे जातः अरबी । यजमे जातः यजमी[१] । आमुले जातः आमुली । वल्खे जातः वल्खी । फेरङ्गे जातः फेरङ्गी । चीने जातः चीनी । हिन्दुस्ताने जातः हिन्दुस्तानी । खुरासाने जातः खुरासानी । एवं आबी, जङ्गली, हमसहरी, इत्यादि ।

क्वचित्तेन प्रयुक्तो धर्मोऽस्येत्यर्थे डी वक्तव्यः ॥१०१॥

मुहम्मदेन प्रयुक्तो धर्म्मोऽस्य मुहम्मदी । दाउदेन प्रयुक्तो धर्म्मोऽस्य दाउदी ।

क्वचिद् डी परे आयागमो वक्तव्यः ॥१०२॥

ईशा प्रयुक्तो धर्म्मोऽस्य ईशायी । मुशा प्रयुक्तो धर्म्मोऽस्य मुशायी ।

क्वचिद् भावे डी ॥१०३॥

मुस्सल्मानस्य भावः मुस्सल्मानी । एवं काफिरी, तरी, खुस्की, नर्मी, (नमी ?) सख्ती, दुरुश्ती इत्यादि ।

अस्त्यर्थे स्तान् ॥१०४॥

नाम्नोऽस्त्यर्थे स्तान् प्रत्ययो भवति पारसीकभाषायाम् । गुलं विद्यतेऽत्र गुलिस्तान् पुष्पस्थानमित्यर्थः ।

क्वचिदिकारागमो वक्तव्यः ॥१०५॥

वागिस्तान्[२], हिन्दूस्तान्, कोहस्तान्, वोस्तान् इत्यादि ।

तस्येदमिति डीः ॥१०६॥

अकबरस्यायम् अकबरी । अकबरशाही ।

तत्करोतीत्यण् ॥१०७॥

नाम्नोऽण् प्रत्ययो भवति तत्करोतीत्यर्थे पारसीकभाषायाम् ।

अणि पूर्वस्वरस्याकारो मध्यमस्वरस्येकारो वक्तव्यः ॥१०८॥

---

१ जजमे जातः जजमी जामुले जातः जामुली इति घ पुस्तके ।

२ । पूर्वसूत्रोदाहरणेऽपि इकारागमो द्रष्टव्यः ।

अदलं करोतीति आदिलः। जुलुमं करोतीति जालिमः। शुकुरं करोतीति शाकिरः[१]। यमलं करोतीति यामिलः। हुकुमं करोतीति हाकिमः। सिज्दं करोतीति साजिदः।

क्वचिदकारागमो वक्तव्यः ॥ १०९॥

नुत्कं करोतीति नातिकः। सम्तं करोतीति सामितः। सुकूनं (तं ?) करोतीति साकितः।

तद्वेत्ति तं प्राप्त इत्यर्थे चाण् ॥ ११०॥

एलिमं वेत्ति आलिमः। कमालं प्राप्तः कामिलः। वुजूगं प्राप्तः वालिगः।

क्वचिदीकारो मध्यमस्वरस्य ॥१११॥

करमं करोतीति करीमः अनुग्राहक इत्यर्थः।

क्वचिन्नात्वं पूर्वस्य ॥११२॥

रहीमः दीनदयापर इत्यर्थः। एवं सिद्दीकः। सिद्कं (सिदुकं ?) करोतीति। पक्षे सादिकः। एवं शरीफ इत्यादि।

रक्षतीत्यर्थे वान् ॥११३॥

नाम्नो वान् प्रत्ययो भवति रक्षतीत्यर्थे पारसीकभाषायाम्। आहू रक्षतीति आहूवान् मृगरक्षक इत्यर्थः। दरं रक्षतीति दरवान् द्वारपालक इत्यर्थः। फीलं रक्षतीति फीलवान् हस्तिपक इत्यर्थः। गावं रक्षतीति गाववान् गोरक्षक इत्यर्थः। वागं रक्षतीति वागवान् आरामरक्षक इत्यर्थ इत्यादि ज्ञेयम् ॥

अस्त्यर्थे मन्द् ॥११४॥

नाम्नोऽस्त्यर्थे मन्द् प्रत्ययो भवति पारसीकभाषायाम्। दौलत्[२] विद्यतेऽस्य दौलतमन्द्। शयादत्मन्द् भाग्यवान् इत्यर्थः। दानिशमन्द्[३]। हुनरमन्द्।

१। शुकुरं......यामिलः इति नास्ति क पुस्तके।

२। आदर्शत्रयेऽपि दौलति, शयादति इति लिखितमस्ति।

३। दानशमन्द इति घ पुस्तके।

क्वचित्तेन निर्मिते डीः ॥११५॥

गिलेन निर्मितो गिली। खाकेन निर्मितः खाकी। बादेन निर्मितः बादी। आतशेन निर्मितः आतशी। नूरेण निर्मितः नूरी। एवं आहनी, चोबी इत्यादि।

नूरादानीश्चोपलक्षिते ॥११६॥

नूरेणोपलक्षितः नूरानी।

गुनाहाद् गार् कृतवानित्यर्थे ॥११७॥

गुनाहं कृतवान् गुनाह्गार।

आत् समूहे ॥११८॥

जमादानां समूहः जमादात्। एवं नवादात्। हैवानात्

आति सैयदादीनां सादादिर्वक्तव्यः ॥११९॥

सादात्।

तत्साधयतीति गर् ॥१२०॥

आहनं साधयतीति आहन्गर। जर साधयतीति जरगर। एवं दुरोद्गर सितम्गर[1]।

तद्विक्रीणातीति फरोश् ॥१२१॥

सवुर्जी विक्रीणातीति सवुजीफरोश्। एवं कोहन्फरोश्, चोबूफरोश् इत्यादि।

तद्धारयतीति दान् ॥१२२॥

निमक् धारयतीति निमक्दान्। अयनक्दान्।

---

१ सितम्गर इति नास्ति घ पुस्तके।

(कृतवानित्यर्थे) संगादेस्तराश्[1] ॥१२३॥

संगतराश्[2], वुत्तराश्, चोबतराश्, चम्चतराश्[2] इत्यादि।

अल्पार्थे चह्[3] ॥१२४॥

अल्पार्थे चह् प्रत्ययो भवति। सिन्दूकचह्। परवान्चह्। देग्चह्।

अल्पतुच्छनिन्दार्थे कः ॥१२५॥

यनक्। रिन्दक्। मर्दक्[4]।

आलमः पनाहे ॥१२६॥

आलमपनाह्।

प्रकर्षे तर् ॥१२७॥

नाम्नः प्रकर्षेऽर्थे तर प्रत्ययो भवति पारसीकभाषायाम्। अतिशयेन देर् देरतर। एवं जूदतर शीघ्रतरमित्यर्थः। खूबतर। बदतर। मुलायमतर। सबुकतर इत्यादि।

मुर्दादार् स्वयं मृते ॥१२८॥

मुर्दार् इत्यादि यथादर्शनं तद्धितप्रत्यया विधेयाः।

इति श्रीम०श्रीमदकबरशाहकारिते
विहारिकृष्णदासमिश्रकृते पारसीकप्रकाशे
तद्धितप्रकरणम् ॥

---

१ तरश् इति प्रत्ययस्वरूपमुभयत्रैवादर्शे दृश्यते परन्तु उदाहरणे तराश् इति वर्त्तते अतः अस्माभिः तराश् इत्येव गृहीतम्। कृतवानित्यर्थे इति नास्ति आदर्शेषु परन्तु घ पुस्तके कृतवानित्यर्थः इति असङ्गतं किमपि लिखितमस्ति। मया यथामति स्थापितम्।

२ ख आदर्शे तम्बतराश् इति, क आदर्शे तु यथामुद्रितः पाठो दृश्यते।

३ क आदर्शे च इत्येव प्रत्ययस्वरूपं वर्त्तते। उदाहरणे तु चह् इति। अतः चह् इति ख आदर्शानुगतं स्वरूपं गृहीतम्।

४ ईनक्। जनक्। रिन्दक्। मर्दक् इति घ पुस्तके।

॥ श्री सूर्याय नमः ॥

अथ आख्यातप्रकरणं निरूप्यते—

पारसीकभाषायां भ्वादय एव धातवः। तेषामेव आदेशेन रूपान्तरापत्तिः। तिबादय एव विभक्तयः। तत्रापि वर्त्तमानार्थे तिबादयः। पारसीकभाषायां शब्दानामिव धातूनामपि द्विवचनाभावः। तिप्, अन्ति; सिप्, थ; मिप्, मस्। आत्मनेपदश्च न दृश्यते। प्रथममध्यमोत्तमत्वञ्च द्वयोर्द्वयोरेव वचनयोर्बोद्धव्यमिति। विधिसम्भावनयोः यात्, युस्; यास्, यात; याम्, याम। आशीः प्रेरणयोः तुप्, अन्तु; हि, त; आनि, आम। अतीतकालार्थे एका ह्यस्तन्येव बोद्धव्या, तस्यामेवाद्यतनीपरोक्षयोरन्तर्भावात्। ह्यस्तनी यथा-दिप्, अन्; सिप्, त; अमप्, म। क्रियातिपतने क्रियातिपत्तिः। स्यत्, स्यन्; स्यस्, स्यत; स्यम्, स्याम। पारसीकभाषायां श्वस्तनी च न दृश्यते। तस्या भविष्यन्त्यामेवान्तर्भावात्। भविष्यन्ती यथा—स्यति, स्यन्ति; स्यसि, स्यथ; स्यामि, स्यामस्। आशिषि आशीः। यात्, यासुस्; यास्, यास्त; यासम्, यास्म। तेषां तिबादीनां षण्णां वचनानां द्वयोर्द्वयोः प्रथममध्यमोत्तमपुरुषसंज्ञा। तत्र नाम्नि प्रयुज्यमाने चाप्रयुज्यमाने प्रथमः पुरुषो भवति। तथा युष्मदि मध्यमः। तथैवास्मद्युत्तमः।

अथ भ्वादेर्धातोस्तिबादयः प्रत्यया योज्यन्ते —

भुवोधातोः शवद् वर्त्तमानादौ पारसीकभाषायाम् ॥१२९॥

भूधातोः शवद् इत्यादेशो भवति वर्त्तमानादिविभक्तौ परतः पारसीकभाषायां वाच्यायां[1] सत्याम्। भूतिप् इति स्थिते—अनेन (१२९) सूत्रेण भूधातोः शवद् आदेशः।

तिवादेर्मेऽस्य पूर्वनिपातश्च ॥१३०॥

तिबादेः प्रत्ययस्य मे इत्यादेशो भवति तस्य पूर्वनिपातश्च। मे शवद् भवतीत्यर्थः। पारसीकभाषायां द्विवचनाभावः। भू अन्ति इति स्थिते शवद् आदेशः अन्ति इत्यस्य मे आदेशः पूर्वनिपातश्च।

---

१ वाच्यायां इति नास्ति ख आदर्शे।

दस्य नम् वहुत्वे प्रथमपुरुषस्य ॥१३१॥

धातोर्दकारस्य नम् इत्यागमो भवति प्रथमपुरुषस्य वहुत्वे सति

मिदन्तगात् स्वरात् परो वक्तव्यः ॥१३२॥

मे शवन्द भवन्तीत्यर्थः।

दस्य डीः सिपि ॥१३३॥

धातोर्दस्य डीरित्यादेशो भवति सिपि प्रत्ययविषये। डिति टेर्लोपो भवति। मे शवी भवसीत्यर्थः।

अस्योपधाया एर्मध्यमोत्तमवहुवचने ॥१३४॥

धातोरुपधाया अकारस्य एरित्यादेशो भवति मध्यमपुरुषोत्तमपुरुषयोर्वहुवचनविषये। मे शवेद्[1] भवथेत्यर्थः।

दस्य मश्चोत्तमे ॥१३५॥

धातोर्दकारस्य म इत्यादेशो भवति उत्तमपुरुषविषये[1]। अकार उच्चारणार्थः। मे शवम् भवामीत्यर्थः। मे शवेम् भवाम इत्यर्थः।

पारसीकभाषायामात्मनेपदाभावः। पारसीकभाषायां मेशवद् गच्छतीति भूधातुं गमनार्थमपि पठन्ति।

यादादेर्मेबायद् तस्य पूर्वनिपातश्च ॥१३६॥

यादादेः प्रत्ययस्य मेबायद्[2] इत्यादेशो भवति। तस्य पूर्वनिपातश्च। चकारात् आशिषश्च यादादेर्मेबायद् आदेशः। मेबायद् शवद् भवेदित्यर्थः। मेबायद् शवन्द्।

मेबायदः सुमागमो दस्य तादेशश्च मध्यमोत्तमयोः ॥१३७॥

यास्यपि दस्य डी वक्तव्यः ॥१३८॥

मेबायस्त शवी, मेबायस्त शवेद, मेबायस्त शवम्; मेबायस्त शवेम्।

---

१ क आदर्शे तु मेशवेद् इत्यारभ्य परसूत्रविवरणस्थ उत्तमपुरुषविषये इत्यन्तः पाठः नास्ति।

२ एतत्प्रत्ययमधिकृत्य वक्तव्यादिकं भूमिकायां द्रष्टव्यम्।

तुबादेर्लोपो बे च वा ॥१३६॥

धातोः परस्य तुबादेः प्रत्ययस्य लोपो भवति वा। बे इत्यादेशोऽपि। तस्य पूर्वनिपातश्च। शवद्, बेशवद्; शवन्द्, बेशवन्द्।

हौ दलोपो वक्तव्यः ॥१४०॥

शव्, बेशव्; शवेद्, बेशवेद्; शवम्, बेशवम्; शवेम्, बेशवेम् इत्यादि।

भुवः शुद भूतार्थे ॥१४१॥

भुवः शुद इत्यादेशो भवति भूतार्थे।

शुदादेर्दिपो लोपो वक्तव्यः ॥१४२॥

शुद् अभवदित्यर्थः।

भूतेऽन्तोदगागमो वक्तव्यः[1] ॥१४३॥

शुदन्द् अभवन्नित्यर्थः।

सिप ई भूतार्थे ॥१४४॥

धातोः परस्य सिपः प्रत्ययस्य ईरित्यादेशो भवति भूतार्थे। शुदी अभव इत्यर्थः।

पस्ते तस्य दः ॥१४५॥

धातोः परस्य ए इत्यागमो भवति ते परे। तस्य दश्च। दकारस्य अकार उच्चारणार्थः। शुदेद् अभवतेत्यर्थः। शुदम् अभवमित्यर्थः।

एमें भूते मस्यालोपश्च ॥१४६॥

धातोः ए इत्यागमो भवति मकारे परे मकारस्य अकारलोपश्च भूतेऽर्थे। शुदेम् अभवामेत्यर्थः।

क्रियातिपत्त्यास्तु धातोर्भूतवदादेशो विभक्ते (स्यपो ?) में पूर्वनिपातश्च ॥१४७॥

मेशुद्। अगर् खिज्मति बुजुरूकाँरा मे कर्द बुजुरुक मे शुद्। चेन्महतां सेवामकरिष्यत् महानभविष्यदित्यर्थः। मेशुदन्द इत्यादि।

---

१ अन् प्रत्ययस्य दक् आगमो भवति। तेन शुदद् इति जाते दस्य नम् इत्यादिना शुदन्द् इति सिद्धम्।

भविष्यतः ख्वाहदोऽस्य पूर्वनिपातो धातुवत्कार्यञ्च ॥१४८॥

भविष्यत् प्रत्ययस्य ख्वाहद् इत्यादेशो भवति। तस्य पूर्वनिपातश्च। धातोर्यत् कार्यमुक्तं तत् तस्यैव स्यात्। केषाञ्चिन्मते खाहद् इति।

भविष्यति भूतवदादेशः ॥१४६॥

धातोर्भूतार्थे य आदेशः स एव भविष्यत्यर्थे च स्यात्। अनेन (१४६ सू०) भूधातोः शुदादेशः, स्यतिपः (१४८ सू०) ख्वाहदादेशः। तस्य पूर्वनिपातश्च। ख्वाहद् शुद भविष्यतीत्यर्थः। दस्य नम् बहुत्वे प्रथमपुरुषस्य (१३१ सू०) इत्यनेन ख्वाहदो दकारस्य नमागमः। ख्वाहन्द् शुद् भविष्यन्तीत्यर्थः। ख्वाही शुद् भविष्यसीत्यर्थः। ख्वाहेद् शुद् भविष्यथेत्यर्थः। ख्वाहम् शुद् भविष्यामीत्यर्थः। ख्वाहेम् शुद भविष्याम इत्यर्थः।

धातोर्यादादेर्मेबायदोऽस्य पूर्वनिपातश्च तथात्वे[1] ॥१५०॥

आशिषि यादादिषु दिवादि[2]र्वक्तव्यः ॥१५१॥

मेबायद् शुद् भवितुमर्हतीत्यर्थः। मेबायद् शुदन्द्। मेबायदः सुमागमो दस्य तादेशश्च मध्यमोत्तमयोः (१३७ सू०)। मेबायस्त् शुदी, मेबायस्त् शुदेद्, मेबायस्त् शुदम्, मेबायस्त् शुदेम्[3] इत्यादि ज्ञेयम् इति केचित्।

अस् भुवि—

असो हस्त ॥१५२॥

अस् भुवि इति धातोः हस्त् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्।

हस्तस्तिपो लोपो वक्तव्यः ॥१५३॥

हस्त् अस्तीत्यर्थः। हस्त् अन्ति इति स्थिते—

---

१ तथात्वे इति नास्ति घ पुस्तके।

२ दिवादिः ह्यस्तनीविभक्तयः इत्यर्थः।

३ मेबायदस्त शुदी मेबायदस्तशुदेद मेबायदस्तशुदेम् इत्यादि ज्ञेयम् इति घ पुस्तके पाठः।

हस्तोऽन्ते स्तेर्द्ः[1] ॥१५४॥

हस्त् इत्यस्मात् परस्य अन्ति इत्यस्य तेर्दकारादेशो भवति पारसीक भाषायाम् । हस्तन्द् सन्तीत्यर्थः ।

हस्तः सिपो डी वक्तव्यः ॥१५५॥

हस्ती असीत्यर्थः ।

हस्तस्थस्यैद् ॥१५६॥

हस्त् इत्यस्मात् परस्य थ प्रत्ययस्य एद् इत्यादेशो भवति । हस्तेद् स्थ इत्यर्थः ।

हस्तो मिपो मादेशो वक्तव्यः ॥१५७॥

हस्तम् अस्मीत्यर्थः

हस्तो मस एम् वक्तव्यः ॥१५८॥

हस्तेम् स्म इत्यर्थ इत्यादि ।

असो बूद् भूतार्थे[2] ॥१५९॥

अस् भुवीति धातोर्बूद् इत्यादेशो भवति भूतार्थे । अस् दिप इति स्थिते अनेन १५९ सू०) बूदादेशः, शुदादेर्दिपो लोपो वक्तव्यः (१४२ सू०) बूद् आसीदित्यर्थः । बूदन्द आसन्नित्यर्थः । सिप ई भूतार्थे (१४४ सू०) बूदी आसीदित्यर्थः । एस्ते तस्य दः (१४५ सू०) बूदेद् । बूदम् आसमित्यर्थः । एमें भूते मस्यालोपश्च (१४६ सू०) बूदेम् आस्मेत्यर्थः । क्रियातिपत्यास्तु भूतवदादेशो विभक्तेर्मे पूर्वनिपातश्च (१४७सू०) मे बूद् अभविष्यत्, मे बूदन्द्, मे बूदी, मे बूदेद्, मे बूदम् मे बूदेम् । भविष्यतः ख्वाहदोऽस्य पूर्वनिपातो धातुवत्कार्यञ्च (१४८ सू०) । भविष्यति भूतवदादेशः

---

१ अत्र घ पुस्तकपाठस्तु बोधानर्हः

२ अत्र घ पुस्तकपाठः बोधानर्हः ।

(१४६ सू०) ख्वाहद् बूद् भविष्यतीत्यर्थः। ख्वाहन्द बूद् भविष्यन्तीत्यर्थः। ख्वाही बूद् भविष्यसीत्यर्थः। ख्वाहेद् बूद् भविष्यथेत्यर्थः। ख्वाहम् बूद् भविष्यामीत्यर्थः[१]। ख्वाहेम् बूद् भविष्याम इत्यर्थः। मेवायद् बूद्। इत्यादि पूर्ववत्।

डु पच श पाके—

पचः पज़द्[२] ॥१६०॥

पच्धातोः पज़द् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। पूर्ववत् साधनिका। मे पज़द् पचतीत्यर्थः। मे पज़न्द् पचन्तीत्यर्थः। मे पज़ी पचसीत्यर्थः। मे पज़ेद् पचथेत्यर्थः। मे पज़म् पचामीत्यर्थः। मे पज़ेम् पचाम इत्यर्थः। यादादौ मेवायद् पज़द् इत्यादि। तुवादौ—पज़द्, बेपज़द्। हौ—पज़् बेपज़्, इत्यादि

पुख्त् भूतार्थे ॥१६१॥

पच्धातोः पुख्त् इत्यादेशो भवति भूतार्थे पारसीकभाषायाम्। पूर्ववत् साधनिका। पुख्त् अपचदित्यर्थः। पुख्तन्द् अपचन्नित्यर्थः। पुख्ती अपच इत्यर्थः। पुख्तेद् अपचतेत्यर्थः। पुख्तम् अपचमित्यर्थः। पुख्तेम् अपचामेत्यर्थः। क्रियातिपत्यान्तु - मे पुख्त् अपक्ष्यदित्यर्थः। भविष्यत्काले तु ख्वाहद् पुख्त् पक्ष्यतीत्यर्थः। ख्वाहन्द पुख्त् पक्ष्यन्तीत्यर्थः। ख्वाही पुख्त् पक्ष्यसीत्यर्थः। ख्वाहेद पुख्त् पक्ष्यथेत्यर्थ। ख्वाहम् पुख्त् पक्ष्यामीत्यर्थः। ख्वाहेम् पुख्त् पक्ष्याम इत्यर्थः। मेवायद् पुख्त् पूर्ववत्।

दृशिर प्रेक्षणे—(इरनुबन्धः)

दृशो बीनद् ॥१६२॥

दृशिर् प्रेक्षणे इत्यर्थस्य धातोः बीनद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेबीनद् पश्यतीत्यर्थः। मेबीनन्द् पश्यन्तीत्यर्थः। मेबीनी

---

१ ख्वाहन्द बूद भविष्यामीत्यर्थः इति घ पुस्तके।

२ पचः पयद् इति आदर्शपुस्तकेषु। एवमग्रेऽपि सर्वत्र पयद् इत्येवाकारो दृश्यते।

पश्य ीत्यर्थः। मेबीनेद् पश्यथेत्यर्थः। मेबीनम् पश्यामीत्यर्थः। मे बीनेम् पश्याम इत्यर्थः। मेबायद् बीनद् पश्येदित्यर्थ इत्यादि। बीनद् पश्यतु इत्यर्थः। हौ—बीन्, बेबीन् पश्येत्यर्थः।

दीद् भूतार्थे॥१६३॥

दृशिर् प्रेक्षणे इत्यर्थस्य धातोः दीद् इत्यादेशो भवति भूतार्थे। दीद् अपश्यदित्यर्थः। दीदन्द् अपश्यन्नित्यर्थः। दीदी अपश्य इत्यर्थः। दीदेद् अपश्यतेत्यर्थः। दीदम् अपश्यमित्यर्थः। दीदेम् अपश्यामेत्यर्थः। क्रियातिपत्त्यान्तु—मेदीद् अद्रक्ष्यदित्यर्थ इत्यादि। भविष्यत्काले पूर्ववत् साधनिका। ख्वाहद् दीद् द्रक्ष्यतीत्यर्थः। ख्वाहन्द् दीद् द्रक्ष्यन्तीत्यर्थः। ख्वाही दीद् द्रक्ष्यसीत्यर्थः। ख्वाहेद दीद् द्रक्ष्यथेत्यर्थः। ख्वाहम् दीद् द्रक्ष्यामीत्यर्थः। ख्वाहेम दीद् द्रक्ष्याम इत्यर्थः। मेबायद् दीद् इत्यादि पूर्ववत्।

श्रु श्रवणे—

शृणोतेः शिनवद्॥१६४॥

श्रु श्रवणे इत्यस्य धातोः शिनवद् इत्यादेशो भवति व० पा०[1]। क्वचित् शुनवद्। साधनिका पूर्ववत्। मेशिनवद् शृणोतीत्यर्थः। मेशिनवन्द् शृण्वन्तीत्यर्थः। मेशिनवी शृणोषीत्यर्थः। मेशिनवेद् शृणुथेत्यर्थः। मेशिनवम् शृणोमीत्यर्थः। मेशिनवेम् शृणुम इत्यर्थः। यादादौ—मेवायद् शिनवद् शृणुयादित्यर्थः। तुबादौ—शिनवद्, बेशिनवद् शृणोतु इत्यर्थः। हौ-शिनव, वेशिनव शृणु इत्यर्थः।

---

१ व० पा० इति वर्त्तमानादौ पारसीकभाषायाम् इत्यस्य संक्षिप्तं रूपं द्वितीयादर्शे।

शिनीद् भूतार्थे[1] ॥१६५॥

श्रु श्रवण इत्यस्य धातोः शिनीद् इत्यादेशो भवति भूतार्थे पा०[2]। क्वचित् शुनीद् क्वापि शुनूद्, शनीद् इत्यपि च क्वचित्[3]। शिनीद अश्रृणोदित्यर्थः। शिनीदन्द अश्रृण्वन्नित्यर्थः। शिनीदी अश्रृणोरित्यर्थ। शिनीदेद् अश्रृणुतेत्यर्थः। शिनीदम् अश्रृणवमित्यर्थः। शिनीदेम् अश्रृणुमेत्यर्थः। क्रियातिपत्त्यान्तु मेशिनीद अश्रोष्यदित्यर्थः। भविष्यत्काले पूर्ववत्। ख्वाहद् शिनीद श्रोष्यतीत्यर्थः। ख्वाहन्द शिनीद श्रोष्यन्तीत्यर्थः। ख्वाही शिनीद श्रोष्यसीत्यर्थः। ख्वाहेद् शिनीद् श्रोष्यथेत्यर्थः। ख्वाहम् शिनीद् श्रोष्यामीत्यर्थः। ख्वाहेम् शिनीद् श्रोष्याम इत्यर्थः। मेबायद् शिनीद इत्यादि पूर्ववत्।

घ्रा गन्धग्रहणे—

घ्रो वोयद् ॥१६६॥

घ्रा गन्धग्रहण इत्यस्य धातोः वोयद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेवोयद् जिघ्रतीत्यर्थः। मेबोयन्द जिघ्रन्तीत्यर्थः। मेबोयी जिघ्रसीत्यर्थः। मेवोयेद् जिघ्रथेत्यर्थः। मेवोयम् जिघ्रामीत्यर्थः। मेवोयेम् जिघ्राम इत्यर्थः। मेबायद् वोयद् जिघ्रेदित्यर्थः। बोयद् जिघ्रतु इत्यर्थ इत्यादि।

बोयीद् भूतार्थे ॥१६७॥

घ्रा धातोः बोयीद् इत्यादेशो भवति भूतार्थे पा०। बोयीद् अजिघ्रदित्यर्थः। बोयीदन्द अजिघ्रन्नित्यर्थः। बोयीदी अजिघ्र इत्यर्थः। बोयीदेद् अजिघ्रतेत्यर्थः। बोयीदम् अजिघ्रमित्यर्थः। बोयीदेम् अजिघ्रामेत्यर्थः। क्रियातिपत्त्यां मे बोयीद् अघ्रास्यदित्यर्थः। भविष्यत्काले ख्वाहद् बोयीद् घ्रास्यतीत्यर्थः। ख्वाहन्द बोयीद् घ्रास्यन्तीत्यर्थः। ख्वाही बोयीद् घ्रास्य-

---

१ शनीद भूतार्थे इति घ पुस्तके।

२ पा० इति पारसीकभाषायाम् इत्यस्य संक्षिप्तं रूपं ज्ञेयं। एवं सर्वत्र।

३ शनीद इत्यपि च क्वचित् इति घ पुस्तके पाठः।

सी,यर्थः। ख्वाहेद् बोयीद् घ्रास्यथेत्यर्थः। ख्वाहम् बोयीद् घ्रास्यामीत्यर्थः। ख्वाहेम् बोयीद् घ्रास्याम इत्यर्थः। मेबायद् बोयीद् पूर्व्ववत्॥

ब्रूञ् व्यक्तायां वाचि —

ब्रूञो गोयद्॥ १६८॥

ब्रूञो धातो र्गोयद् आदेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेगोयद् ब्रवीतीत्यर्थः। मेगोयन्द ब्रुवन्तीत्यर्थः। मेगोयी, मेगोयेद्, मेगोयम्, मेगोयेम्, मेबायद् गोयद्। गोयद्।

बेर्बो पारसीकभाषायाम्॥ १६९॥

बोगोयद्।

भूतार्थे गुफ्त॥ १७०॥

ब्रू धातो गुफ्त इत्यादेशो भवति भूतार्थे पारसीकभाषायाम्। गुफ्त अब्रवीदित्यर्थः। गुफ्तन्द, गुफ्ती, गुफ्तेद्, गुफ्तम्, गुफ्तेम्। क्रियातिपत्त्याम्—मेगुफ्त इत्यादि। भविष्यत्काले ख्वाहद् गुफ्त वक्ष्यतीत्यर्थं इत्यादि। मेबायद् गुफ्त इत्यादि॥

लिह आस्वादने

लिहो लेसद्॥ १७१॥

लिह धातो र्लेसद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेलेसद् लेढीत्यर्थः। मेलेसन्द, मेलेसी, मेलेसेद्, मेलेसम्, मेलेसेम्। मेबायद् लेसद् इत्यादि। लेसद् इत्यादि।

भूतार्थे लेसीद्॥ १७२॥

लिह धातो र्लेसीद् इत्यादेशो भवति भूतार्थे पारसीकभाषायाम्। लेसीद् अलेट् इत्यर्थः लेसीदन्द, लेसीदी, लेसीदेद्, लेसीदम्, लेसीदेम्। क्रियातिपत्त्याम्—मेलेसीद्। भविष्यत्काले ख्वाहद् लेसीद् इत्यादि। मेबायद् लेसीद्

चमु आचमने—

चमश्चशद् ॥ १७३ ॥

चम् धातोश्चशद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेचशद् आचामतीत्यर्थः। मेचशन्द, मेचशी, मेचशेद्, मेचशम्, मेचशेम्। मेबायद् चशद्।

भूतार्थे चशीद् ॥ १७४ ॥

चम् धातोश्चशीद् इत्यादेशो भवति भूतार्थे पारसीकभाषायाम्। चशीद् आचामदित्यर्थः। चशीदन्द, चशीदी, चशीदेद्, चशीदम् चशीदेम्। क्रियातिपत्त्याम्—मे चशीद्। भविष्यत्काले ख्वाहद् चशीद् आचमिष्यतीत्यर्थं इत्यादि। मेबायद् चशीद्।

खाद भक्षणे—

खादः खोरद् ॥ १७५ ॥

खाद भक्षण इत्यस्य धातोः खोरद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मे खोरद् खादतीत्यर्थः। मे खोरन्द्, मे खोरी, मे खोरेद्, मे खोरम् मे खोरेम्, मेबायद् खोरद्। बोखोरद्, हौ बोखोर।

भूतार्थे खुर्द ॥ १७६ ॥

खाद धातोः खुर्द इत्यादेशो भवति भूतार्थे पारसीकभाषायाम्। खुर्द अखाददित्यर्थः। खुर्दन्द्, खुर्दी, खुर्देद्, खुर्दम्, खुर्देम्। क्रियातिपत्त्याम्—मेखुर्द इत्यादि। भविष्यत्काले ख्वाहद्खुर्द खादिष्यतीत्यर्थं इत्यादि। मेबायद् खुर्द इत्यादि॥

पा पाने—

पिवतेराशामद् ॥ १७७ ॥

पा पाने इत्यस्य धातोराशामद् इत्यादेशो भवति वर्त्तमानादै पारसीकभाषायाम्। मे आशामद् पिवतीत्यर्थः। मे आशामन्द, मे आशामी, मे आशामेद, मे आशामम्, मे आशामेम्। मेबायद् आशामद्। आशामद् हौ बेआशाम।

भूतार्थे आशामीद् ॥ १७८ ॥

पा पाने इत्यस्य धातोराशामीद इत्यादेशो भवति भूतार्थे। आशामीद् अपिवदित्यर्थः। आशामीदन्द, आशामीदी, आशामीदेद्,

आशामीदम्, आशामीदेम्। क्रियातिपत्त्याम्—मे आशामीद्। भविष्यत्-काले ख्वाहद् आशामीद् पास्यतीत्यर्थ इत्यादि।

ग्रह उपादाने—

ग्रहो गीरद्॥ १७९॥

ग्रह उपादान इत्यस्य धातोः गीरद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेगीरद् गृह्णातीत्यर्थः। मेगीरन्द, मेगीरी, मेगीरेद्, मेगीरम्, मेगीरेम्। मेबायद् गीरद्। वे गीरद् हौ वेगीर्।

गिरिफ्त भूतार्थे॥ १८०॥

ग्रहउपादान इत्यस्य धातेर्गिरिफ्त इत्यादेशो भवति भूतार्थे पारसीक-भाषायाम्। गिरिफ्त् अगृह्णादित्यर्थः गिरिफ्तन्द, गिरिफ्ती, गिरिफ्तेद्, गिरिफ्तम्, गिरिफ्तेम्। क्रियातिपत्त्याम् मेगिरिफ्त्। भविष्यत्काले ख्वाहद् गिरिफ्त् ग्रहीष्यतीत्यर्थं इत्यादि। मेबायद् गिरिफ्त्।

आज्ञापेः फरमायद्॥ १८१॥

आङ्पूर्व्वस्य ज्ञापेः फरमायद् इत्यादेशो भवति वत्तर्त्तमानादौ पारसीक-भाषायाम्। मे फरमायद् आज्ञापयतीत्यर्थः। मे फरमायन्द्, मेफरमायी, मेफरमायेद्, मेफरमायम्, मेफरमायेम्। मेबायद् फरमायद्। वेफरमायद्, हौ बे फरमाय।

भूतार्थे फरमूद्॥ १८२॥

आङ्पूर्व्वस्य ज्ञापेः फरमूद् इत्यादेशो भवति भूतार्थे पारसीक-भाषायाम्। फरमूद् आज्ञापयदित्यर्थः। फरमूदन्द्, फरमूदी, फरमूदेद् फरमूदम्, फरमूदेम्। क्रियाति० मे फरमूद्। भविष्य० ख्वाहद् फरमूद् आज्ञापयिष्यतीत्यर्थः। मेवायद् फरमूद्।

आप्लृ व्याप्तौ

प्रापे रसद्॥ १८३॥

प्रपूर्व्वस्याप्लृ व्याप्तावित्यस्य धातो रसद आदेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मे रसद् प्राप्नोतीत्यर्थः। मे रसन्द्, मेरसी, मे रसेद्, मे रसम्। मेबायद् रसद्। बेरसद्, हौ बेरस[1]।

---

१. घ व्यांतारंके आदर्शे बेरसद् इति पाठः।

भूतार्थे रसीद् ॥ १८४ ॥

रसीद् प्रापदित्यर्थः। रसीदन्द्, रसीदी, रसीदेद्, रसीदम्, रसीदेम्। क्रियाति० मे रसीद्। भविष्य० ख्वाहद् रसीद् प्राप्स्यतीत्यर्थः। मेबायद् रसीद।

डु लभ ष प्राप्तौ—

लभोयावद् ॥ १८५ ॥

डु लभ ष प्राप्तावित्यस्य धातोर्यावद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मे यावद् लभत इत्यर्थः। मेयावन्द्, मेयावी, मेयावेद्, मेयावम्, मेयावेम्। मेबायद् यावद्। हौ बेयावद् इत्यादि।

याफ्त् भूतार्थे ॥१८६॥

याफ्त् अलभतेत्यर्थः। याफ्तन्द्, याफ्ती, याफ्तेद्, याफ्तम्, याफ्तेम्। क्रियाति० मे याफ्त्। भविष्य० ख्वाहद् याफ्त् लप्स्यत इत्यर्थः। मेबायद् याफ्त्।

मुचृ मोचने[1]।

मुचो रस्त् भूतार्थे ॥ १८७ ॥

मुचृ मोक्षण इत्यस्य धातोः रस्त इत्यादेशो भवति भूतार्थे पारसीकभाषायाम्। रस्त् अमुचदित्यर्थः। रस्तन्द्, रस्ती, रस्तेद्, रस्तम्, रस्तेम्। क्रियाति० मे रस्त्। भविष्य० ख्वाहद् रस्त् मोक्ष्यतीत्यर्थः। मेबायद् रस्त्।

गम्लृ गतौ—

गमो रवद् ॥ १८८ ॥

गम्लृ गतावित्यस्य धातो रवद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मे रवद् गच्छतीत्यर्थः। मे रवन्द्, मे रवी, मे रवेद्, मे रवम् मेरवेम्। यादादौ मेबायद् रवद्। तुवादौ बेरवद् हौ बेरव।

रफ्त् भूतार्थे ॥ १८९ ॥

रफ्त् अगच्छदित्यर्थः। रफ्तन्द्, रफ्ती, रफ्तेद्, रफ्तम्, रफ्तेम्। क्रियाति० मे रफ्त्। भविष्य० ख्वाहद् रफ्त् गमिष्यतीत्यर्थः। मेबायद् रफ्त्।

या प्रापणे—

---

[1] वर्त्तमानादिविभक्तिषु रूपं न प्रदर्शितमादर्शेषु।

आयातेरायद् ॥ १६० ॥

आङ्पूर्वस्य या धातोः आयद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मे आयद् आयातीत्यर्थः। मे आयन्द्, मे आयी, मे आयेद्, मे आयम्, मे आयेम्। यादादौ मेबायद् आयद्। तुवादौ बे आयद्, हौ बे आय्।

आमद् भूतार्थे ॥ १६१ ॥

आमद्, आमदन्द्, आमदी, आमदेद्, आमदम्, आमदेम्। क्रियाति० मे आमद्। भविष्य० ख्वाहद् आमद् आयास्यतीत्यर्थः। मेबायद् आमद्।

वस निवासे—

वसो बाशद् ॥ १६२ ॥

वस निवास इत्यस्य धातो र्बाशद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मे बाशद् वसतीत्यर्थः। मे बाशन्द्, मे बाशी, मे बाशेद्, मे बाशम्, मे बाशेम्। मेबायद् बाशद् वसेदित्यर्थः। बे बाशद्, हौ बे बाश्।

बूद् भूतार्थे ॥ १६३ ॥

बूद् अवसदित्यर्थ इत्यादि। शेषं पूर्ववत्।

क्षिप प्रेरणे—

क्षिपोऽन्दाज़द् ॥ १६४ ॥

क्षिप प्रेरणा इत्यस्य धातोरन्दाज़द् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मे अन्दाज़द् क्षिपतीत्यर्थः। मे अन्दाज़न्द्, मे अन्दाज़ेद्, मे अन्दाज़म्, मे अन्दाज़ेम्। मेबायद् अन्दाज़द्। बे अन्दाज़द् हौ बे अन्दाज्।

अन्दाख्त् भूतार्थे ॥ १६५ ॥

अन्दाख्त् अक्षिपदित्यर्थः। अन्दाख्तन्द्, अन्दाख्ती, अन्दाख्तेद् अन्दाख्तम् अन्दाख्तेम्। क्रियाति० मे अन्दाख्त्। भविष्य० ख्वाहद् अन्दाख्त्। मेबायद् अन्दाख्त्।

णीञ् प्रापणे

णीञो बरद् ॥ १६६ ॥

णीञ् प्रापणा इत्यस्य धातोर्बरद् इत्यादेशो भवति वर्त्तमानादौ पारसीक

भाषायाम् । मेबरद् नयतीत्यर्थः । मेबरन्द, मेबरी, मेबरेद्, मेबरम्, मे॰रेम् । या० मेबायद्बरद् । तु० बेबरद् हौ बेबर ।

बुर्द् भूतार्थे ॥ १६७ ॥

बुर्द अनयदित्यर्थः । बुर्दन्द, बुर्दी, बुर्देद, बुर्दम्, बुर्देम् । क्रि० मेबुर्द । भ० ख्वाहदबुर्द नेष्यतीत्यर्थः । मेबायदबुर्द ।

डु दाञ् दाने—

दाञो दिहद् ॥ १६८ ॥

डु दाञ् दाने इत्यस्य धातो र्दिहद इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम् । मेदिहद् ददातीत्यथः । मेदिहन्द, मेदिही, मेदिहेद, मेदिहम्, मेदिहेम । या० मेबायददिहद । तु० वेदिहद, हौ बेदिह ।

दाद् भूतार्थे ॥ १६९ ॥

दाद् अददित्यर्थः । दादन्द, दादी, दादेद्, दादम्, दादेम् । क्रि० मेदाद । भ० ख्वाहददाद दास्यतीत्यर्थः । मेवायद्दाद् ।

डु कृञ् करणे—

कृञः कुनद् ॥ २०० ॥

डु कृञ् करण इत्यस्य धातोः कुनद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम् । मेकुनद् करोतीत्यर्थः । मेकुनन्द, मेकुनी, मेकुनेद, मेकुनम्, मेकुनेम् । या० मेबायद् कुनद् । तु बेकुनद करोतु इत्यर्थः ।

कर्द् भूतार्थे ॥ २०१ ॥

कर्द अकरोदित्यर्थः । कर्दन्द, कर्दी, कर्देद, कर्दम्, कर्देम् । क्रि० मेकर्द । भ० ख्वाहदकर्द करिष्यतीत्यथः । मेबायद कर्द ।

आङ् नीञ आरद् ॥ २०२ ॥

आङ्पूर्वस्य नी धातोरारद इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम् । मेआरद् आनयतीत्यथः । मेआरन्द, मेआरी, मेआरेद्, मेआरम्, मेआरेम् । या० मेबायद्आरद् । तु० बेआरद्, हौ बे आर ।

आवर्द् भूतार्थे ॥ २०३ ॥

आवर्द आनयदित्यर्थः। आवर्दन्द, आवर्दी, आवर्देद, आवर्दम्, आवर्देम्। क्रि० मेआवर्द। भ० ख्वाहद आवर्द आनेष्यतीत्यर्थः। मेबायद आवर्द इत्यादि।

डु क्रीञ् द्रव्यविनिमये—

वेः क्रीञः फरोशद् ॥ २०४ ॥

विपूर्वस्य डु क्रीञ् द्रव्यविनिमय इत्यस्य धातोः फरोशद इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेफरोशद् विक्रीणातीत्यर्थः। मे फरोशन्द, मेफरोशी, मेफरोशेद्, मेफरोशम्, मेफरोशेम्। या०मेबायद् फरोशद। तु० बफरोशद हो बफरोश।

फरोख्त् भूतार्थे ॥ २०५ ॥

फरोख्त व्यक्रीणात् इत्यर्थः। फरोख्तन्द फरोख्ती, फरोख्तेद, फरोख्तम्, फरोख्तेम्। क्रि० मेफरोख्त। भ० ख्वाहद फरोख्त। मेबायदफरोख्त इत्यादि।

क्रीञः खरद् ॥ २०६ ॥

डु क्रीञ् द्रव्यविनिमय इत्यस्य धातोः खरद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेखरद् क्रीणातीत्यर्थः। मेखरन्द, मेखरी, मेखरेद्, मेखरम्, मेखरेम्। या० मेबायदखरद्। तु० बेखरद्, हो बेखर।

खरीद् भूतार्थे ॥ २०७ ॥

क्रीञ् धातोः खरीद इत्यादेशो भवति। खरीद् अक्रिणात् इत्यर्थः। खरीदन्द, खरीदी, खरीदेद, खरीदम्, खरीदेम्। क्रि० मेखरीद। भ० ख्वाहदखरीद क्रयिष्यतीत्यर्थः। मेबायदखरीद।

ष्ठा गतिनिवृत्तौ—

तिष्ठतेरिस्तद् ॥ २०८ ॥

ष्ठा गतिनिवृत्तावित्यस्य धातोः इस्तद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेइस्तद तिष्ठतीत्यर्थः। मेइस्तन्द, मेइस्ती, मेइस्तेद, मेइस्तम्, मेइस्तेम्। या० मेबायद् इस्तद। तु० बेइस्तद, हो बे इस्त।

इस्ताद् भूतार्थे ॥ २०६ ॥

इस्ताद अतिष्ठदित्यर्थः । इस्तादन्द, इस्तादी, इस्तादेद, इस्तादेम् । क्रि० मेइस्ताद् । भ० ख्वाहद इस्ताद स्थास्यतीत्यर्थः । मेबायदइस्ताद ।

विश प्रवेशने—

उपाद्विशो निशीनद् ॥ २१० ॥

उपपूर्वस्य विशधातो निंशीनद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम् । मेनिशीनद् उपविशतीत्यर्थः । मेनिशीनन्द, मेनिशीनी, मेनिशीनेद्, मेनिशीनम्, मेनिशीनेम् । या० मेबायदनिशीनद । तु० बेनिशीनद, हौ बे निशीन ।

निशस्त् भूतार्थे ॥ २११ ॥

निशस्त उपाविशदित्यर्थः । निशस्तन्द, निशस्ती, निशस्तेद, निशस्तम्, निशस्तेम् । क्रि० मेनिशस्त । भ० ख्वाहद निशस्त । मेबायदनिशस्त इत्यादि ।

प्रच्छ ज्ञीप्सायाम्—

प्रच्छः पुर्सद् ॥ २१२ ॥

प्रच्छ ज्ञीप्सायामित्यस्य धातोः पुरसद इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम् । मेपुर्सद् पृच्छतीत्यर्थः । मेपुरसन्द, मेपुरसी, मेपुरसेद, मेपुरसम्, मेपुरसेम् । या० मेबायदपुरसद । तु० बपुरसद, हौ वपुरस ।

पुर्सीद् भूतार्थे ॥ २१३ ॥

पुरसीद अपृच्छदित्यर्थः । पुरसीदन्द, पुरसीदी, पुरसीदेद, पुरसीदम् पुरसीदेम् । क्रि० मेपुरसीद । भ० ख्वाहदपुरसीद । मेबायद पुरसीद इत्यादि ।

सृ गतौ—

सर्तेर्दवद् ॥ २१४ ॥

सृ गतावित्यस्य धातो दवद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम् । मेदवद् धावतीत्यर्थः । मेदवन्द, मेदवी, मेदवेद, मेदवम्, मेदवेम् । तु० बेदवद, हौ बेदव ।

दवीद् भूतार्थे ॥ २१५ ॥

दवीद अधावदित्यर्थः । दवीदन्द, दवीदी, दवीदेद, दवीदम् दवीदेम् । क्रि० मेदवीद । भ० ख्वाहददवीद । मेबायददवीद ।

धृञ् धारणे—

धृञो दारद् ॥ २१६ ॥

धृञ् धारण इत्यस्य धातो दारद् इत्यादेशो भवति वर्त्तमानादौ पारसीक-भाषायाम् । मेदारद् धारयतीत्यर्थः । मेदारन्द, मेदारी, मेदारेद, मेदारम्, मेदारेम् । या० मेबायददारद । तु० बेदारद्, हौ बेदार ।

दाश्त् भूतार्थे ॥ २१७ ॥

दाश्त अधारयदित्यर्थः । दाश्तन्द, दाश्ती, दाश्तेद, दाश्तम्, दाश्तेम् । क्रि० मेदाश्त । भ० ख्वाहददाश्त । मेबायददाश्त ।

उदो बर् ॥ २१८ ॥

उद् उपसर्गस्य बर इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम् । बर् मेदारद् उद्धरतीत्यर्थः । मेबायद् बरदारद् । हौ बरदार । बरदाश्त इत्यादि ।

उदःस्थः खेजद् ॥ २१९ ॥

उत्पूर्वात् स्थाधातोः खेजद् इत्यादेशो भवति वर्त्तमानादौ पारसीक-भाषायाम् । बर् मेखेजद् उत्तिष्ठतीत्यर्थः । बरमेखेजन्द, बरमेखेजी, बरमे-खेजद, बरमेखेजम्, बरमेखेजेम् ।

खास्त् भूतार्थे ॥ २२० ॥

बरखास्त उदतिष्ठदित्यर्थः । बरखास्तन्द, बरखास्तेद, बरखास्तम्, बरखास्तेम् । क्रि० बरमेखास्त । भ० ख्वाहदबरखास्त उत्थास्यतीत्यर्थः । मेबायद्बरखास्त ।

इषु इच्छायाम्—

इषः ख्वाहद् ॥ २२१ ॥

इषु इच्छायामित्यस्य धातोः ख्वाहद इत्यादेशो भवति वर्त्तमानादौ

पारसीकभाषायाम्। मेख्वाहद इच्छतीत्यर्थः। मेख्वाहन्द, मेख्वाही, मेख्वाहेद, मेख्वाहम्, मेख्वाहेम्। या० मेबायद ख्वाहद। तु० बेख्वाहद, हौ बेख्वाह।

ख्वास्त् भूतार्थे ॥ २२२ ॥

ख्वास्त् ऐच्छदित्यर्थः। ख्वास्तन्द, ख्वास्ती, ख्वास्तेद, ख्वास्तम्, ख्वास्तेम। क्रि० मेख्वास्त। भ० ख्वाहदख्वास्त। मेबायदख्वास्त।

ज्ञा अवबोधने—

ज्ञोदानद् ॥ २२३ ॥

ज्ञा अवबोधन इत्यस्य धातो र्दानद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेदानद् जानातीत्यर्थः। मेदानन्द, मेदानी, मेदानेद, मेदानम्, मेदानेम्। या० मेबायददानद्। तु० बदानद्, हौ बदान।

दानिस्त् भूतार्थे ॥ २२४ ॥

दानिस्त अजानदित्यर्थः। दानिस्तन्द, दानिस्ती, दानिस्तेद, दानिस्तम्, दानिस्तेम्। क्रि० मेदानिस्त। भ० ख्वाहद दानिस्त ज्ञास्यतीत्यर्थः। मेबायददानिस्त।

जनी प्रादुर्भावे—

जने र्जायद् ॥ २२५ ॥

जनी प्रादुर्भाव इत्यस्य धातो जायद इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेजायद जायते इत्यर्थः। मेजायन्द, मेजायी, मेजायेद, मेजायम्, मेजायेम्। या० मेबायद जायद। तु० बेजायद्, हौ बेजाय।

जायीद् भूतार्थे ॥ २२६ ॥

जायीद अजायतेत्यर्थः। जायीदन्द, जायीदी, जायीदेद, जायीदम्, जायीदेम्। क्रि० मेजायीद। भ० ख्वाहद जायीद्। मेबायदजायीद्।

लिख लेखने—

लिखो नवीसद् ॥ २२७ ॥

लिख धातो र्नवीसद इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्।

मेनवीसद लिखतीत्यर्थः। मेनवीसन्द, मेनवीसी, मेनवीसेद, मेनवीसम्, मेनवीसेम्। या० मेबायद नवीसद्। तु० बेनवीसद, हो बेनबीस।

नविश्त् भूतार्थे ॥ २२८ ॥

नविश्त अलिखदित्यर्थः। नविश्तन्द, नविश्ती, नविश्तेद, नविश्तम्, नविश्तेम्। क्रि० मेनविश्त। भ० ख्वाहद नविश्त। मेबायद नविश्त।

ञि ष्वप् शये—

ष्वपः ख्वावद् ॥ २२९ ॥

ञि ष्वप् शय इत्यस्य धातोः ख्वाबद आदेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेख्वाबद स्वपितीत्यर्थः। मेख्वाबन्द, मेख्वाबी, मेख्वाबेद, मेख्वाबम्, मेख्वाबेम्। या० मेबायदख्वाबद। तु० बख्वाबद, हो बख्वाव।

ख्वाबीद् भूतार्थे ॥२३०॥

ख्वाबीद अस्वपदित्यर्थः। ख्वाबीदन्द, ख्वाबीदी, ख्वाबीदेद, ख्वाबीदम्, ख्वाबीदेम्। क्रि० मेख्वाबीद। भ० ख्वाहदख्वाबीद। आ० मेबायदख्वाबीद।

व्यध ताड़ने—

व्यधो जनद् ॥ २३१ ॥

व्यध ताड़न इत्यस्य धातोः जनद् इत्यादेशो भवति वर्त्तमानादौ पारसीकभाषायाम्। मेजनद् विध्यतीत्यर्थः। मेजनन्द, मेजनी, मेजनेद्, मेजनम्, मेजनेम्। यादादौ मेबायदजनद्। तु बेजनद्, हो बेजन।

जद् भूतार्थे ॥ २३२ ॥

जद् अविध्यदित्यर्थः। जदन्द, जदी, जदेद्, जदम्, जदेम्। क्रि० मेजद्। भ० ख्वाहदजद्। आ० मेबायदजद।

हन् हिंसागत्योः —

हनः कुशद् ॥ २३३ ॥

हन हिंसागत्योरित्यस्य धातोः कुशद् इत्यादेशो भवति व० पा०।

मेकुशद् हन्तीत्यर्थः । मेकुशन्द, मेकुशी, मेकुशेद, मेकुशम्, मेकुशेम् । या० मेबायद कुशद् । तु वकुशद, हौ बकुश ।

कुश्त् भूतार्थे ॥ २३४ ॥

कुश्त, कुश्तन्द, कुश्ती, कुश्तेद, कुश्तम्, कुश्तेम् । क्रि० मेकुश्त । भ० ख्वाहदकुश्त हनिष्यतीत्यर्थः । मेबायदकुश्त ।

मृङ् प्राणत्यागे —

मृङो मीरद् ॥ २३५ ॥

मृङ् प्राणत्याग इत्यस्य धातो मींरद् इत्यादेशो भवति व० पा० । मेमीरद् म्रियत इत्यर्थः । मेमीरन्द, मेमीरी, मेमीरेद्, मेमीरम्, मेमीरेम् । मेबायद मीरद् । तु वेमीरद्, हौ बेमीर ।

मुर्द् भूतार्थे ॥ २३६ ॥

मुर्द् अम्रियत इत्यर्थः । मुर्दन्द, मुर्दी, मुर्देद, मुर्दम्, मुर्देम् । क्रि० मेमुर्द् । भ० ख्वाहदमुर्द् मरिष्यतीत्यर्थः । मेबायदमुर्द् इत्यादि ।

त्यज हानौ —

त्यजो गुजारद् ॥ २३७ ॥

त्यज हानावित्यस्य धातो गुंजारद् इत्यादेशो भवति व० पा० । मेगुजारद् त्यजतीत्यर्थः । मेगुजारन्द, मेगुजारी, मेगुजारेद, मेगुजारम्, मेगुजारेम् । या० मेबायद गुजारद । तु वे गुजारद्, हौ बेगुजार ।

गुदाश्त् भूतार्थे ॥ २३८ ॥

गुदाश्त अत्यजदित्यर्थः । क्वचिद् गुजाश्त इति । गुदाश्तन्द, गुदाश्ती, गुदाश्तेद, गुदाश्तम्, गुदाश्तेम् । क्रि० मेगुदाश्त । भ० ख्वाहदगुदाश्त त्यक्ष्यतीत्यर्थः । मेबायद्गुदाश्त इत्यादि ।

व्रज गतौ—

व्रजो गुजरद् ॥ २३९ ॥

व्रज धातो गुंजरद् इत्यादेशो भवति व० पा० । मेगुजरद् व्रजतीत्यर्थः ।

मेगुजरन्द, मेगुजरी, मेगुजरेद, मेगुजरम्, मेगुजरेम् । या० मेबायदगुजरद् । तु बगुजरद्, हौ बगुजर ।

गुदस्त्[1] भूतार्थे ॥ २४० ॥

गुदस्त अव्रजदित्यर्थः । गुदस्तन्द, गुदस्ती, गुदस्तेद, गुदस्तम्, गुदस्तेम । क्रि० मेगुदस्त । भ० ख्वाहदगुदस्त व्रजिष्यतीत्यर्थः । मेबायदगुदस्त ।

दन्श् दशने—

दन्शो गजद् ॥ २४१ ॥

दन्श दशन इत्यस्य धातोः गजद इत्यादेशो भवति व० पा० । मेगजद् दशतीत्यर्थः । मेगजन्द, मेगजी, मेगजेद, मेगजम्, मेगजेम् । या० मेबायद् गजद् । तु बेगजद, हौ बेगज ।

भूतार्थे गजीद् ॥ २४२ ॥

गजीद अदशदित्यर्थः । गजीदन्द, गजीदी, गजीदेद, गजीदम्, गजीदेम् । क्रि० मेगजीद । भ० ख्वाहदगजीद । आ० मेबायद्गजीद ।

चिञ् चयने—

चिञः चीनद् ॥ २४३ ॥

चिञ् चयन इत्यस्य धातो श्चीनद इत्यादेशो भवति व० पा० । मेचीनद् चिनोतीत्यर्थः । मेचीनन्द, मेचीनी, मेचीनेद, मेचीनम्, मेचीनेम् । या० मेबायद्चीनद् । तु बेचीनद्, हौ बेचीन ।

चीद् भूतार्थे ॥ २४४ ॥

चीद अचिनोदित्यर्थः । चीदन्द, चीदी, चीदेद, चीदम्, चीदेम् । क्रि० मेचीद । भ० ख्वाहदचीद । आ० मेबायदचीद ।

परिचिञः शिनासद् ॥ २४५ ॥

परिपूर्वस्य चिञ्धातोः शिनासद्[2] इत्यादेशो भवति व० पा० । मेशि-

---

१ । गुजस्त इति E. H. Palmer. कृते कोशे ।

२ । शनासद इति घ पुस्तके ।

नासद् परिचिनोतीत्यर्थः। मेशिनासन्द्, मेशिनासी, मेशिनासेद, मेशिनासम्, मेशिनासेम्। या० मेवायद शिनासद्। तु बशिनासद्, हौ बशिनास।

शिनाख्त् भूतार्थे ॥ २४६ ॥

परिपूर्वस्य चिनोते शिनाख्त इत्यादेशो भवति भू० पा०। शिनाख्त् पर्य्यचिनोत् इत्यर्थः। क्रि० मेशिनाख्त। भ० ख्वाहदशिनाख्त। आ० मेबायदशिनाख्त इत्यादि।

रुदिर् अश्रुविमोचने—

रुदो गिरीयद् ॥ २४७ ॥

रुदिर् अश्रुविमोचन इत्यस्य धातो र्गिरीयद् इत्यादेशो भवति व० पा०। मेगिरीयद् रोदितीत्यर्थः। मेगिरीयन्द, मेगिरीयी, मेगिरीयेद, मेगिरीयम्, मेगिरीयेम्। या० मेबायदगिरीयद। तु बगिरीयद, हौ बगिरीय।

गिरिस्त् भूतार्थे ॥ २४८ ॥

गिरिस्त अरुददित्यर्थः। गिरिस्तन्द, गिरिस्ती, गिरिस्तेद, गिरिस्तम्, गिरिस्तेम्। क्रि० मेगिरिस्त[1]। भ० ख्वाहदगिरीस्त। आ० मेबायद गिरिस्त इत्यादि।

हस हसने—

हसः खन्दद् ॥ २४९ ॥

हस हसन इत्यस्य धातोः खन्दद् इत्यादेशो भवति व० पा०। मेखन्दद् हसतीत्यर्थः। मेखन्दन्द्[2], मेखन्दी, मेखन्देद्, मेखन्दम्, मेखन्देम्। या० मेबायदखन्दद्। तु बखन्दद्, हौ बखन्द्।

खन्दीद् भूतार्थे ॥ २५० ॥

खन्दीद् अहसदित्यर्थः। खन्दीदन्द्, खन्दीदी, खन्दीदेद्, खन्दीदम्, खन्दीदेम्। क्रि० मेखन्दीद्। भ० ख्वाहदखन्दीद्। आ० मेबायद्खन्दीद् इत्यादि।

१। मेगिरीस्तन्द इति घ पुस्तके।

२। इतः परं घ पुस्तके हौ बखन्द इत्यन्तोऽधिकः पाठः।

लङ्घि गतौ—

उल्लङ्घे जँहद् ॥ २५१ ॥

उत्पूर्वस्य लङ्घि धातो जँहद इत्यादेशो भवति व० पा०। मेजहद उल्लङ्घत इत्यर्थः। मेजहन्द, मेजही, मेजहेद, मेजहम्, मेजहेम्। या० मेबायदजहद। तु बजहद, हो बजह।

जस्त् भूतार्थे ॥ २५२ ॥

जस्त उदलङ्घयदित्यर्थः। जस्तन्द, जस्ती, जस्तेद, जस्तम्, जस्तेम्। क्रि० मेजस्त। भ० ख्वाहद्जस्त। आ० मेबायदजस्त।

डु धाञ् धारणे—

परिधाञः पोशद् ॥ २५३ ॥

परिपूर्वस्य दधातेः पोशद् इत्यादेशो भवति व० पा०। मेपोशद् परिदधातीत्यर्थः। मेपोशन्द, मेपोशी, मेपोशेद, मेपोशम्, मेपोशेम्। या० मेबायद् पोशद्। तु बपोशद्, हौ बपोश।

पोशीद् भूतार्थे ॥ २५४ ॥

पोशीद् पर्यदधादित्यर्थः। पोशीदन्द, पोशीदी, पोशीदेद्, पोशीदम्, पोशीदेम्। क्रि० मेपोशीद। भ० ख्वाहदपोशीद। आ० मेबायद्पोशीद्।

दह् भस्मीकरणे—

दहः सूजद्[1] ॥ २५५ ॥

दह भस्मीकरण इत्यस्य धातोः सूजद इत्यादेशो भवति व० पा०। मेसूजद दहनीत्यर्थः। मेसूजन्द, मेसूजी, मेसूजेद, मेसूजम्, मेसूजेम्। या० मेबाय दूसूजद्। तु बसूज,द् हौ बसूज।

सोख्त् भूतार्थे ॥ २५६ ॥

सोख्त् अदहदित्यर्थः। सोख्तन्द, सोख्ती, सोख्तेद, सोख्तम्, सोख्तेम्। क्रि० मेसोख्त। भ० ख्वाहदसोख्त। आ० मेबायदसोख्त।

१। सूयद इति क. सोयद् इति च घ पुस्तके।

वृषु वृष्टौ—

वृषो वारद् ॥ २५७ ॥

वृषु वृष्टावित्यस्य धातो र्वारद् इत्यादेशो भवति व० पा०। मेबारद् वर्षतीत्यर्थः। मेबारन्द, मेवारी, मेवारेद्, मेबारम्, मेबारेम्। या० मेबायदवारद्। तु ववारद्, हौ ववार।

वारीद् भूतार्थे ॥ २५८ ॥

वारीद अवर्षदित्यर्थः। वारीदन्द, बारीदी, बारीदेद, बारीदम्, बारीदेम्। क्रि० मेबारीद। भ० ख्वाहदबारीद। आ० मेबायदवारीद।

हद पुरीषोत्सर्गे—

हदो रीयद्[१] ॥ २५९ ॥

हद पुरीषोत्सर्ग इत्यस्य धातो रीयद् इत्यादेशो भवति व० पा०। मेरीयद् हदत इत्यर्थः। मेरीयन्द, मेरीयी, मेरीयेद, मेरीयम्, मेरीयेम्। या० मेबायदरीयद्। तु० वरीयद्, हौ वरीय।

रीद् भूतार्थे[२] ॥ २६० ॥

रीद् अहदतेत्यर्थः। रीदन्द, रीदी, रीदेद, रीदम्, रीदेम्। क्रि० मेरीद। भ० ख्वाहदरीद। आ० मेबायदरीद।

मूत्रि मूत्रोत्सर्गे—

मूत्रेः शाशद् ॥ २६१ ॥

मूत्रि मूत्रोत्सर्ग इत्यस्य धातोः शाशद् इत्यादेशो भवति व० पा०। मेशाशद मूत्रयतीत्यर्थः। मेशाशन्द, मेशाशी, मेशाशेद, मेशाशम्, मेशाशेम्। या० मेबायदशाशद। तु बशाशद, हौ बशाश।

१। रेयद् इति घ पुस्तके।

२। रेख्त भूतार्थे॥ रेख्त अहदतेत्यर्थः। रेख्तन्द, रेख्ती, रेख्तेद, रेख्तम्, रेख्तेम्। क्रि० मेरेख्त। भ० ख्वाहदरेख्त। आ० मेबायदरेख्त इति पाठान्तरं वर्त्तते घ पुस्तके।

शाशीद् भूतार्थे ॥ २६२ ॥

शाशीद् अमूत्रयदित्यर्थः । शाशीदन्द, शाशीदी, शाशीदेद, शाशीदम् शाशीदेम् । क्रि० मेशाशीद । भ० ख्वाहद्शाशीद । आ० मेबायद शाशीद ।

छिदिर् द्विधाकरणे—

छिदो बुर्द् ॥ २६३ ॥

छिदिर् द्विधाकरण इत्यस्य धातो बुर्रद इत्यादेशो भवति व० पा० । मेबुर्रद छिनत्तीत्यर्थः । मेबुरन्द, मेबुरी, मेबुरेंद, मेबुरम्, मेबुरेम् । या० मेबायद् बुर्रद । तु बबुर्रद, हौ बबुर् ।

बुरीद् भूतार्थे[1] ॥ २६४ ॥

बुरींद अच्छिनदित्यर्थः । बुरींदन्द, बुरींदी, बुरींदेद, बुरींदम्, बुरींदेम् । क्रि० मेबुरींद । भ० ख्वाहद बुरींद । आ० मेबायदबुरींद ।

भिदिर् विदारणे—

भिदिरस्तर्कद्[2] ॥ २६५ ॥

भिदिर् विदारण इत्यस्य धातोस्तर्कद् इत्यादेशो भवति व० पा० । मेतर्कद भिनत्तीत्यर्थः । मेतर्कन्द, मेतर्की, मेतर्केद, मेतर्कम्, मतर्केम् । या० मेवायद तर्कद । तु बतर्कद, हौ बतर्क ।

तर्कीद् भूतार्थे ॥ २६६ ॥

तर्कीद अभिनदित्यर्थः । तर्कीदन्द, तर्कीदी, तर्कीदेद, तर्कीदम्, तर्कीदेम् । क्रि० मेतर्कीद । भ० ख्वाहद तर्कीद । आ० मेबायद तर्कीद ।

दृङ् विदारणे—

दृङोदर्रद् ॥ २६७ ॥

दृङ् विदारण इत्यस्य धातोर्दर्रद् इत्यादेशो भवति व० पा० । मेदर्रद दृणाति इत्यर्थः । मेदर्रन्द, मेदर्रदी, मेदर्रेद्, मेदर्रम्, मेदर्रेम् ।

---

१ । बुरीद इत्येव पाठः E. H. Palmer कृते कोशे वर्त्तते । तथा च वर्त्तमानादावपि बुरद इत्येव भवितुमर्हति ।

२ । नास्ति सूत्रोऽयं कस्मिंश्चिदपि आदर्शे । उपयोगित्वादस्माभिर्निवेशितः ।

दर्रीद्ु भूतार्थे ॥ २६८ ॥

दर्रीद, अद्दणादित्यर्थः । दररीदन्द, दररीदी, दररीदेद्, दररीदम्, दररीदेम् । क्रि॰ मेदररीद् । भ॰ ख्नाहद दररीद । आ॰ मेबायद दररीद ।

कृष विलेखने कर्षणे—

कृषः कसद्ु ॥ २६९ ॥

कृष कर्षण इत्यस्य धातोः कसद इत्यादेशो भवति व॰ पा॰ । मेकसद् कर्षतीत्यर्थः । मेकसन्द इत्यादि ।

कसीद्ु भूतार्थे ॥ २७० ॥

कसीद अकर्षदित्यर्थ इत्यादि ।

पत्लृ पतने—

पतो यफ्तद्[१] ॥ २७१ ॥

पत्लृ पतन इत्यस्य धातो र्यफ्तद इत्यादेशो भवति व॰ पा॰ । मेयफ्तद पततीत्यर्थ इत्यादि ।

यफ्ताद्ु भूतार्थे ॥ २७२ ॥

यफ्ताद अपतदित्यर्थ इत्यादि ।

बध बन्धने—

बधो बन्दद् ॥ २७३ ॥

बध बन्धन इत्यस्य धातो र्बन्दद इत्यादेशो भवति व॰ पा॰ । मेबन्दद बध्नातीत्यर्थ इत्यादि ।

बस्त् भूतार्थे ॥ २७४ ॥

बस्त अवघ्नादित्यर्थ इत्यादि ।

चुर स्तेये—

चुरे दुंज्दद् ॥ २७५ ॥

चुर स्तेय इत्यस्य धातो दुंज्दद् इत्यादेशो भवति व॰ पा॰ । मेदुज्दद् चोरयतीत्यर्थ इत्यादि ।

---

१ । उपतद् इति E. H. Palmer कृते कोशे ।

दुज्दीद् भूतार्थे ॥ २७६ ॥

दुज्दीद अचोरयदित्यर्थः ।

रुह जन्मनि—

रुहो रोयद् ॥ २७७ ॥

रुह् जन्मनि इत्यस्य धातो रोयद इत्यादेशो भवति व० पा० । मेरोयद् रोहतीत्यर्थः ।

रोयीद् भूतार्थे ॥ २७८ ॥

रोयीद अरुहदित्यर्थ इत्यादि ।

चुबि वक्त्रसंयोगे—

चुबे बोसद् ॥ २७९ ॥

मेबोसद चुम्बतीत्यर्थः ।

बोसीद् भूतार्थे ॥ २८० ॥

बोसीद अचुम्बदित्यर्थ इत्यादि ।

फुल्ल विकशने—

फुल्लः शुकुफ्द् ॥ २८१ ॥

मेशुकुफ्द् फुल्लतीत्यर्थः ।

भूतार्थे शुकुफ्त[1] ॥ २८२ ॥

शुकुफ्त अफुल्लदित्यर्थ इत्यादि ।

जीव प्राणने—

जीवो जीयद् ॥ २८३ ॥

मेजीयद जीवतीत्यर्थः ।

जीस्त् भूतार्थे ॥ २८४ ॥

जीस्त अजीवत् इत्यर्थ इत्यादि ।

तक्ष्णू तनूकरणे—

---

१ । शिगुफ्त् इति E. H. Palmer कृते कोशे ।

तद्दणोतेस्तराशद् ॥ २८५ ॥

मेतराशद् तद्दणोतीत्यर्थ इत्यादि[१] ।

तराशीद् भूतार्थे ॥ २८६ ॥

तराशीद् अतद्दणोदित्यर्थ इत्यादि ।

यभ मैथुने—

यभो गायद् ॥ २८७ ॥

मेगायद् यभतीत्यर्थः ।

गायीद् भूतार्थे ॥ २८८ ॥

गायीद अयभत् इत्यर्थ इत्यादि ।

टु वेपृ कम्पने—

वेपो लर्जद् ॥ २८९ ॥

मेलर्जद् वेपतेत्यर्थः ।

लर्जीद् भूतार्थे ॥ २९० ॥

लर्जीद् अकम्पतेत्यर्थ इत्यादि ।

कल सङ्ख्याने—

कलः शुमारद् ॥ २९१ ॥

मेशुमारद् गणयतीत्यर्थः ।

शुमुर्द्[२] भूतार्थे ॥ २९२ ॥

शुमुर्द अगणयदित्यर्थः ।

स्यन्द स्रवणे—

स्यन्द श्चकद् ॥ २९३ ॥

मेचकद् स्यन्दत इत्यर्थः ।

---

१ । अनन्तरं तराशीद भूतार्थे ॥ इति पाठः नास्ति आदर्शेषु । परन्तु उपयोगित्वादस्माभिः कल्पितः ।

२ । शुमारीद इत्यपि भवितुमर्हति ।

चकीद् भूतार्थे ॥ २६४ ॥

चकीद् अस्यन्दतेत्यर्थः ।

नृती गात्रविक्षेपे—

नृतो रक़्सद् ॥ २६५ ॥

मेरक़्सद् नृत्यतीत्यर्थः ।

रक़्सीद् भूतार्थे ॥ २६६ ॥

रक़्सीद अनृत्यदित्यर्थः ।

भ्रमु चलने—

भ्रमो गर्दद्[1] ॥ २६७ ॥

मेगर्दद् भ्रमतीत्यर्थः ।

गर्दीद्[2] भूतार्थे ॥ २६८ ॥

गर्दीद् अभ्रमदित्यर्थः ।

खनु अवदारणे—

खनः कनद् ॥ २६९ ॥

मेकनद् खनतीत्यर्थः ।

कन्द् भूतार्थे ॥ ३०० ॥

कन्द अखनदित्यर्थः ।

टु वप् वीजतन्तुसन्ताने—

वपः कारद् ॥ ३०१ ॥

मेकारद् वपतीत्यर्थः ।

काश्त् भूतार्थे ॥ ३०२ ॥

काश्त अवपदित्यर्थ इत्यादि ।

वेञ् तन्तुसन्ताने—

---

१ मिर्दद इति क० पुस्तके ।

२ गिर्दीद् इति क० पुस्तके ।

वेञो वाफद् ॥ ३०३ ॥

मेवाफद् वयतीत्यर्थ इत्यादि ।

भूतार्थे वाफ्त् ॥ ३०४ ॥

वाफ्त् अवयत् इत्यर्थ इत्यादि ।

व्येञ् संवरणे—

व्येञः पोशद् ॥ ३०५ ॥

मेपोशद् व्ययति ।

पोशीद् भूतार्थे ॥ ३०६ ॥

पोशीद् अव्ययत् इत्यादि ।

बुध अवगमने—

बुधः फहमद् ॥ ३०७ ॥

मेफहमद् बुध्यन इत्यर्थः ।

फहमीद् भूतार्थे ॥ ३०८ ॥

फहमीद् अबुध्यतेत्यर्थ इत्यादि ।

रिचिर् विरेचने—

रिचो रेयद् ॥ ३०९ ॥

मेरेयद् रेचतीत्यर्थः ।

रेख्त्[1] भूतार्थे ॥ ३१० ॥

रेख्त अरेचदित्यर्थ इत्यादि ।

तप सन्तापे—

तपस्तावद् ॥ ३११ ॥

मेतावद् तपतीत्यर्थः ।

तावीद् भूतार्थे ॥ ३१२ ॥

तावीद् अतपदित्यर्थ इत्यादि ।

राजृ दीप्तौ—

---

१ । to pour. इत्यर्थो दृश्यते E. H. Palmer कृते कोशे ।

राजो येवद्[1] ॥ ३१३ ॥

मेयेवद् राजत इत्यर्थः ।

येवीद्[2] भूतार्थे ॥ ३१४ ॥

येवीद् अराजदित्यर्थ इत्यादि ।

चल सञ्चलने—

चलश्चलद् ॥ ३१५ ॥

मेचलद् चलतीत्यर्थः ।

चलीद् भूतार्थे ॥ ३१६ ॥

चलीद अचलदित्यर्थ इत्यादि ।

चर भक्षणे—

चरश्चरद् ॥ ३१७ ॥

मेचरद् चरतीत्यर्थः ।

चरीद् भूतार्थे ॥ ३१८ ॥

चरीद् अचरदित्यर्थ इत्यादि ।

लीङ् गतौ विलापे—

लीङो गुदायद् ॥ ३१९ ॥

मेगुदायद् विलापयतीत्यर्थः ।

गुदाख्त्[3] भूतार्थे ॥ ३२० ॥

गुदाख्त व्यलापयदित्यर्थ इत्यादि ।

क्षल शौचे—

प्रक्षालेः शोयद् ॥ ३२१ ॥

मे शोयद् प्रक्षालयतीत्यर्थः ।

---

१ । जेवद् इति प्रतिभाति ।

२ । जेवीद् इति प्रतिभाति ।

३ । गुदास्त इति आदर्शेषु ।

शुस्त् भूतार्थे ॥ ३२२ ॥

शुस्त प्राक्षालयदित्यर्थ इत्यादि ।

स्फुटिर् विशरणे—

स्फुटिरः शिकनद् ॥ ३२३ ॥

मेशिकनद् स्फुटतीत्यर्थः ।

शिकस्त् भूतार्थे ॥ ३२४ ॥

शिकस्त अस्फुटदित्यर्थ इत्यादि ।

पठ व्यक्तायां वाचि—

पठः ख्वानद् ॥ ३२५ ॥

मेख्वानद् पठतीत्यर्थः ।

ख्वान्द् भूतार्थे ॥ ३२६ ॥

ख्वान्द अपठदित्यर्थ इत्यादि ।

क्वथ निष्पाके—

क्वथे जोशद् ॥ ३२७ ॥

मेजोशद् क्वथत इत्यर्थः ।

जोशीद् भूतार्थे ॥ ३२८ ॥

जोशीद अक्वथत इत्यर्थ इत्यादि ।

ईक्ष दर्शने—

परीक्ष आज्मायद् ॥ ३२९ ॥

मेआज्मायद् परीक्षत इत्यर्थः ।

आज्मूद् भूतार्थे ॥ ३३० ॥

आज्मूद पर्यैक्षतेत्यर्थ इत्यादि ।

रभ राभस्ये—

प्रारभो दमद् ॥ ३३१ ॥

मेदमद् प्रारभत इत्यर्थः ।

दमींद् भूतार्थे ॥ ३३२ ॥

दमीद प्रारभतेत्यर्थ इत्यादि ।

क्रमु पादविक्षेपे—

अपक्रमो रमद् ॥ ३३३ ॥

मेरमद् अपक्रमत इत्यर्थः ।

रमीद् भूतार्थे ॥ ३३४ ॥

रमीद् अपाक्रमदित्यर्थः ।

घट चेष्टायां—

घटेः साजद् ॥ ३३५ ॥

मेसाजद् घटतीत्यर्थः ।

साख्त् भूतार्थे ॥ ३३६ ॥

साख्त अघटयदित्यर्थ इत्यादि ।

चूर्ण संचूर्णने—

चूर्णेः कोबद् ॥ ३३७ ॥

मेकोबद् चूर्णयतीत्यर्थः ।

कोफ्त् भूतार्थे ॥ ३३८ ॥

कोफ्त अचूर्णायदित्यर्थः ।

म्रद मर्दने—

म्रदो मालद् ॥ ३३९ ॥

मेमालद् मर्दत इत्यर्थः ।

मालीद् भूतार्थे ॥ ३४० ॥

मालीद अमर्दतेत्यर्थः ।

ञि भी भये—

भिय स्तर्सद् ॥ ३४१ ॥

मेतर्सद् बिभेतीत्यर्थ इत्यादि ।

तर्सीद् भूतार्थे ॥ ३४२ ॥

तर्सीद अबिभेदित्यर्थ इत्यादि ।

भ्रमु अनवस्थाने—

भ्रमो जुम्बद् ॥ ३४३ ॥

मे जुम्बद् भ्राम्यतीत्यर्थः ।

जुम्बीद् भूतार्थे ॥ ३४४ ॥

जुम्बीद अभ्राम्यदित्यर्थ इत्यादि ।

मृग अन्वेषणे—

मृगो जूयद् ॥३४५॥

मेजूयद् मृगयत इत्यर्थः ।

जुस्त् भूतार्थे ॥३४६॥

जुस्त अमृगयदित्यर्थ इत्यादि ।

अथ कारितान्ताः ।

धातोः प्रेरणेऽनम् ॥३४७॥

धातोः प्रेरणे प्रयोजकव्यापारे अर्थे अनम् प्रत्ययो भवति । कुर्वन्तं कारयति[1] यः स प्रयोजकः ।

डु दाञ् दाने—

दाञो दिहद् (१६८ सू०) आदेशः । मकारो मित्कार्यार्थः । मिदन्त्या-त्स्वरात्परो वक्तव्यः ।

दिहद् तिप् इति स्थिते मेदिहद कसे उरा दिगर् मेफरमायद् इति वाक्ये दकारस्य पूर्वं अनम् प्रत्ययः । तिबादे में पूर्वनिपातश्च (१३० सू०)। मेदिहानद् दापयतीत्यर्थः । मेदिहानन्द, मेदिहानी, मेदिहानेद, मेदिहानम्, मेदिहानेम् । या० मेबायद दिहानद । तु बदिहानद्, हौ बदिहान ।

---

१ । प्रेरयतीत्येव साधु भवितुमर्हति ।

भूतार्थेऽनमोऽन्त्याकारस्य लोपः ॥३४८॥

भूताऽर्थेऽनम् प्रत्ययस्यान्त्याकारस्य लोपो भवति। दिहान्द अदापयदित्यर्थः। दिहान्दन्द, दिहान्दी, दिहान्देद, दिहान्दम्, दिहान्देम्। क्रि० मेदिहान्द। भ० ख्वाहददिहान्द दापयिष्यतीत्यर्थः। आ० मेबायददिहान्द इत्यादि।

डु पचष् पाके—

पचः पज़द् (१६० सू०)। मेपज़द् कसे उरा दिगर मेफ़रमायद् इति मेपज़ानद्, मेपज़ानन्द, मेपज़ानी, मेपज़ानेद्, मेपज़ानम्, मेपज़ानेम्। या० मेबायद्पज़ानद्। तु बपज़ानद्। भूते—पज़ान्द। क्रि० मेपज़ान्द। भ० ख्वाहदपज़ान्द। आ० मेबायद्पज़ान्द इत्यादि।

दृशिर् प्रेक्षणे—

दृशो बीनद् (१६२ सू०)। मेबीनद् कसे उरा दिगर् मेफ़रमायद् इति वाक्ये मेबीनानद् दर्शयतीत्यर्थः। मेबीनानन्द। भूतेऽर्थे बीनान्द। क्रि० मेबीनान्द। भ० ख्वाहदबीनान्द दर्शयिष्यतीत्यर्थ इत्यादि।

श्रु श्रवणे—

श्रृणोतेः शिनवद् (१६४ सू०)। मेशिनवद् कसे उरा दिगर् मेफ़रमायद् इति वाक्ये मेशिनवानद् श्रावयतीत्यर्थः। भूते शिनवान्द अश्रावयदित्यर्थ इत्यादि। ख्वाहद शिनवान्द श्रावयिष्यतीत्यर्थ इत्यादि।

घ्रा गन्धग्रहणे—

घ्रो बोयद् (१६६ सू०)। मेबोयानद् घ्रापयतीत्यर्थः। भूतेऽर्थे बोयान्द अघ्रापयदित्यर्थः। ख्वाहदबोयान्द।

लिह आस्वादने—

लिहो लेसद् (१७१ सू०)। मेलेसानद्। भू० लेसान्द। भ० ख्वाहद-लेसान्द।

चमु ष शुद्धौ[1]—

१। चमु आचमने इति १७२ सूत्रे पाठो द्रष्टव्यः।

चम श्चशद् (१७३ सू०)। मेचशानद्। भू० चशान्द। भ० ख्वाहद-चशान्द इत्यादि।

खाद भक्षणे—

खादः खोरद् (१७५ सू०)। मेखोरानद्। भू० खोरान्द। भ० ख्वाहद-खोरान्द इत्यादि।

पा पाने—

पिवतेराशामद् (१७७ सू०)। मे आशामानद् इत्यादि।

ग्रह उपादाने—

ग्रहो गीरद् (१७६ सू०)। मेगीरानद्। भू० गीरान्द। भ० ख्वाहद-गीरान्द इत्यादि।

आप् लृ व्याप्तौ—

प्राप्ते रसद् (१८३ सू०)। मेरसानद्। भू० रसान्द। भ० ख्वाहदरसान्द इत्यादि।

गम्लृ गतौ—

गमो रवद् (१८८ सू०)।

रवदो नमिर् इत्यादेशो वक्तव्यः[1] ॥३४६॥

मेरानद् गमयतीत्यर्थः। व्यवस्थया पशुचालन एव मेरानद् इत्यस्य प्रयोगः।

डु लभ ष प्राप्तौ—

लभो यावद् (१८५ सू०)। मेयावानद्। भू० यावान्द इत्यादि।

क्षिप प्रेरणे—

क्षिपोऽन्दाज़द् (१६४ सू०)। मेअन्दाज़ानद् इत्यादि।

व्रज गतौ—

व्रजो गुजरद् (२३६ सू०)। मेगुजरानद्। भू० गुजरान्द। भ० ख्वाहद्गुजरान्द इत्यादि।

१। नमिर् आदेशस्यानुबन्धादिकं नास्ति प्रदर्शितमादर्शेषु।

दन्श दशने—

दन्शो गजद् (२४१ सू०)। मेगजानद् इत्यादि।

चिञ् चयने—

चिञश्चीनद्। (२४३ सू०)। मेचीनानद्। भू० चीनान्द इत्यादि।

परिचिञः शिनासद् (२४५ सू०)। मेशिनासानद्। भू० शिनासान्द इत्यादि।

रुदिर् अश्रुविमोचने—

रुदो गिरीयद् (२४७ सू०)। मेगिरीयानद्। भू० गिरीयान्द इत्यादि।

हस हसने—

हसः खन्दद् (२४६ सू०)। मेखन्दानद्। भू० खन्दान्द इत्यादि।

लङ्घि गतौ—

उल्लङ्घे जहद् (२५१ सू०)। मेजहानद्। भू० जहान्द इत्यादि।

डु धाञ् धारणे—

परिधाञः पोशद् (२५३ सू०)। मेपोशानद। भू० पोशान्द। भ० ख्त्राहदपोशान्द इत्यादि।

दह भस्मीकरणे—

दहः सूजद् (२५५ सू०)। मेसूजानद्। भू० सूजान्द इत्यादि।

वृषु वृष्टौ—

वृषो वारद् (२५७ सू०)। मेवारानद्। भू० बारान्द इत्यादि।

हद् पुरीषोत्सर्गे—

हदो रीयद् (२५६ सू०)। मेरीयानद्। भू० रीयान्द इत्यादि।

मूत्रि मूत्रोत्सर्गे[१]—

मूत्रेः शाशद् (२६१ सू०) मेशाशानद्। भू० शाशान्द।

छिदिर् द्विधाकरणे—

१। नास्ति आदर्शेषु।

छिदो बुर्रद् (२६३ सू०)। मेबुर्रानद्। भू० बुर्रान्द।

भिदिर् विदारणे—

भिदिरस्तरकद् (२६५ सू०)। मेतरकानद्। भू० तरकान्द इत्यादि।

दृञ् विदारणे—

दृञो दर्रद् (२६७ सू०)। मेदर्रानद्। भू० दर्रान्द इत्यादि।

कृष विलेखने—

कृषः कशद् (२६९ सू०)। मेकशानद्। भू० कशान्द।

पत्लृ पतने—

पतो यफ्तद् (२७१ सू०)। मेयफ्तानद इत्यादि।

चुर स्तेये—

चुरेर्दुज्ददद् (२७५ सू०)। मेदुज्दानद। भू० दुज्दान्द इत्यादि।

चुबि वक्त्रसंयोगे—

चुबेर्बोसद् (२७६ सू०)। मेबोसानद। भू० बोसान्द इत्यादि।

जीव प्राणधारणे—

जीवो जीयद् (२८३ सू०)। मेजीयानद् इत्यादि।

तनू तनूकरणे—

तद्यन्ते स्तराशद् (२८५ सू०)। मेतराशानद् इत्यादि।

यभ मैथुने—

यभो गायद् (२८७ सू०)। मेगायानद् इत्यादि।

टु वेपृ कम्पने—

वेपो लर्जद् (२८९ सू०)। मेलर्जानद। भू० लर्जान्द।

कल संख्याने—

कलः शुमारद् (२९१ सू०)। मेशुमारानद् इत्यादि।

स्यन्दू स्रवणे—

स्यन्दश्चकद् (२९३ सू०)। मेचकानद्। भू० चकान्द इत्यादि।

नृती गात्रविक्षेपे—

नृतो रक्सद् (२६५ सू०)। मेरक्सानद इत्यादि।

भ्रमु चलने—

भ्रमो गर्दद् (२६७ सू०)। मेगर्दानद्। भू० गर्दान्द। भ० ख्वाहद गर्दान्द इत्यादि।

खनु अवदारणे—

खनः कनद् (२६६ सू०)। मेकनानद्।

वेञ् तन्तुसन्ताने—

वेञो बाफद् (३०३ सू०)। मेबाफानद् इत्यादि।

बुध अवगमने—

बुधः फहमद् (३०७ सू०)। मेफहमानद्। भू० फहमान्द। भ० ख्वाहदफहमान्द इत्यादि।

रिचिर् विरेचने—

रिचो रेयद् (३०६ सू०)। मेरेयानद् इत्यादि।

तप सन्तापे—

तपस्तावद् (३११ सू०)। मेतावानद्। भू० तावान्द इत्यादि।

राजृ दीप्तौ—

राजो येवद् (३१३ सू०)। मेयेवानद्। भू० येवान्द इत्यादि।

चर भक्षणे—

चरश्चरद् (३१७ सू०)। मेचरानद्। भू० चरान्द।

क्षल शौचे—

प्रक्षालेः शोयद् (३२१ सू०)। मेशोयानद्।

कथ निष्पाके—

कथेर्जोशद् (३२७ सू०)। मेजोशानद्।

क्रुञः कुनद (२०१ सू०)। मेकुनानद् इत्यादि।

वेः क्रीञः फरोशद् (२०४ सू०)। मेफरोशानद् इत्यादि।

क्रीञः खरद् (२०६ सू०)। मेखरानद् इत्यादि।

उपाद्विशो निशीनद् (२१० सू०)।

अनमि निशीनदो निश इत्यादेशो वक्तव्यः ॥ ३५० ॥

मेनिशानद । भू० निशान्द इत्यादि ।

सृगतौ—

सर्त्ते र्दवद् (२१४ सू०)। मेदवानद् । भू० दवान्द ।

उदः स्थः खेजद (२१६ सू०)। उदो बर (२१६ सू०)। बर मेखेजानद ।

ज्ञो दानद (२२३ सू०)। मेदानानद । दानान्द इत्यादि ।

लिखो नवीसद (२२७ सू०)। मेनवीसानद । भू० नवीसान्द इत्यादि ।

स्वपः ख्वावद (२२९ सू०)। मेख्वावानद् । भू० ख्वावान्द इत्यादि ।

मृङो मीरद (२३५ सू०)। मेमीरानद् । भू० मीरान्द इत्यादि यथासम्भवं प्रयोक्तव्यमिति ।

इति श्रीमदकबरशाहकारिते विहारिकृष्णदासमिश्रकृते पारसीकप्रकाशे आख्यातप्रकरणम् ।

अथ कृत्प्रकरणं निरूप्यते ।

अहङ् कर्त्तरि ॥ ३५१ ॥

कर्त्तर्यर्थे धातोरहङ् प्रत्ययो भवति ।

ये त्यादौ ते कृति ॥ ३५२ ॥

धातूनां त्यादौ परे ये ये आदेशा उक्तास्ते ते कृत्प्रत्यये परे भवन्ति पारसीकभाषायाम् । डु कृञ् करणे—कृ अहङ् इति स्थिते—अङ् उच्चारणार्थः । कृञः कुनद् (२०० सू०)। मेकुनद् इति वाक्ये कुनन्दह् कर्त्ता इत्यर्थः ।

क्वचिन्नकारागमो वक्तव्यः ॥ ३५३ ॥

गम्लृ गतौ । गमो रवद् (१८८ सू०)। रवन्दह् गन्तेत्यर्थः । डीङ् विहायसा गतौ ।

डीडो पररद् ।

मेपररद् पररन्दह् । भ्रमु अनवस्थाने । भ्रमो जुम्बद् (३४३ सू०) । मेजुम्बद् जुम्बन्दह् चल इत्यर्थ । श्रु श्रवणे । शृणोतेः शिनवद् (१६४ सू०) । मेशिनवद् शिनवन्दह् श्रोतेत्यर्थः । ब्रूञ् व्यक्तायां वाचि । ब्रूञो गोयद् (१६८ सू०) । मेगोयद गोयन्दह् वक्तेत्यर्थः । दृशिर् प्रेक्षणे । दृशो वीनद् । मेवीनद् वीनन्दह् द्रष्टा इत्यर्थः । क्षुध् बुभुक्षायाम् ।

क्षुध्यते गुरुस्न् ।

गुरुस्नह् क्षुधित इत्यर्थः । ञि तृषा पिपासायाम् ।

तृष्यते स्तिश्नद ।

तिश्नन्दह् तृषित इत्यर्थः । घ्रा गन्धग्रहणे । घ्रो वोयद । मेवोयद वोयन्दह् घ्रातेत्यर्थः इत्यादि ।

क्वचिद्भावे चाहङ् ॥ ३५७ ॥

जृभि गात्रविनामे ।

अहङि जृभेः खम्याज् ॥ ३५८ ॥

जृभ धातोः खम्याज् इत्यादेशो भवति अहङि प्रत्यये परे पारसीक-भाषायाम् । खम्याजह् जृम्भेत्यर्थः ।

कासृ शब्दकुत्सायाम्—

काशेः सुर्फ् ॥ ३५९ ॥

काशधातोः सुर्फ इत्यादेशो भवति भावेऽर्थे अहङि प्रत्यये परे । सुर्फह् काश इत्यर्थः । हिल हाव करणे । हिलह् कपटमित्यर्थः । कुच सङ्कोचे—

कुचेः कुञ्च्[१] ॥ ३६० ॥

कुचधातोः कुञ्च इत्यादेशो भवति भावेऽर्थे अहङि प्रत्यये परे । कुञ्चह् सङ्कोचनमित्यर्थः । जृ वयोहानौ—

जीर्य्यतेः कोह्न् ॥ ३६१ ॥

कोह्न् पुराणमित्यर्थः ।

---

१ । कूज् इति वा भवेत् ?

ह्री लज्जायां—

ह्रियो हय् । ३६२ ॥

हयद् लज्जेत्यर्थः ।

तकि कृच्छ्रजीवने—

तकस्तकिय ॥ ३६३ ॥

तकियद् अवलम्ब इत्यर्थः ।

तिग् जिघांसायाम्—

तिकद् खण्डमित्यर्थः । यम उपरमे—

यमोद्वित्वमहङि ॥ ३६४ ॥

यमयमद्[1] ।

भृजी भर्ज्जने—

भृजेर्बिरिय् ॥ ३६५ ॥

बिरियद् भर्ज्जनमित्यर्थः इत्यादि ।

कर्म्मण्युपपदे धातोर्ड्वि ॥ ३६६ ॥

धातोर्ड्वि प्रत्ययो भवति कर्म्मण्युपपदे सति । ग्रहउपादाने ग्रहो गीरद् आलमरा मेगीरद् आलमगीर

ङिति टेर्लोपो वक्तव्यः ॥ ३६७ ॥

वेर्लोपो वक्तव्यः ॥ ३६८ ॥

अनोर्ग्रहो नेवाज् ॥ ३६९ ॥

अनुपूर्वस्य ग्रहधातोर्नेवाजद्[2] इत्यादेशो भवति । घरीवरा मेनेवाजद् घरीवनेवाज् । बन्दह्रा मेनेवाजद् बन्दह्नेवाज् । पाल रक्षणे—

प्रतिपालेः परवरद् ॥ ३७० ॥

घरीवरा मेपरवरद् घरीबपरवर् दीनप्रतिपालक इत्यर्थः । बन्दह्रा मेपरवरद् बन्दह् परवर् ।

---

१ । जमजम इति वा भवेत् ?

२ । नेवायद् इति आदर्शेषु ।

डुधाञ् धारणे—

परिदधातेः पोशद् (२५३ सू०)। सफेदरामेपोशद् सफेदपोश।

बध बन्धने—

बधोबन्दद्। तरकश्रा मेबन्दद् तरकश्बन्द्।

हन् हिंसागत्योः—

हनः कुशद् (२३३ सू०)। आदमरा मे कुशद आदमकुश्।

खाद भक्षणे—

खादः खोरद्। आदमरा मे खोरद् आदमखोर राक्षस इत्यर्थः।

क्वचिदात्वम् ॥ ३७१ ॥

हलालरा मेखोरद् हलालखार एवं हरामखार। एवं शोखनकुन् कूजसाज् इत्यादि।

डा कर्त्तरि॥ ३७२ ॥

धातोर्डा प्रत्ययो भवति कर्त्तरि। मेरवद् रवा।

पारसीके क्वचिदर्द्धानुस्वारागमो वक्तव्यः॥ ३७३ ॥

मेदवद् दवाँ। वाराँ। पदगतो पद्यते पा पाद इत्यर्थः। जवाँ। दमा।

भावे सर्वधातुभ्यो अन् भूतवच्च॥ ३७४ ॥

सर्वधातुभ्योऽन् प्रत्ययो भवति धातूनां भूतेऽर्थे ये आदेशास्ते च स्युः भावेऽर्थे। भू; शुदादेशः अन्प्रत्ययः। शुदन्। घ्रा; वोयीदन्; खाद; खुर्दन्। दीदन्। रफ्तन्। आमदन्। शुनीदन्। ग्रह; गिरिफ्तन्। ब्रूञ्; गुफ्तन्। लिह; लेसीदन्। चुम्बेः; वासीदन्। पा; आशामीदन् इत्यादि।

सर्वधातुभ्यः सर्वार्थे क्विप् वक्तव्यः॥ ३७५ ॥

क्विपः सर्वापहारीलोपः।

इक्षादेर्निगाहादिः॥ ३७६ ॥

ईक्ष दर्शन इत्यादीनां धातूनां निगाह इत्यादिरादेशो भवति क्विपि प्रत्यये परे।

इक्ष दर्शने—

अस्य निगाह् ॥३७७॥

ऊह वितर्के—

ऊहः क्यास् ॥३७८॥

वितर्क इत्यर्थः ।

ष्मिङ् ईषद्धसने—

ष्मिङस्तवस्सुम् ॥३७९॥

तवस्सुम् स्मितमित्यर्थः ।

मान माने—

मानो नाज् ॥३८०॥

नाज् मानमित्यर्थः ।

णु स्तुतौ—

नोस्तारीफ् ॥३८१॥

तारीफ् स्तुतिरित्यर्थः ।

ईश ऐश्वर्य्ये—

ईशः शाह् ॥३८२॥

ईशाते शाह् ईश्वर इत्यर्थः ।

गुज् अव्यक्तशब्दे

क्विपि क्वचित्पूर्वोकारस्य दीर्घता ॥ ३८३ ॥

गूज् अपशब्दइत्यर्थः ।

तिम् आर्द्रीभावे—

तिम्पतेस्तर् ॥३८४॥

तर् आर्द्रमित्यर्थः ।

गु पुरीषोत्सर्गे (तुदादिः)—

गोर्हागमो वक्तव्यः ॥ ३८५ ॥

गुह् विष्ठेत्यर्थः ।

पूज पूजायां चुरादिः ।

पूजेः पोजिश् ॥३८६॥

पूजेत्यर्थः ।

तिज निशाने चुरादिः । तेज् तीक्ष्णमित्यर्थः ।

जजि युद्धे—

जजेर्जङ्ग ॥३८७॥

क्षुभ सञ्चलने

क्षुभो वर् ह्म् ॥३८८॥

वर् ह्म् क्षोभनमित्यर्थः ।

जागृ निद्राक्षये—

जागर्त्तेर्बीदार् ॥३८९॥

बीदार् जाग्रदित्यर्थः ।

दरिद्रा दुर्गतौ—

दरिद्राते मुर्फलिस् ॥३९०॥

मुफलिस् दरिद्र इत्यर्थः ।

शुष शोषणे—

शुष्यतेः खुश्क ॥३९१॥

खुश्क शुष्कमित्यर्थः ।

कृती छेदने—

कृतेः कार्द संज्ञायां ॥३९२॥

कार्द छुरिकेत्यर्थः ।

क्विपि कर्म्मण्युपपदे गोयदादेर्यदो लोपो वक्तव्यः ॥ ३९३ ॥

सखुन्गो, पारसीगो, कानूनगो, यावगो, किस्सहगो । आदिशब्दात् मुर्दहशो इत्यादि । अकर्म्मण्युपपदे तु गोया डाप्रत्यय एव इत्यादि ।

कर्ज्ज व्यथने—

कर्ज्जः कर्ज ॥३९४॥

कर्ज्ज ऋणमित्यर्थः ।

वर्फ गतौ (भ्वादिः)—

वर्फो वर्फ् ॥३९५॥

वर्फ् हिममित्यर्थः ।

रञ्ज् रागे—

रञ्जो रङ्ग् ॥३९६॥

रङ्ग् श्वेतादिः ।

शासु अनुशासने—

शास्तेः श्यासतिः ॥३९७॥

श्यासति शास्तिरित्यर्थः ।

दंश् दशने—

शतृङर्थे चाहङ् ॥३९८॥

दंशो गज़ीद् । गज़ीदह् मेरवद् इत्यादि ।

पारसीकभाषायां यथादर्शनं प्रत्ययागमादेशवर्णविकारनाशविपर्यय-विभाषाविधयः सन्धिशब्दाव्ययकारकसमासतद्धिताख्यातकृत्सु यथाकामं कल्पनीयाः ।

इति महीमहेन्द्रश्रीमदकबरशाहकारिते विहारिकृष्णदासमिश्रकृते
पारसीकप्रकाशे कृत्प्रकरणं समाप्तम् ।
समाप्तश्चायं ग्रन्थः ॥

———

प्रथमं परिशिष्टम्

पारसीक-आरबीय-वर्णमाला

वर्णनाम	स्वतन्त्र-वर्णस्वरूपम्	पदान्ते वर्णस्वरूपम्	पदमध्ये वर्णस्वरूपम्	पदादौ वर्णस्वरूपम्	देवनागर-प्रतिरूपाः
अलिफ्	ا	ـا	ـا	ا	अ
बे	ب	ـب	ـبـ	بـ	ब
पे	پ	ـپ	ـپـ	پـ	प
ते	ت	ـت	ـتـ	تـ	त
से	ث	ـث	ـثـ	ثـ	स़†
जिम्	ج	ـج	ـجـ	جـ	ज
चे	چ	ـچ	ـچـ	چـ	च
हे	ح *	ـح	ـحـ	حـ	ह़†
खे	خ	ـخ	ـخـ	خـ	ख
दाल	د	ـد	ـد	د	द
ज़ाल	ذ	ـذ	ـذ	ذ	ज़†
रे	ر	ـر	ـر	ر	र
जे	ز	ـز	ـز	ز	ज़†
झे	ژ	ـژ	ـژ	ژ	झ

सीन्	س	ـس	ـسـ	سـ	स
शीन्	ش	ـش	ـشـ	شـ	श
शाद्	* ص	ـص	ـصـ	صـ	स़ †
ज़ाद्	* ض	ـض	ـضـ	ضـ	ज़ †
तो	* ط	ـط	ـطـ	طـ	त़ †
ज़ो	* ظ	ـظ	ـظـ	ظـ	ज़े †
यैन	* ع	ـع	ـعـ	عـ	य़ †
ग़ैन	غ	ـغ	ـغـ	غـ	घ
फ़े	ف	ـف	ـفـ	فـ	फ़
क़ाफ़	* ق	ـق	ـقـ	قـ	क़ †
काफ्	ک	ـک	ـکـ	کـ	क
गाफ्	گ	ـگ	ـگـ	گـ	ग
लाम्	ل	ـل	ـلـ	لـ	ल
मीम्	م	ـم	ـمـ	مـ	म
नून्	ن	ـن	ـنـ	نـ	न (ङ, ञ, ण)
वाव्	و	ـو	ـو	و	व
हे	ه ھ	ـه	ـہـ ـھـ	ھـ	ह
ये	ي	ـي	ـيـ	يـ	य

* आरबीयभाषायामेव प्रसिद्धोऽयं वर्णः । अस्योच्चारणादिकमग्रे द्रष्टव्यम् ।

† अस्योच्चारणादिविषये वक्तव्यमग्रे द्रष्टव्यम् ।

हम्ज़ा	ء	प्रकृतिसन्धिद्योतकः (स्वरद्वयस्याव्यवधानेनोपस्थिति-दशायाम्)।
जबर्	َ	अ
जेर्	ِ	इ
पेश्	ُ	उ
मद्द	~	अलिफ्संज्ञकस्य वर्णस्याकारत्वबोधकः।
तश्दीद्	ّ	व्यञ्जनवर्णस्य द्वित्वबोधकः।
जज़्म्	ْ	व्यञ्जनवर्णयोः स्वरानन्तरितत्वबोधकः।

पारसीकास्तु विक्रमसंवत्सरस्याष्टमशतक एव विहाय परम्परागतां पह्लवीसमाख्यां लिपिमारबीयां वर्णलिपिमङ्गीकृतवन्तः। इयं हि अष्टाविंशत्यक्षरमयी सत्यपि पारसीकभाषायामुपयुज्यमानानां वर्णध्वनीनां व्यञ्जनार्थमपर्याप्तेति चत्वारो वर्णा अधिका अस्यां पारसीकैः समावेशिताः। ते پ पे چ चिम् ژ झे گ गाफ् इति। एतेषां वर्णानामारबीयभाषायां प्रयोगो नैव दृश्यते। आरबीयवर्णमालायामपि बह्वो वर्णाः सन्ति येषां सम्यगुच्चारणाय पारसीका भारतीया वा जना नैव समर्था भवन्ति। एतेषामुच्चारणादिकन्तु अग्रे प्रदर्शयिष्यते। आरबीयवर्णसमाम्नायस्तु लिपीनां सादृश्यमनुरुध्यैवेति मन्तव्यम्।

१। पारसीकवर्णमालायां ह्रस्वस्वरबोधनार्थं त्रीणि चिह्नानि परिकल्पितानि सन्ति। यानि खलु व्यञ्जनवर्णसंयुक्तानां ह्रस्वस्वराणां बोधनार्थमुपादीयन्ते। तानि च जबर्-जेर्-पेश्-संज्ञकानि यथाक्रमं व्यञ्जनसंयुक्तानि अ इ उ स्वरबोधकानि भवन्ति। यथा—

بَ = बे + जबर् = ब;
بِ बे + जेर् = बि;
بُ बे + पेश् = बु इति।

२। एतान्येव जवर्ज़ेर्पेश्-संज्ञकानि चिह्नानि अलिफ्-संज्ञक-वर्णसंयुक्तानि यथाक्रमं पदादौ वर्त्तमानानां स्वतन्त्राणां वा अ इ उ स्वराणां बोधकानि भवन्ति। यथा— اَ = अलिफ् + जबर् = अ

اِ अलिफ + जेर् = इ

اُ अलिफ् + पेश् = उ इति।

३। एवमेव आरबीयैरुच्चारणयोग्यस्य ع यैनसंज्ञकवर्णबोधितस्य अकारसदृशवर्णस्य प्रयोगेणापि य़-यि़-यु-सदृशध्वनीनां बोधो जायते।

यथा عَب = यैन + जबर् + वे = य़ब्

عِب यैन + जेर् + वे = यि़ब्

عُب यैन + पेश् + वे = यु़ब्

अस्य यैन-संज्ञकस्य वर्णस्योच्चारणन्तु आरबीयैरेव सम्यक् क्रियते। अस्माभिस्तु विलक्षणस्य तस्य वर्णस्य लिप्यन्तरसमारोपणे देवनागर-प्रतिरूपत्वेन य़वर्ण एवात्र निर्दिष्टः।

४। (१) दीर्घस्वरेषु आकारस्य व्यञ्जनसंयुक्तस्य बोधनार्थमव्यवहित-पूर्वे व्यञ्जने जबर्चिह्नः प्रयोक्तव्यः। तदव्यवहितोत्तरञ्च अलिफ्-संज्ञको वर्ण उपादेयः। अत्र अलिफ् संज्ञकस्तु जज़्म् चिह्नयुक्तः कार्यः। जज़्म्-चिह्नस्य विवरणम् अग्रे द्रष्टव्यम्। तथा च وَاْ = वाव + जबर् + अलिफ + जज़्म् = वा।

(२) एवम् ईकारस्य व्यञ्जनसंयुक्तस्य बोधनार्थञ्च अव्यवहितपूर्वे व्यञ्जने जेर्-चिह्नस्तदव्यवहितोत्तरञ्च ये संज्ञको वर्णः प्रयोक्तव्यः। अयमपि ये संज्ञको वर्णो जज़्म चिह्नयुक्तः कार्यः। तथा च وِيْ आव् + जेर + ये + जज़्म = वी।

(३) तद्वद् ऊकारस्य व्यञ्जनसंयुक्तस्य बोधनार्थम् अव्यवहितपूर्वे व्यञ्जने पेश्चिह्नस्तदव्यवहितोत्तरञ्च वाव्संज्ञको वर्णो जज़्म्-चिह्नितः प्रयोक्तव्यः। तथा च—

رُوْ = रे + पेश् + वाव् + जज़्म् = रू

५। (क) स्वतन्त्रस्य पदादौ वर्त्तमानस्य वा आकारस्य बोधनार्थम् अलिफ्-संज्ञको वर्णो मद्दचिह्नयुक्तः कार्यः। मद्दचिह्नविवरणम् अग्रे द्रष्टव्यम्। यथा آ = अलिफ्+मद=आ।

(ख) स्वतन्त्रस्य पदादौ वर्त्तमानस्य वा ईकारस्य बोधनार्थञ्च अलिफ् संज्ञको वर्णो जेर्चिह्नयुक्तोऽनन्तरञ्च ये संज्ञको वर्णो जज़्म्-चिह्नयुक्तः प्रयोक्तव्यः। यथा اِیْ = अलिफ्+जेर्+ये+जज़्म्=ई।

(ग) स्वतन्त्रस्य पदादौ वर्त्तमानस्य वा ऊकारस्य बोधनार्थम् अलिफ्-संज्ञको वर्णः पेश्चिह्नितोऽनन्तरञ्च वाव्संज्ञको वर्णो जज़्म्-चिह्नयुक्तः कार्यः। यथा اُوْ = अलिफ़्+पेश्+वाव्+जज़्म्=ऊ।

६। (१) सन्ध्यक्षरेषु व्यञ्जनसंयुक्तस्य एकारस्य बोधनार्थं व्यञ्जन-वर्णाव्यवहितोत्तरं ये संज्ञको वर्णः प्रयोक्तव्यः।

यथा— شیر =शीन्+ये+रे=शेर्।

(२) तत्र व्यञ्जनसंयुक्तस्य ओकारस्य च बोधनार्थं व्यञ्जनवर्णानन्तरं वाव्-संज्ञको वर्णः प्रयोक्तव्यः। यथा मोर=पिपीलिका। अस्य लिखनार्थं

مور =मीम्+वाव्+रे=मोर्।

ए-ओ इत्यनयोः सन्ध्यक्षरयोर् आरबीयभाषायां प्रयोगाभावात् तद्देशीयैरेतयोर् मझूल्=अज्ञात इति संज्ञा कृतास्ति।

(३) तथैव ऐकारस्य व्यञ्जनसंयुक्तस्य बोधनार्थं व्यञ्जनवर्णो जबर्-चिह्नो देयः। अनन्तरञ्च ये-संज्ञको वर्णः प्रयोक्तव्यः।

यथा سَیر =सीन्+जबर्+ये+रे=सैर।

(४)। औकारस्य व्यञ्जनसंयुक्तस्य बोधनार्थं व्यञ्जनवर्णो जबर्चिह्न देयं तदनन्तरञ्च वाव्-संज्ञको वर्णः प्रयोक्तव्यः।

यथा قَوم =क़ाफ़्+जबर्+वाव्+मीम्=क़ौम्।

(५) स्वतन्त्राणां पदादौ वा वर्त्तमानानाम् एतेषां सन्ध्यक्षराणां लिखनार्थं यथाक्रमं ایـ =ए। او =ओ। अत्र अलिफ्संज्ञको वर्णो जबर्चिह्नरहितः।

اَے = ऐ। اَو = औ। अत्र च जबर्-चिह्नयुक्तोऽलिफ-संज्ञको वर्णो इति विभावनीयम्।

७। पारसीकभाषायां सन्धिकार्याभावाद् यत्र पदे द्वयोः स्वरयोरव्यवधानेनोपस्थितिर्दृश्यते तत्रोत्तरस्य स्वरस्य स्थाने हम्जासंज्ञकं चिह्नं प्रयुज्यते।

यथा— پائے = पाए। अत्र پاے इति नैव लिख्यते। अथवा فائِد = फाइद। अत्र च فايِد इति तु न लेखनीयम्।

८। प्राचीनपारसीकभाषायां दशैव स्वरा आसन्। ते च—

अ اَ, आ آ, इ اِ, ई اِی, उ اُ, ऊ اُو, ए اے, ओ او, ऐ اَے, औ اَو इति

एतेषां स्वतन्त्राणां पदादौ वर्त्तमानानां वा रूपम्। पदमध्यस्थानाम् एतेषां रूपमपि—

बद् بَد, बाद् باد, बिद् بِد, बीद् بِید, बुद् بُد, बूद् بُود, बेद् بید, बोद् بود, बैद् بَید, बौद् بَود इति

ज्ञेयम्।

(क) पदादौ स्वतन्त्रस्य वा आकारस्य लिखनार्थं मद्संज्ञकं चिह्नम् उपयुज्यते इति तु प्रागेव कथितम्। तच्च अलिफ्-संज्ञकवर्णोपरि तिर्यक्-स्थितम् آ एतादृशं भवति।

पदमध्ये पदान्ते वा केवलेन अलिफ्-संज्ञकेनैव वर्णेन आकारस्य बोधो भवेदिति मन्तव्यम्।

९। जज़्म्-चिह्नं खलु अव्यवहितयोर्व्यञ्जनयोः स्वरानन्तरितत्वबोधकं भवति। तच्च अव्यवहितयोर्द्वयोः पूर्ववर्त्तिनो वर्णस्योपरि ْ एतादृशं चिह्नरूपं भवति।

१०। तश्दीद्-चिह्नं पदमध्यवर्त्तिनो व्यञ्जनस्य द्वित्वबोधकं भवति। यथा 'तद्देवानाम्' इत्यादौ 'द' वर्णस्य लिखनार्थम्। تدّیوانام

दाल संज्ञकवर्णोपरि ؘ एतादृशं चिह्नम् आवश्यकं भवति।
यद्यप्येतानि तत्तदर्थबोधकानि चिह्नानि शास्त्रनिर्दिष्टानि वर्त्तन्ते, तथापि लिखनकाले मुद्रणकाले वा एतेषां प्रयोगः केनापि कदाचिदपि क्रियत इति मन्तव्यम्।

ततश्च पारसीकाक्षरमात्रकृतपरिचयैर्जनैर्लिखितानां मुद्रितानां वा ग्रन्थानां पाठोऽसम्भवोऽत्यन्तायाससाध्यो वा भवतीति स्पष्टम्।

११। इदानीं विलक्षणोच्चरितानां पारसीकारबीयानां वर्णानाम् उच्चारणमेव यथामति प्रदर्श्यते।

ث से = स॑ अस्योच्चारणन्तु पारसीकैर्भारतीयैर्वा दन्त्यसकारतुल्यमेव क्रियते। आरबीयास्तु अस्योच्चारणं cuthbert शब्द-मध्यस्थस्य th वर्णस्य तुल्यमेव कुर्वन्ति। कदाचिच्च दन्त्यसकारतुल्यमपीति ज्ञेयम्।

ح हे = .ह पारसीकैरस्योच्चारणं हकारतुल्यमेव क्रियते। परन्तु आरबीया अस्योच्चारणम् अधःकण्ठात् कुर्वन्ति।

ذ ज़ाल् = ज पारसीकोच्चारणं खल्वस्य वर्णस्य ऊष्मजकारतुल्यमेव भवति। परन्तु आरबीया ऊष्मदन्त्यत्वेनैव इमं वर्ण-मुच्चारयन्ति।

ز जे = ज′ अयमपि ऊष्मजकारतुल्यमेवोच्चार्यते पारसीकैः।

ژ झे = झ़ अस्योच्चारणमपि ईषदूष्मझकारतुल्यं ज्ञेयम्।

ص साद् = स़ अयन्तु दन्त्यसकारतुल्यमेवोच्चार्यते पारसीकैर्भारतीयैश्च। आरबीयानान्तु अस्योच्चारणं सोष्म d, dt-तुल्यं वा भवति।

ض ज़ाद = ज़ अस्योच्चारणन्तु पारसीकैः सोष्मजकारतुल्यमेव क्रियते।

ط तो = त़ अयन्तु पारसीकैस्तकारतुल्य एवोच्चार्यते।

ظ ज़ो = ज़ अस्योच्चारणं सोष्मजकारतुल्यमेव पारसीकैः क्रियते।

ع यैन्=य़ अयन्तु अकारतुल्यः। परन्तु अधःकण्ठादुच्चार्यमाणत्वात् ततो विलक्षणो ज्ञेयः।

ق काफ़्=क़ अयं अधःकण्ठप्रदेशादुच्चार्यमाणः ककारतुल्य एव मन्तव्यः।

ن नून्=न आरबीयवर्णमालायां ङ-ञ-ण-वर्णानां अभावोऽवगन्तव्यः। अयञ्च नकारतुल्यो वर्णः पदानामादौ मध्ये वा नकारसदृश एवोच्चार्यते। परं दीर्घस्वरवर्णोत्तरमस्योच्चारणन्तु चन्द्रबिन्दु ँ सदृशमेव भवतीति मन्तव्यम्।

ه हे=ह अयं हकारतुल्यः सन्नपि पदान्तेऽकारोत्तरं वर्त्तमानश्चेद् अनुच्चरितप्राय एव तिष्ठति।

पारसीकप्रकाशे

द्वितीयं परिशिष्टम्

(व्याकरणविषयकम्)

अत्र कविकर्णपूरकृतपारसीकपदप्रकाशतोऽन्यतश्च व्याकरण-विषयकाणि नियमानि तुलनार्थं प्रदर्श्यन्ते ।

(शब्दरूपप्रकरणे)

१ । एकत्वे प्रकृतं रूपं शब्दानां परिकीर्त्तितम् । इति पार० पदप्रकाशे ५१२ श्लो०
अनेन ४२ सूत्रं तुल्यम् ।

२ । आन् अन्तश्च तथा हा अन्तं बहुत्वे रूपमिष्यते । इति पार० प० प्र० ५१३ श्लो०
अनेन ४४, ४५, ४७ सूत्राणि तुल्यानि ।

३ । द्वितीयान्तपदं रान्तम् । इति पार० प० प्र० ५१४ श्लो०
अनेन ४६ सूत्रं तुल्यम् ।

४ । बपूर्वं वा इति पार० प० प्र० ५१५ श्लो०
अनेन ७६ सूत्रं तुल्यम् ।

५ । कुत्रापि प्रकृतं रूपं इति पार० प० प्र० ५१६ श्लो०
अनेन ७५ सूत्रं तुल्यम् ।

६ । तृतीयान्तं तु वा पूर्वम् इति पार० प० प्र० ५१७ श्लो०
अनेन ४९ सूत्रं तुल्यम् ।

७। बरायूपूर्व बपूर्व वा चतुर्थ्यन्तञ्च रान्तकम्।
इति पार० प० प्र० ५१८ श्लो०
अनेन ५१, ७६ सूत्रे तुल्ये।
अत्र ५० सूत्रानुसारं तृतीयाविभक्तावेव पदानां बपूर्वकत्वं विभाषया भवतीति मन्तव्यम्।

८। पञ्चम्यन्तपदं सर्वं अज्पूर्वं बादि च क्वचित्। इति पार० प० प्र० ५२० श्लो०
अनेन ५२ सूत्रं अंशतस्तुल्यम्।
पञ्चम्यन्तपदानां बादित्वं नैव प्रदर्शितं ग्रन्थकारेणेति मन्तव्यम्।

९। रान्तं षष्ठ्यन्तमुद्दिष्टम् इति पार० प० प्र० ५२३ श्लो०
अनेन ४६ सूत्रं तुल्यम्।

१०। सप्तम्यन्तन्तु दर्पूर्वम् इति पार० प० प्र० ५२४ श्लो०
अनेन ५३ सूत्रं तुल्यम्।
अत्र ५४ सूत्रानुसारं बर् पूर्वत्वमपि सप्तम्यन्तपदानां भवतीति ग्रन्थे दृश्यते।

(समासप्रकरणे)

१। तत्पुरुषस्तत्र प्रथमान्तं तु पूर्वगम्। इति पार० प० प्र० ५०० श्लो०
अनेन ६२ सूत्रतात्पर्यं स्पष्टीभूतमिति मन्तव्यम्।

२। चार्थे द्वन्द्वः पारसीकभाषायां स न विद्यते। इति पार० प० प्र० ५०५ श्लो०
अनेन ६३ सूत्रं तुल्यम्।
परं सरूपाणामेकशेषे त्वनापत्त्या प्रयुज्यत इति पार० प० प्र० ५०७ श्लोके एकशेषस्तु स्वीकृतः।

३। आनन्दत्रासशोकादौ पदं द्विस्त्रिश्च कीर्त्यते। इति पार० प० प्र० ५०८ श्लो०

अनेन ९८ सूत्रार्थः स्पष्टतरो जातः।

(तद्धितप्रकरणे)

१। अपत्यार्थे शब्दपश्चात् जादह्-शब्दो भवेद्
इति पार० प० प्र० ४८१ श्लो०

अनेन ९९ सूत्रं तुल्यम्।

२। रक्षत्यर्थे तु बान् स्यात् इति पार० प० प्र० ४८३ श्लो०

अनेन ११३ सूत्रं तुल्यम्

३। सदृशार्थेऽपि बान्, वान् प्रत्ययौ भवतः। यथा पूलबान् पर्वान इत्यादि।

तदस्यास्तीत्यर्थे तु कदाचित् बान् प्रत्ययो भवति। यथा मिह्रबान् इत्यादि उन्नेयम्।

४। तदस्यास्तीति दार् स्यात्। इति पार० प० प्र० ४८४ श्लो०

५। तदस्यास्तीत्यर्थे ऊन् प्रत्ययो भवति। यथा हुमायून्, गर्दून् इत्यादि।

६। तदस्यास्तीति मन्द् स्यात्। इति पार० प० प्र० ४८५ श्लोकस्योदाहरणबलात् प्रत्ययस्वरूपमुन्नेतुं शक्यते।

अनेन ११४ सूत्रार्थोऽपि तुलयितुं योग्यः।

७। तज्जनयतीत्यर्थे नाक्-प्रत्ययो दृश्यते।

यथा दर्द जनयतीति दर्दनाक्। घर्मं जनयतीति घर्म्नाक इत्यादि।

८। तस्य तत् स्थानमित्यर्थे स्तान् शब्द इति पार० प० प्र० ४८५ श्लो०

अनेन १०४ सूत्रं तुल्यम्।

अत्र स्वरान्तेभ्यः शब्देभ्यः स्तान्-प्रत्ययः स्यात्।

व्यञ्जनान्तेभ्य इकारागमश्च १०५ सूत्रानुसारं भवेदिति मन्तव्यम्।

क्वचित् कालबोधकोऽपि स्तान्-प्रत्ययो दृश्यते। यथा ताबिस्तान् ग्रीष्मर्त्तुः।

६। द्वयोर्मध्ये बहूनां वा तर् स्यादतिशयार्थके। इति पार० प० प्र० ४८७ श्लो०

अनेन १२७ सूत्रं तुल्यम्।

१०। तेन निर्मित इत्यर्थे शब्दात् ई इति पार० प० प्र० ४८६ श्लो०

अनेन ११५ सूत्रं तुल्यम्।

११। क्वचित्तद्धर्मे इत्यर्थे नाम्न ई इति पार० प० प्र० ४६१ श्लो०

अनेन १०१, १०२ सूत्रे तुल्ये।

१२। ई क्वचित्तत्र जातेऽर्थे इति पार० प० प्र० ४६३ श्लो०

अनेन १०० सूत्रं तुल्यम्।

१३। ई क्वचित् कर्मभावार्थे इति पार० प० प्र० ४६४ श्लो०

अनेन १०३ सूत्रं तुल्यम्।

१४। अल्पतुच्छनिन्दार्थे कः इति १२५ सूत्रम्। तत्र 'क्' 'कह्' (क) इति च प्रत्ययद्वयं Phillot सम्मतम्। कह् (क) प्रत्ययस्तु निन्दार्थक एव। यथा मर्दक इत्यादौ।

१५। 'ह्' (अह्) प्रत्ययोऽपि तुच्छार्थे दृश्यते पारसीकभाषायाम्। यथा—पिसर, दुख्तर इत्यादि।

१६। अल्पार्थे चह् (च) इति १२४ सूत्रम्। तत्र आकारान्तानां शब्दानां अल्पार्थे चह् (च) प्रत्ययो वेदितव्य इति Phillot.

अप्राणिवाचकानां शब्दानां अल्पार्थे तु चह् (च) प्रत्ययो भवति क्-प्रत्ययो वा। क्वचित् स्वार्थेऽपि क्-प्रत्ययो दृश्यते। यथा जलूक् जलौका इत्यर्थः।

१७। गुनाहाद् गार् कृतवानित्यर्थे इति ११७ सूत्रम्।

तत्र अन्येभ्योऽपि शब्देभ्यो गार्-प्रत्ययः कृतवानित्यर्थे दृश्यते। यथा खिद्मत्गार इत्यादि।

कृतवानित्यर्थे कार्-प्रत्ययोऽपि दृश्यते यथा–बद्कार्, जफाकार् इत्यादि ।

१८। तत्सदृशार्थे सा आसा वा भवेत्। यथा अम्बर (सुगन्धि-द्रव्यविशेषः) सदृश इति अम्बर्सा। मुश्क (मृगनाभिः) सदृशो मुश्कासा इत्यादि ।

१९। तत्सदृशार्थे सान्-प्रत्ययो भवति। यथा शेर्सान् सिंहसदृशः। खुर्शीद्सान् सूर्यसदृशः इत्यादि ।

२०। तत्सदृशार्थे दीस्-प्रत्ययोऽपि दृश्यते। यथा माह्दीस् चन्द्र-सदृशः इति ।

(आख्यातप्रकरणे)

१। धातूनामाद्यरूपस्य वर्त्तमानार्थयोगिनः।
द स्थाने अन्द्, ई, एद्, म्, एम् पठनात् क्रमात्॥
षड् रूपाणि प्रजायन्ते—इति पार० प० प्र० ३२९ श्लो०
अनेन १३१, १३३, १३४, १३५ सूत्राणि तुल्यानि ।

२। वर्त्तमानार्थरूपाणि मेवर्ज्यानि विभाषया इति पार० प० प्र० ३४५ श्लो०
एतदर्थकं सूत्रं न दृश्यते ग्रन्थे ।

३। नात्र द्विवचनं भवेत् इति पार० प० प्र० ३३२ श्लो०
अनेन १२९ सूत्रभूमिका तुलनीया ।

४। वर्त्तमानविभक्त्यन्ता याः पदस्थितयः स्मृताः।
मेवर्जिता बपूर्वास्ता पञ्चम्यन्ता यथाक्रमम्॥
इति पार० प० प्र० ३३२, ३३३ श्लो०
अत्र पञ्चमी लोट्बोधिका ।
अनेन १३९ सूत्रं तुल्यम् ।

५। द्विस्थाने तु विशेषोऽयं दलोपो न च ई भवेत्।

इति पार० प० प्र० ३३३ श्लो०

अनेन १४० सूत्रं तुल्यम् ।

६ । लोट् रूपाणि बवर्ज्यानि पक्षे स्युः । इति पार० प० प्र० ३२७ श्लो०

अनेन १३६ सूत्रं तुलनीयम् ।

७ । धातूनामाद्यरूपं यदतीतार्थेऽत्र वक्ष्यते ।
तदन्ते अन्द् , ई, एद् , म् , एम् विनियोजनात् ॥
अन्यानि पञ्च रूपाणि—इति पार० प० प्र० ३३५, ३३६ श्लो०
अनेन १४२-१४६ सूत्राणि तुल्यानि ।

८ । आद्यरूपमतीतार्थे धातूनां वक्ष्यते तु यत् ।
तत् खाहद्, खाहन्द पूर्वं······षड्विभक्त्यर्थबोधकम् ॥
क्रमाद् भविष्यत्कालार्थे—इति पार० प० प्र० ३३८, ३३६ श्लो०
आभ्यां १४८-१४६ सूत्रे तुल्ये ।

६ । भूतार्थे यानि रूपाणि मे पूर्वाणि भवन्ति चेत् ।
क्रियातिपत्तौ ज्ञेयानि--इति पार० प० प्र० ३४२ श्लो०
अनेन १४७ सूत्रं तुल्यम् ।

(कृत्प्रकरणे)

१ । अतीतार्थे तु यद्रूपं प्रथमं परिकीर्त्तितम् ।
तन्नान्तं स्वस्वभावार्थे धातूनाम्—इति पार० प० प्र० ४६० श्लो०
अनेन ३७४ सूत्रं तुल्यम् ।

२ । पक्षे ईकारान्तं क्वचिद् भवेत् । इति पार० प० प्र० ४६३ श्लो०
एतत्समानार्थकं सूत्रं न दृश्यते ।

३ । धातूनां लोटि हौ रूपं पूर्वोक्तं बविवर्जितम् ।
इश् अन्तं स्वस्वभावार्थे
इति पार० प० प्र० ४६४-४६५ श्लो०

एतत्समानार्थकं सूत्रं न दृश्यते।

४। अतीतार्थे त्वाद्यरूपं हान्तं क्त्वार्थकं भवेत्। इति पार० प० प्र० ४६७ श्लो०

एतत्समानार्थकं सूत्रं नास्ति।

५। अतीतार्थे शुद्धरूपं क्तार्थं (निष्ठा) स्यात्पारसीमते। इति पार० प० प्र० ४६८ श्लो०

एतत्समानार्थकं सूत्रं नास्ति।

६। धातूनां लोटि हौ रूपं पूर्वोक्तं बविवर्जितम्।
इन्दह् अन्तं तत्तदर्थकर्त्रेत्याद्यर्थवाचकम्॥
इति पार० प० प्र० ४७० श्लो०
अनेन ३५१-३६५ सूत्राणि तुल्यानि।

७। बवर्जे लोटि हौ रूपं नाम पश्चाद् भवेद् यदि।
तत्तत्करोतीत्यर्थे—इति पार० प० प्र० ४७४, ४७५ श्लो०
अनेन ३६६-३८१ सूत्राणि तुल्यानि।

८। धातूनां लोटि हौ रूपं प्रागुक्तं बविवर्जितम्।
आन् अन्तं सर्वधातूनां शतृन्नर्थप्रकाशकम्॥
इति पार० प० प्र० ४७७, ४७८ श्लो०,
अनेनु ३७२-३७३ सूत्रे तुल्ये।

———

पारसीकप्रकाशः

तृतीयं परिशिष्टम्

धातूनां नद् ॥ १

सर्वेषां धातूनां न+अद् आगमः स्यादाख्यातविभक्तौ परतः पारसीकभाषायाम् । निदन्ते वक्तव्यम् । आर्ज्+अद्=आर्जद् ।

आयः यस्य मः भूते ॥ २

आय् इत्यस्य धातोः भूतेऽर्थे यकारस्य मकारः स्यात् । आमद् ।

जनः सोपधस्य नस्य लोपः ॥ ३

जंन् इत्यस्य धातोर्नकारस्य सोपधस्य लोपः स्यात् भूतेऽर्थे । जंन्+अद्=जंद् । अनेन अन् इत्यस्य सोपधस्य नस्य लोपः । ततश्च 'धातूनां नद्' इत्यादिना अद् ।

१ । आजादयः

१ । आर्ज् ; to prick with a needle, to sew.; व्यध्, तुद्, छिद्, भिद्, सिव्, व्ये;
वर्त्तमाने—आर्जद् । भूते—आर्जद् । भावे (ल्युटि) आर्जदन् ।

२ । आम्भ् ; to sew; सिव्, व्ये;
वर्त्तमाने—आम्भद् । भूते—आम्भद् । भावे (ल्युटि) आम्भदन् ।

३ । ख्वय् ; to perspire; प्र-स्विद्;
वर्त्त. ख्वयद् । भू. ख्वयद् । भा. ख्वयदन् ।

४ । सित् ; to take, to seize; प्रति-परि-ग्रह्;
सितद् । सितद् । सितदन् ।

५ । हिल् ; to dismiss, abandon; वि-सृज्;
हिलद् । हिलद् । हिलदन् ।

६। आय्; to come, arrive; प्र-संप्र अनुप्र-आप्; आ-या;
आयद्। आमद्। आमदन्।

७। ज़न्; to strike, beat; आ-हन्;
जनद्। जद्। जदन्

इस्तादीनां नाद् भूते ॥ ४

इस्तादीनां धातूनां न्+आद् आगमः स्याद् भूतेऽर्थे। इस्ताद्

आमायादीनां डाद् वक्तव्यम् ॥ ५

आमायादीनान्तु भूतेऽर्थे ड्+आद् आगमः स्यात्। डिति टेर्लोपः। आमायादयः आमाय्, जाय्, कुशाय्, गाय्, सितान्, दिह् इति। आमाद् इत्यादि।

२। इस्तादयः

१। इस्त; ईस्त्; to stand; स्था, अवतिष्ठ्, स्तम्भ्, उपतिष्ठ्;
इस्तद्। इस्ताद्। इस्तादन्।
ईस्तद्। ईस्ताद्। ईस्तादन्।

२। उफ़्त्; to fall, to happen; घट्, निपत्, आपत;
उफ़्तद्। उफ़्ताद। उफ़्तादन्।

३। फ़िरिस्त्; फरिस्त्; to send; प्र-हि, सं-प्रेष्;
फिरिस्तद्। फिरिस्ताद्। फिरिस्तादन्।
फरिस्तद्। फरिस्ताद्। फरिस्तादन्।

४। फ़ुत्; to fall; पत्;
फ़ुतद्। फ़ुताद्। फ़ुतादन्।

५। निह्; to place, apply; संयुज्, न्यस्, विन्यस्, ऋ, संगमि, प्रवेश्;
निहद्। निहाद्। निहादन्।

६। आमा ; आमाय् ; } to prepare, make ready; उपक्लृप्, उपस्कृ, रच्, साध्;

आमाद्। आमाद्। आमादन्।
आमायद्। आमाद्। आमादन्।

७। जा ; जाय् ; } to be born, to beget; जन्;

जांद्। जांद्। जांदन्।
जांयद्। जांद्। जांदन्।

८। कुशा ; कुशाय् ; } to open, to loose, to subdue; अपा-वि-वृ; वशी-कृ;

कुशाद्। कुशाद्। कुशादन्।
कुशायद्। कुशाद्। कुशादन्।

९। गा ; गाय् ; } to copulate; यभ्;

गाद्। गाद्। गादन्।
गायद्। गाद्। गादन्।

१०। सितान्; to stand. to carry away; अव-स्था; अप-वह्;

सितानद्। सिताद्। सितादन्।

११। दिह्; to give; दा;

दिहद्। दाद्। दादन्।

अर्जादीनां नीद् भूतार्थे ॥ ६

अर्जादीनां न् + ईद् आगमः स्याद् भूतेऽर्थे। अर्जीद् इत्यादि।

आफ्रीनादीनां डीद् भूते ॥ ७

आफ्रीनादीनां धातूनां ड् + ईद् आगमः स्याद् भूते। डिति टेर्लोपः।

आफ्रीद् इत्यादि। आफ्रीनादयः— आफ्रीन्, चीन्, बीन्, रीन्, गुजी़न्, रीय्, बालाय् इति।

बीनो बस्य दो भूते ॥ ८

बीन इत्यस्य धातोर्बकारस्य दकारः स्याद् भूतेऽर्थे। बीन् इति स्थिते अनेन् सूत्रेण दीन इति। ततश्च आफ्रीनादीनामित्यनेन् डीद् इति दीद्।

पादीनां यागमो भूते ॥ ९

पादीनां धातूनां यकारागमः स्याद् भूतेऽर्थे। पा इति स्थिते अनेन सूत्रेण यकारागम इति पाय्। अनन्तरञ्च अर्ज़ादीनामिति नीद्, पायीद् इत्यादि। पादयः— पा, ज़ा, गा, रू इति।

३। अर्ज़ादयः॥

१। अर्ज़्; to be worth; अर्ह्, युज्;

अर्ज़द्। अर्ज़ीद्। अर्ज़ीदन्।

२। आम्फ्; to Sew; सिव्, व्यय् ?;

आम्फद्। आम्फीद्। आम्फीदन्।

३। आराम्; to rest, to repose, to appease; विरम्, उपरम, निवृत्, विनिवृत् शमि, शान्त्व्, प्रसाद्, तोषि, अनुनी;

आरामद्। आरामीद् आरामीदन्।

इतः परं सङ्क्षेपानुरोधाद् रूपाणि न प्रदर्शितानि।

४। आराय्; to ornament; भूष्, शुभ्, मण्ड्, रञ्ज्, अलङ्कृ;

५। आसाय्; to rest; विश्रम्;

६। आशाम्; to drink; पा;

७। आघार्; to moisten; क्लिद्, सिच्, उन्द्, उन्द्;

८। आग़ाज़्; to begin, commence; आरभ्, प्रारभ्, प्रक्रम्;

९। आवाल to excite, to satiate; उत्तिज्, उद्दीप्, उत्सह्, प्रवर्त्त्, प्रेरयति, उत्ताप्;

१०। अफ्ज़ाय्; to multiply: वृध्, भूशायते;

११। अफ्शार्; to speak obscenely; अपभाष्;

१२। आमास् to swell, श्वि, उच्छ्व, स्फाय्, वृध्, उपचि;

१३। आमुर्ज़्; to forgive; क्षम्, मुच्, मृष;

१४। अन्दीश्; to consider, think; चिन्त्, विमृश्;

१५। अन्गार्; to compute; विगण्, संख्या, परिसंख्या, कल्;

१६। आवाज़्; to call out; आ-ह्वे

१७। वार्; to rain; वृष् (वर्षति)

१८। वाज्; to play: क्रीड्, रम्;

१९। बाश्; to be, to stand, stay, dwell; नि-प्रति-वस्;

२०। बालाय् to grow, increase; एध्;

२१। बख्श्, to give, bestow, to pardon; दा प्रतिपद्, अवसृज्, मुच्,

२२। बुरान्, to put to flight: विद्राव्;

२३। बुर्; to cut, fell, cleave; वि-निर्-भिद्, अव-छिद्;

२४। बन्द्; to bind, confine: बन्ध्;

२५। बूस्; to kiss; चुम्ब्,

२६। बूय्; to smell; घ्रा;

२७। पाश्; to sprinkle; सिच्; प्र-उक्ष्;

२८। पाय्; to stand firm or still, to hesitate; अव-स्था; वि-आ-शङ्क्;

२९। परस्त्; to worship; उप-आस्;

३०। पुर्स्; to interrogate; प्रच्छ्;

३१। पर्वर्; to bring up; nourish; पाल्;

३२ । पर्; to fly; उत्-डी; पलाय्;

३३ । पज़्; to cook; पच्

३४ । पसन्द्; to approve; अनुमन्; प्रशंस्, रुच्, प्रतिनन्द्; प्रमाणीकृ, विभू,

३५ । पूस्; to rot; वि-गल्;

३६ । पूश्; to hide, to dress; प्रच्छद्;

३७ । पूय्; to search, to run; मृग्; अन्विष्, वि-चि, धाव्;

३८ । पीच्; to twist; मुट् (मोटनं ?)

३९ । ताब्; to shine, to twist; प्र-काश्, वि-द्युत्, मुट् (मोटनं) ?

४० । ताज़्; to attack, to gallop; आक्रम, आसद्, आयुध्, अभिधाव्, अभिप्रया;

४१ । तप्; to palpitate; वेप्, कम्प्, उच्छ्वस्;

४२ । तराश्; to cut; लू, छिद्;

४३ । तराव्; to exude, to leak; स्रु, क्षर्, स्यन्द्;

४४ । तर्स्; to fear; त्रस्,

४५ । तर्क्; to burst; स्फुट्, दृ;

४६ । तफ़्स्; to grow warm; तप्;

४७ । तफ्; to warm; तप्;

४८ । तकान; to shake off; निर्धू, निरस्. त्यज्;

४९ । तन्; to twist, spin ; तन्;

५० । तूज़्; to plunder ; मुष्, चुर्,

५१ । जुम्ब्; to move, stir ; चल्;

५२ । जङ्ग्; to fight ; युध्,

५३ । जूश्; to boil, ferment ; उत्क्वथ्, फेनायते ; उत्सिच्;

५४ । जूय्; to seek ; आ-अभि-कांक्ष्, प्रार्थ्, कम् (कामयते)

५५ । जिह् ; to spring, bound, leap ; उत्पत् , उत्प्लु ;

५६ । जह् ; to jump ; उत्पत् , उत्प्लु ;

५७ । चर् : to graze ; चर् ;

५८ । चस्प् ; to adhere, to slick ; सञ्ज् , अनुबध् ;

५६ । चश् ; to taste : आ-स्वाद् ;

६० । चक् ; to drop, to distil ; स्रु, क्षर् , स्यन्द् ;

६१ । चल् ; to walk, चल् ;

६२ । चम् : to walk gracefully ; चर् , चल् , गम् , परिक्रम् ;

६३ । खार् ; to scratch, to itch ; कृष् , लिख् :

६४ । खामूश् ; to be silent ; वाचं-यम् ;

६५ । खाय् ; to chew, gnaw ; चर्व् , खाद् ;

६६ । खरश् ; to scratch ; कृश् , लिख् ;

६७ । खराम् ; to walk gracefully ; चर् , चल् , गम् , परिक्रम्;

६८ । खुरूश् ; to cry out, exclaim : आ-उत्-क्रुश् ;

६६ । खर् ; to buy ; क्री ;

७० । खज् ; to creep, crawl ; सृप् ;

७१ । खुस्प् ; to sleep ; स्वप् ;

७२ । खस् ; to chew ; चर्व् ;

७३ । खशान; to bite, lacerate, दंश् ;

७४ । खुश्क् ; to dry; शुष् ;

७५ । खफ् ; to sneeze, to be strangled; क्षु, (क्षुत)

७६ । खल् ; to prick, pierce; व्यध् ;

७७ । खम; to be bent, crooked, curved, vaulted; आ-वृज् , वक्रीभू ;

७८ । खुम्ब् ; to beat time; (कालं) क्षिप् ;

७६ । खन्द् ; to laugh; हस् ;

८० । ख्वाब् ; to sleep; स्वप् ;

८१ । खूश् ; to be parched, shrivelled; उत्-शुष् , विशॄ;

८२ । खव् ; to chew the cud; चर्व् ;

८३ । खीज़्; to rise up; उत्था, समुत्था;

८४ । खीस् ; to moisten, to infuse; नि-षिच् ;

८५ । दुरुख्श् ; to shine, to flash; दीप् , भ्राज् , भ्राश् , भ्लाश् ;

८६ । दिरफ़्श् ; to shine, to tremble; स्फुर् , (प्र-वि-स्फुर्);

८७ । दिरवद् ; to reap; लू , छिद्;

८८ । दर् ; to tear; विदॄ, शॄ ;

८९ । दुज़्द् ; to rob, to steal; चुर् , मुष् , लुण्ठ् ;

९० । दम् ; to blow, to grow up, to appear; ध्मा, वृह् , एध् , रुह् ;

९१ । दूस् ; to cement, to plaster; लिप् ; संश्लिष् , संधा;

९२ । दूश् ; to milk, to draw; दुह् ;

९३ । दव् ; to run, to spring up; धाव् , उत्पत् ;

९४ । दीर् ; to break, rend, asunder; दॄ;

९५ । रुबान् ; to seize, to rob; संग्रह् , ग्रस् , आक्रम् , मुष् , लुण्ठ;

९६ । रुबाय् ; to seize, to rob; संग्रह् , ग्रस् , आक्रम् , मुष् , लुण्ठ् ;

९७ । रख्श् ; to shine, flash; दीप् , भ्राज् , भ्राश् , भ्लाश् ;

९८ । रज़् ; to dye, tinge, colour; रञ्ज् ;

९९ । रस् ; to arrive; आगम्, अभिगम्, उपगम् , उपस्था, प्राप् ;

१०० । रम् ; to be scared, to flee; अप-क्रम् , अप-सृ, अप-सृप् ;

१०१ । रन्ज; to be vexed; कुप् , क्रुध् , (वि-रञ्ज् ?)

१०२ । रूब् ; to wipe, sweep; प्र-परि-मृज् ;

१०३। रूय्; to grow, to vegetate; रुह्;

१०४। रह्; to escape, to be liberated; मुच्, उत्-धृ, उत्-हृ;

१०५। रीस्; to twist, to spin; वे;

१०६। जार; to lament, to cry; वि-लप्, रुद्, क्रन्द्;

१०७। जाय्; to be born, to bring forth young; जन्,

१०८। जंक्; to mutter in rage; गर्ज्;

१०९। जंम; to chew; चर्व्;

११०। भूल्; to be entangled, intricate; संश्लिष्, सग्रन्थ्, संबन्ध्, संमिश्र्;

१११। जिंह्; to bring forth young; प्रसू;

११२। जी'ब्; to adorn, to suit; वि-भूष;

११३। साजं; to make; सृज्; घट्, रच्, निर्मा;

११४। साय्; to grind; पिष्; क्षुद्, मृद्, चूर्ण;

११५। सबार्; to plough, break ground; कृष्, भिद्, विदृ;

११६। सिपार्; to give in charge, to recommend; श्लाघ्, प्रशंस्, अनुमन्, अनुमुद्;

११७। सितान्; to carry away; अपवह्, अपनी, अपहृ, अप-ऊह्;

११८। सिताय्; to praise; प्रशंस्, श्लाघ्, ईड्, नु, स्तु;

११९। सितिह्; to contend; स्पर्ध्, विरुध्, विग्रह्;

१२०। सित्; to take, seize; सं-ग्रह्;

१२१। सितिज्'; to contend; स्पर्द्ध;

१२२। सराय्; to sing; to play on a musical instrument; गै, वाद् (वादयति)

१२३। सर्; to sing; गै;

१२४। सजाय्; to be worthy, to suit; अर्ह्, युज्यते, शुभ्;

१२५ । सिकाल्; to think; चिन्त्; ध्यै, विमृश्, आ-लोच्; वि-तर्क;

१२६ । सिगाल्; to think; चिन्त् etc;

१२७ । सगल्; to Sob, to belch; सगद्गदं रुद्, सगद्गदं क्रन्द्; उद्-वम्, उद्-गृ;

१२८ । सिकीर्ज्; to rear, to prance; उत्थाप्, उन्नी, परि-वृध्, परिपुष्, प्लु, वल्ग्;

१२९ । सुम्ब्; to perforate; आ-व्यध्, छिद्रयति, निर्भिद्, उत् कृ;

१३० । सन्र्ज्; to weigh; तुल्, तूल्,

१३१ । सूर्ज्; to burn; to be burned; दह्, प्लुष्, ज्वल्, तप्;

१३२ । सहम्; to dread; भी, त्रस्, उद्विज्;

१३३ । सीच्; to prepare, to arrange; प्र-उप-परि-क्लृप्, सज्जी-कृ, संविधा, विन्यस्;

१३४ । शार्; to flow (as a river) with great noise; प्र-वह्, प्र-स्रु;

१३५ । शाश्; to make water; मूत्र्;

१३६ । शाय्; to be worthy; अर्ह्, युज्;

१३७ । शिताब्; to make haste; त्वर्;

१३८ । शिकन्ज्; to press; नि-पीड्, संपीड्, संहन्. संपिण्ड्;

१३९ । शकीब्; to be patient; सह्, क्षम्;

१४० । शुमार्; to reckon, count; गण्, परि-संख्या, कल् (कलयति);

१४१ । शम्; to be scared, to weep; त्रस्, उद्विज्, रुद्, विलप्;

१४२ । शिनास्; to know, percieve; ज्ञा, विद्, बुध्, अवगम्, अनुभू;

१४३ । शुनव् ; to hear, to smell; श्रु, घ्रा,

१४४ । शूर् ; to be perplexed, to grow mad; मुह्, उन्मद्;

१४५ । शूल् ; to be distracted; आकुलीभू, व्यामुह्, उन्मद् ;

१४६ । शूय् ; to wash ; प्र-क्षल्, प्र-मृज् ;

१४७ । शियार् ; to plough; कृष्, भिद्, विदृ;

१४८ । तराज् ; to embroider; सिव्, (सूच्या पुष्पादिकं);

१४९ । यफ् ; to bark; बुक्क्, भष् ;

१५० । घूर् ; to thunder, roar, to yawn; गर्ज्, स्तन्, विजृम्भ् ;

१५१ । घलत् ; to tumble, to roll; अव-पत्, स्खल्, घूर्ण्, परिभ्रम् प्रचल्;

१५२ । घन्ज् ; to toy; क्रीड्,

१५३ । फाम्फ् ; to yawn, to gape; विजृम्भ् ;

१५४ । फरीर्ज् ; to erect; निर्मा, निखन्, रच्, प्रति-स्थाप्,

१५५ । फरामूश् to forget; विस्मृ;

१५६ । फह्म् ; to understand; बुध्, अवगम्, उपलभ् ;

१५७ । कार् ; to sow seed; वप्, विकृ;

१५८ । काव् ; to dig; खन् ;

१५९ । काह् ; to diminish, to lessen; अपचि, ह्रस् ;

१६० । कश् ; to pull, attract, draw out, to suffer; आ-कृष्, अनु-भू, उप-भुज्,

१६१ । कूब् ; to beat, bruise; प्र-हृ, अपकृ, हिंस् ;

१६२ । कुश् ; to strive, endeavour; प्र-यत्, उद्यम् ;

१६३ । गराय् ; to incline, to turn, to cause, to become; अन्यथाकृ, विपर्यस्, परिवृत् विकृ, विरूप् ;

१६४ । गर्द् ; to become, to wander, परिभ्रम्, अट् ;

१६५ । गिरव्; to follow, to be attached; आसञ्ज्, सम्बन्ध्, अनुरञ्ज्;

१६६ । गर्ज्; to bite; दंश्;

१६७ । गुसल्; to snap, asunder, वि-त्रुट्, भञ्ज्, खण्ड्, छिद्;

१६८ । गन्ज्; to hold, contain; धृ, परि-ग्रह्, आ-धा;

१६९ । गन्द्; to putrefy; to stink; पूय्, पूतीकृ,

१७० । लाय्; to complain, talk snappishly, to bark; अभि-युज्, भष्;

१७१ । लर्ज्; to tremble; कम्प्;

१७२ । लघूर्ज्; to slip; प्र-स्खल्, चल्, निर्गम् अपसृप्, च्यु, अप-भ्रंश्, स्रंस्;

१७३ । लन्ग्; to limp; लंग्, खञ्ज्;

१७४ । लीर्ज्; to slip; प्र-स्खल्, चल्, निगम्, अपसृप्, च्यु, अप-भ्रंश्, स्रंस्;

१७५ । लीस्; to lick; लिह्;

१७६ । माल्; to rub, to anoint; लिप्, अञ्ज्, अभिषिच्, मर्द्;

१७७ । मक्; to suck; आ-चुष्;

१७८ । नार्ज्; to dissemble, to coquette; अपदिश्, व्यपदिश्, अप-ह्नु, नि-ह्नु, वि-लस्;

१७९ । नाल्; to lament, grieve; शुच्,

१८० । नाम्; to name; अभिधा, नाम-कृ;

१८१ । नाय्; to boast, to flatter; विकत्थ्, दृप्, श्लाघ्, सान्त्व्;

१८२ । नर्ज्; to draw out, extract; आ-कृष्, निष्कृष्;

१८३ । नम्; to draw forth, pull out; निष्कृष्;

१८४ । निगर्; too look, see, view; आलोक्, निरूप्, निर्वर्ण्,

१८५ । निकूह्; to despise, to reproach ; अव-ज्ञा , तिरस्कृ, अव-मन्, परिभू, धिक्कृ ;

१८६ । नूश्; to drink ; आ-चम्, पा ;

१८७ । नव्; to lament ; शुच्;

१८८ । नह्; to place, put, lay ; स्थापि, धापि ;

१८९ । नैयूश्; to listen, to hear; श्रु, आकर्ण्, निशम्, अवधा;

१९० । वर्ज्; to practise, to exercise ; अभ्यस्, आचर्, अनुष्ठा ;

१९१ । वर्ज्; to blow the wind ; ध्मा ;

१९२ । हिरास्; to fear, dread ; भी, उद्विज् वित्रस् ;

१९३ । हराश्; to vomit; वम्;

१९४ । हश्क्; to dry, to wither; शुष्, विशॄ, म्लै;

१९५ । हश्त्; to whistle, kiss; शीत्कृ (?), चुम्ब्;

१९६ । हिल्; to abandon, to dismiss; त्यज्, हा, उत्सृज्, उज्झ;

१९७ । हल्; to abandon, to dismiss; त्यज्, हा, उत्सृज्, उज्झ् ;

१९८ । हिन्जार्; to travel on; व्रज्, चर्, अट्;

१९९ । हन्ज्; to vex, grieve, बाध, पीड्, क्लिश्;

२०० । हूश्; to die; मृ;

२०१ । हियाल्; to let fall, to dismiss; पाति, भ्रंशि, प्रस्थापि, अपसारि, विसृज्

२०२ । यार्ज्; to yawn, to stretch out the arms, to wish, desire, to grow; जृम्भ्, आयम् (स्वाङ्गम्), अभिलष्, वाञ्छ्, रुह्,

२०३ । यक्; to become one; एकीभू ;

२०४ । यूज़्; to leap, spring, jump; प्लु, वल्ग्, स्कन्द्;

२०५ । यूश्; to bear, to listen; जनि, सह्, विलम्ब्, श्रु;

२०६ । आफ़्रीन्; to create; सृज्, निर्मा, साध्, तन्, क्लृप्;

२०७ । चीन्; to gather, pluck, to select; चि;

२०८ । बीन्; to see, to observe; दृश्;

२०९ । रीन्; to ease nature; हृद्;

२१० । गुज़ीन्; to choose, to select; वृ, वॄ;

२११ । रीय्; to ease nature; हृद्;

२१२ । बालाय्; to grow, increase; एध्, वृध्;

२१३ । पा; to stand firm; स्था, अव-स्था;

२१४ । रू; to grow, to vegetate: रुह्;

२१५ । ज़ा; to bring forth young, to be born; प्रसू, जन्;

२१६ । गा; to copulate; यभ्

आज़्मायादीनां यकारस्य लोपो वा वर्त्तमानार्थे ॥ ११

आज़्माय् आदीनां धातूनां यकारस्य लोपः स्याद् वा वर्त्तमानार्थे ।

आज़्माय् तिप् इति स्थिते धातूनां नद् वर्त्तमाने इति आज़्मायद् । अनेन यकारस्य लोपो वा इति आज़्मायद् आज़्माद् ।

बू धातोर्नदोऽकारस्य लोपो वर्त्तमानार्थे ॥ १२

बू तिप् इति स्थिते बू + अद् । अनेन अदोऽकारस्य लोपः इति बूद् ।

आज़्मायादीनां ड्रद् भूते ॥ १३

आज़्माय् आदीनां धातूनां ड् + ऊद् आदेशः स्याद् भूतेऽर्थे । आज़्माय् दिप् इति स्थिते अनेन ड्रद् । डित्त्वात् टेर्लोपः । आज़्मूद् । एवं सर्वत्र ।

वूधातोरूदादेशः स्याद् भूते ॥ १४

वू-दिप् इति स्थिते वू + ऊद् = वूद् ।

दरवो दुर् भूते ॥ १५

दरव् धातोः दुर् आदेशः स्याद् भूतेऽर्थे ।

४ । आज्मायादयः ॥

१ । आर्ज्माय् ; to try, Prove, experience; परीक्ष्, साध्, उपपाद्, अनुभू ;

{ आज्मायद् । आज्माद् । } आज्मूद् । आज्मूदन् ।

२ । आसाय् ; to repose; विश्रम्, संविश्, शी;

{ आसायद् । आसाद् । } आसूद् । आसूदन् ।

३ । अफ्ज़ाय् ; to increase; वृध्, एध्, वृंह्, विस्तृ;

{ अफ्ज़ायद् । अफ्ज़ाद् । } अफ्ज़ूद् । अफ्ज़ूदन्

४ । आलाय्; to Stain, to pollute; कलङ्क—मलिन—दूष्; लाञ्छ् ;

{ आलायद् । आलाद् । } आलूद् । आलूदन् ।

५ । आमाय्; to fill, prepare; परिपॄ, आपॄ, उद्यत्, प्रस्तु, प्रसाध् ;

{ आमायद् आमाद् } आमूद् । आमूदन् ।

६ । अन्दाय् ; to incrustate, to plaster; आच्छद्, आवेष्ट, आलिप्, उपलिप्, अञ्ज्, अभिषिच् ;

{ अन्दायद् । अन्दाद् । } अन्दूद् । अन्दूदन् ।

७। बालाय्; to grow, increase; एध्, वृध्, बृंह्;

{ बालायद्। बालाद्। } बालूद्। बालूदन्।

८। बख़्शाय्; to have pity on; दय्, अनुकम्प्, प्रसद्;

{ बख़्शायद्। बख़्शाद्। } बखशूद्। बखशूदन्।

९। बाश्; to be, to exist; भू, अस्, वृत्, विद्;

बाशद्। बूद्। बूदन्

१०। बू; to be, to exist; भू, अस्, वृत्, विद्;

बूद्। बूद्। बूदन्।

११। पालाय्; to strain; आयास्, प्रयत्, आकृष्, निष्पीड्;

{ पालायद्। पालाद्। } पालूद्। पालूदन्।

१२। पयमाय्; to measure मा, प्र-परि-तुल्, निरूप्, गण्;

{ पय्मायद्। पय्माद्। } पय्मूद्। पय्मूदन्

१३। तनव् to twist, to be twisted; परि-व्या-वृत्, आकुञ्च्, मुड्,

तनवद्। तनूद्। तनूदन्

१४। खशाय् to prune; लू, अवछिद्, नि-कृत्;

{ खशायद्। खशाद्। } खशूद्। खशूदन्।

१५। दरव्; to reap; mow; छिद्, लू, दो, कृत्,

दरवद्। दुरूद्। दुरूदन्।

१६। रवाय् to seize, ravish : आ-प्र-धृष्, अभि-भू;

{ रवायद्। रवाद्। } रवूद्। रवूदन्।

१७। जंदाय्; to polish, to erase; प्र-मृज्, परिष्क, तिज्, धाव्।

{ जंदायद्। जंदाद्। } जंदूद्। जंदूदन्। (जूदन् इति कोशादौ)।

१८। जिंनव्; to neigh, howl; ह्रेष् (अश्वनादः)।

जिंनवद्। जिंनूद्। जिनूदन्।

१९। सिताय्; to praise; प्रशंस्, श्लाघ्, ईड्, स्तु।

{ सितायद्। सिताद्। } सितूद्। सितूदन्।

२०। साय्; to wear, to rub; प्रमृज्, घृष्, मृद्, परिधा।

{ सायद्। साद्। } सूद्। सूदन्।

२१। शव्; to be, to become, to go; भू; अस्।

शवद्। शूद्। शूदन्।

२२। शुनव् or शिनव्; to bear, to sniff; वह्, नी, भृ, धृ, घ्रा।

{ शुनवद्। शिनवद्। } { शुनूद्। शिनूद्। } { शनूदन्। शिनूदन्। }

२३। घुनव्; to slumber; प्र-स्वप्।

घुनवद्। घुनूद्। घुनूदन्।

२४। फर्साय्; to rub, erase, obliterate; प्र-मृज्, व्यामृश्, विलुप्।

{ फर्सायद्। फर्साद्। } फर्सूद्। फर्सूदन्।

२५। फर्माय्; to order; आ-ज्ञा।

{ फर्मायद्। फर्माद्। } फर्मूद्। फर्मूदन्।

२६। फ़ुज़ाय् ; to increase; to augment; वृध्, ऋध्, उपचि।

{ फ़ुज़ायद्। फ़ुज़ाय्। } फ़ुज़ूद्। फ़ुज़ूदन्।

२७। फ़ुनाय् ; to decieve; वञ्च्, प्र-तॄ, प्रलुभ्।

{ फ़ुनायद्। फ़ुनाद्। } फ़ुनूद्। फ़ुनूदन्।

२८। कशाय् ; to open; अपा-वृ, वि-वृ, उद्-घट्।

{ कशायद्। कशाद्। } कशूद्। कशूदन्।

२९। कुशाय् ; to loose; श्लथ्, स्रंस्, मुच्।

{ कुशायद्। कुशाद्। } कुशूद्। कुशूदन्।

३०। नमाय् ; to show, appear, seem; दर्शि, प्रति-भा, आभा, लक्ष्।

{ नमायद्। नमाद्। } नमूद्। नमूदन्।

आज़ारादेर्नदोऽकारलोपोऽवर्त्तमानादौ॥ १६

आज़ार् आदेर्धातोः परतो नदोऽकारस्य लोपः स्याद् वर्त्तमान-भिन्नार्थे पारसीकभाषायाम्।

अफ़्शारादीनामुपधाया उत्वमवर्त्तमाने॥ १७

अफ़्शार् आदीनां धातूनाम् उपधाया उकारो भवति वर्त्तमान-भिन्नार्थे पारसीकभाषायाम्। अफ़्शारादयः—अफ़्शार्, आज़ार्, सिपार्, शुमार्, मीर्, बर्।

आज़ुर्द्, अफ़्शुर्द्, सिपुर्द्, मुर्द्, बुर्द्।

आबरः आर् वा वर्त्तमाने॥ १८

आवर् इत्यस्य धातोरार् आदेशो भवति वा वर्त्तमानेऽर्थे पारसीकभाषायाम् । आबरद्, पक्षे आरद् ।

कुनो न लोप उपधाया वर्त्तमाने ।। १६

कुन् इत्यस्य धातोरुपधाया लोपो न भवति वर्त्तमानेऽर्थे पारसीकभाषायाम् । कुन् + अद् = कुनद् ।

कुनो डर् अवर्त्तमाने ।। २०

कुन् इत्यस्य धातोः ड् + अर् आदेशो भवति वर्त्तमानभिन्नेऽर्थे पारसीकभाषायाम् । कुन् + अद् इति स्थिते अनेन कुन् इत्यस्य उन् भागस्य स्थाने अर् = कर् । अदोऽकारस्य च लोपः करद् ।

सितान् इस्तान् वा अवर्त्तमाने ।। २१

सितान् इत्यस्य धातोरिस्तान् आदेशो भवति वा वर्त्तमानभिन्नेऽर्थे पारसीकभाषायाम् । इस्तान्द्, इस्तान्दन् ।

५ । आजारादयः

१ । आजार्; to trouble, to hurt, to molest; आयस् (आयासयति), बाध्, अर्द्, दुष् ।
वर्त्त०—आजारद् । भूते—आजार्द् । भावे—आजार्दन् ।
आजुर्द् । आजुर्दन् ।

२ । आजर्; to injure, to displease; अर्द्, व्यथ्, क्षि, दुष्, विप्रियं कृ, अतुष्टिं जन्, अपराध् ।
वर्त्त०—आजरद् भूते—आजर्द् भावे—आजर्दन्

३ । उस्तुर्; to shave; क्षुर्, वप् ।
वर्त्त०—उस्तुरद् भूते—उस्तुर्द् भावे—उस्तुर्दन्

४ । आशुर्; to bruise; चूर्ण्, मृद् ।
वर्त्त०—आशुरद् भूते—आशुर्द् भावे—आशुर्दन्

५ । अफ़्सुर्‌ ; to congeal, to wither; घनीभू, संहन्, श्यै (श्यायते), विशॄ (विशीर्यते), म्लै ।

वर्त्त०—अफ़्सुरद्‌ भूते—अफ़्सुर्द्‌ भावे—अफ़्सुर्दन्

६ । अफ़्सार्‌ ; to squeege, to press; संपीड्‌, संमृद्‌, पीड्‌, आक्रम्‌, उपस्था ।

वर्त्त०—अफ़्सारद्‌ भूते-अफ़्सार्द्‌ भावे-अफ़्सार्दन्

७ । अफ़्शार्‌ ; to filter, to squeege; शुध्‌, निर्गल्‌, संपीड्‌ ।

वर्त्त०—अफ़्शरद्‌ भू०—अफ़्शुर्द्‌ भा०—अफ़्शुर्दन्

८ । आवर्‌ ; to bring, to relate; आनी, आहृ, आवह्‌, उद्दिश्‌, अपेक्ष्‌ ।

वर्त्त०—{ आवरद्‌ / आरद्‌ } भू०—आवर्द्‌ भा०—आवर्दन्

९ । बर्‌ ; to carry, to win at play; वह्‌, आनी, जि ।

वर्त्त०—बरद्‌ भूते—बुर्द्‌ भावे—बुर्दन्

१० । परवर्‌ ; to nourish, to educate; पुष्‌(पुष्णाति, पोषयति), संतृप्‌, संवृध्‌, शिक्ष्‌, अनुनी, विनी ।

वर्त्त०—पर्वरद्‌ भू०—पर्वर्द्‌ भा०—पर्वर्दन्

११ । पझ़्मुर्‌ ; to wither; नश्‌ ।

वर्त्त०—पझ़्मुरद्‌ भू०—पझ़्मुर्द्‌ भा०—पझ़्मुर्दन्

१२ । खसुर्‌ ; to reap; लू, कृत्‌ ।

वर्त्त०—खसुरद्‌ भू०—खसुर्द्‌ भा०—खसुर्दन्

१३ । खुर्‌ ; to eat; खाद्‌, अद्‌ ।

वर्त्त० खुरद्‌ भू० खुर्द्‌ भा० खुर्दन्

१४ । सिपार्‌ ; to intrust, to consign; ऋृ (अर्पयति), प्रतिपादि (प्रतिपादयति), निक्षिप्‌, न्यस, नियुज्‌, विश्वस्‌ ।

वर्त्त०—सिपारद्‌ भू०—सिपुर्द्‌ भा०—सिपुर्दन्

१५ । सुतुर् ; to shave, to scrape; क्षुर्, खुर्, वप् ।

वर्त्त०—सुतुरद्   भू०—सुतुर्द्   भा०—सुतुर्दन्

१६ । शुमार् ; to reckon, to count; गण्, विगण, कल्, संख्या ।

वर्त्त०—शुमारद्   भू०—शुमुर्द्   भा०—शुमुर्दन्

१७ । फ़ुसुर् ; to congeal; श्यै (श्यापयति), सं-हन् ।

वर्त्त०—फ़ुसुरद्   भू०—फ़ुसुर्द्   भा०—फ़ुसुर्दन्

१८ । फ़सुर् ; to squeege; संपीड्, संमृद् ।

वर्त्त०—फ़सुरद्   भू०—फ़सुर्द्   भा०—फ़सुर्दन्

१९ । कुन्; to do; कृ ।

वर्त्त०—कुनद्   भू०—कर्द्   भा०—कर्दन्

२० । गुज़ार् ; to perform; कृ, विधा, अनुष्ठा, निर्वह् ।

वर्त्त०—गुज़ारद्   भू०—गुज़ार्द्   भा०—गुज़ार्दन्

२१ । गुस्तर् ; to spread; आस्तृ, विस्तृ, तन् ।

वर्त्त०—गुस्तरद्   भू०—गुस्तर्द्   भा०—गुस्तर्दन्

२२ । मीर् ; to die; मृ ।

वर्त्त०—मीरद्   भू०—मुर्द्   भा०—मुर्दन्

२३ । नवर् ;to fold, to twist, to travel; व्यावृत् (व्यावर्त्तयति), आवृत्, व्रज्, प्रव्रज् ।

वर्त्त०—नवरद्   भू०—नवर्द्   भा०—नवर्दन्

२४ । सितान् ; to seize, to take; हृ, अभिग्रह्, ग्रस्, परिग्रह्, ग्रह् ।

वर्त्त०—सितानद्   भू०—सितान्द्   भा०—सितान्दन्

इस्तान्द्   इस्तान्दन्

२५ । आघन् ;to fill, to stuff; पॄ (पूरयति) ।

वर्त्त०—आघनद्   भू०—आघन्द्   भा०—आघन्दन्

२६। अफ़्शान्; to diffuse; प्रक्षिप्, पत् (पातयति), विस्तृ (विस्तारयति)।

वर्त्त०–अफ़्शानद् भू०–अफ़्शान्द् भा०–अफ़्शान्दन्

२७। अफ़्गन्; to throw, to throw down; क्षिप्, अस्, पत् (पातयति), अवपत् (अवपातयति)।

वर्त्त०—अफ़्गनद् भू०—अफ़्गन्द् भा०—अफ़्गन्दन्

२८। आगन्; to fill; पॄ (पूरयति)।

वर्त्त०—आगनद् भू०—आगन्द् भा०—आगन्दन्

२६। बन्; to bind, to design; बन्ध्, निबन्ध्, ग्रथ्, मन्त्र्, क्लृप्।

वर्त्त०—बनद् भू०—बन्द् भा०—बन्दन्

३०। परागन्; to disperse, to scatter; विकॄ (विकिरति), विद्रु (विद्रावयति), विक्षिप्।

वर्त्त०—परागनद् भू०—परागन्द् भा०—परागन्दन्

३१। जुशान्; to cause to boil; क्वथ्, श्रा (श्रपयति), तप् (तापयति)।

वर्त्त०—जुशानद् भू०—जुशान्द् भा०—जुशान्दन्

३२। चकान्; to distil; च्युत्, री, क्षर्, स्यन्द्, स्रु।

वर्त्त०—चकानद् भू०—चकान्द् भा०—चकान्दन्

३३। खसान्; to grind, triturate; चूर्ण्, पिष्, मृद्, क्षुद्, कुट्ट्।

वर्त्त०—खसानद् भू०—खसान्द् भा०—खसान्दन्

३४। ख्वान्; to read, to call, to invite; पठ्, निमन्त्र्, आह्वे, आवह् (वाहयति), प्रलुभ् (लोभयति)।

वर्त्त०—ख्वानद् भू०—ख्वान्द् भा०—ख्वान्दन्

३५ । रान्; to drive, banish; प्रेर् (प्रेरयति), प्रचल् (प्रचालयति), वह् (वाहयति), विवस् (विवासयति), निर्वस् (निर्वासयति), निःसृ (निःसारयति), उत्सृ (उत्सारयति) ।

वर्त्त०—रानद् भू०—रान्द् भा०—रान्दन्

३६ । रह्रान् ; to release; मुच् (मोचयति), मोक्ष् (मोक्षयति), निस्तॄ (निस्तारयति) ।

वर्त्त०—रह्रानद् भू०—रह्रान्द् भा०—रह्रान्दन्

३७ । फरूख्त्रान् ; to hold forth, to utter; उच्चर् (उच्चारयति), उदीर्, उदाहृ, निधृ (निर्धारयति) ।

वर्त्त०—फरूख्त्रानद् भू०—फरूख्त्रान्द् भा०—फरूख्त्रान्दन्

३८ । फिशान् ; to scatter; विक्षिप् ।

वर्त्त०—फिशानद् भू०—फिशान्द् भा०—फिशान्दन्

३९ । फिकन्; to throw down, to over set; पर्यस् (पर्यस्यति), निपत् (निपातयति), अवपत् ।

वर्त्त०—फिकनद् भू०—फिकन्द् भा०—फिकन्दन्

४० । फर्कन् ; to destroy, to dig; नश् (नाशयति), सद् (सादयति), खन् ।

वर्त्त०—फर्कनद् भू०—फर्कन्द् भा०—फर्कन्दन्

४१ । कन् ; to dig, engrave, to pluck up; खन्, तक्ष्, उत्कृष्, उत्पद् (उत्पाटयति) ।

वर्त्त०—कनद् भू०—कन्द् भा०—कन्दन्

४२ । मान् ; to remain, to be fatigued; अवशिष् (शिष्यते), अवस्था, श्रम्, आयस्, खिद् ।

वर्त्त०—मानद् भू०—मान्द् भा०—मान्दन्

४३ । निशान् । to fix; स्था (स्थापयति), बन्ध् ।

वर्त्त०—निशानद् भू०—निशान्द् भा०—निशान्दन्

अफ़्राजादीनामन्त्यस्य ख्तोऽवर्त्तमाने ॥ २२

अफ़्राज् आदीनां धातूनामन्त्यस्य व्यञ्जनस्य ख्त् आदेशः स्याद् वर्त्तमानभिन्नार्थे पारसीकभाषायाम्। अफ़्राज्+दिप् इति स्थिते अफ़्राज् इत्यस्यान्त्यस्य जकारस्य ख्तादेश इति अफ़्राख्त्।

सन्जोऽनोरुः ॥ २३

सन्ज् इत्यस्य धातोरन् इति भागस्य उत्वं स्याद् वर्त्तमान-भिन्नार्थे पारसीकभाषायाम्। सन्ज्+दिप् इति स्थिते सन्जो जकारस्य ख्तादेशः। अनेन सूत्रेण अन् इति भागस्य उत्वं इति सुख्त्।

गुसिल उङो दीर्घत्वम् ॥ २४

गुसिल् इत्यस्य धातोरुङो दीर्घत्वं स्याद् वर्त्तमानभिन्नार्थे पारसीकभाषायाम्। गुसिल्+दिप् इति स्थिते लकारस्य ख्तादेश इति गुसिख्त् अनेन सूत्रेण च इकारस्य दीर्घत्वमिति गुसीख्त्।

पज्ो'ऽस्योत्वम् ॥ २५

पज्' इत्यस्य धातोरकारस्य उत्वं स्याद् वर्त्तमानभिन्नार्थे पारसीकभाषायाम्। पुख्त्।

६। अफ़्राजादयः

१। अफ़्राज्; to elevate, to exalt; उन्नम्, उच्छ्रि (उच्छ्रयति), उत्था (उत्थापयति)।

वर्त्त—अफ़्राजद् भू०—अफ़्राख्त् भा०—अफ़्राख्तन्

२। अफ़्रूज्'; to illuminate, to inflame; द्युत्, भास्, तप्, दीप्।

वर्त्त०—अफ़्रूजंद् भू०—अफ़्रूख्त् भा०—अफ़्रूख्तन्

३। आमूज्'; to teach, read, learn; उपदिश्, शिक्ष्, (शिक्षयति), अधी (अधीते), पठ्।

वर्त्त०—आमूज़ंद् भू०—आमूख्त् भा०—आमूख्तन्

४। आमीज्'; to mix, compound; मिश्र्, संपृच्।

वर्त्त०—आमीजंद् भू०—आमीख्त् भा०—आमीख्तन्

५। अन्दाज्'; to cast, throw, shoot; क्षिप्, प्रक्षिप्।

वर्त्त०—अन्दाजंद् भू०—अन्दाख्त् भा०—अन्दाख्तन्

६। अन्दूज'; to collect, gain; चि, सम्भृ, समाहृ, अर्ज्।

अन्दूजंद् अन्दूख्त् अन्दूख्तन्

७। अन्फ़ज्'; to gain; अर्ज्।

अन्फ़जंद् अन्फ़ख्त् अन्फ़ख्तन्

८। अन्गिज्'; to excite, rouse. to create; उत्तेज् (उत्तेजयति), प्ररुच् (प्ररोचयति), उत्पाद् (उत्पादयति), उत्थाप् (उत्थापयति)।

अन्गिजंद् अन्गिख्त् अन्गिख्तन्

९। अन्गीज्'; to excite, to draw (a sword); उत्तेजे (उत्तेजयति), आकृष्।

अन्गीजद् अन्गीख्त् अन्गीख्तन्

१०। आविज्'; to suspend; प्रलम्ब्, अवलम्ब्, निवृ (निवर्तयति)।

आविजद् आविख्त् आविख्तन्

११। आहिज्'; to intend, design, to unsheath; अभिसन्धा (अभिसंदधाति), अभिप्रे (अभिप्रैति), विकोष् (विकोषयति)।

आहिजंद् आहिख्त् आहिख्तन्

१२। आहीज्'; to unsheath; विकोष् (विकोषयति)।

आहीजंद् आहीख्त् आहीख्तन्

१३ । बाज़्; to play, to lose at play; क्रीड्, पराजि ।

बाज़द् बाख्त् बाख्तन्

१४ । बीज़् ; to sift; शुध्, चल् (चालयति) ।

बीज़द् बीख्त् बीख्तन्

१५ । पज़्; to cook, ripen; पच् ।

पज़द् पुख्त् पुख्तन्

१६ । पीच् ; to twist, to coil; व्यावृत् (व्यावर्तते), आवृत्, मण्डलीकृ (मण्डलीकरोति) ।

पीचद् पीख्त् पीख्तन्

१७ । पर्दाज़्; to quit, leave; त्यज्, हा, विसृज्, अपगम्, अपया ।

पर्दाज़द् पर्दाख्त् पर्दाख्तन्

१८ । परहीज़्; to educate; विनी, अनुनी, शिक्ष् ।

परहीज़द् परहीख्त परहीख्तन्

१६ । ताज़; to attack, to gallop; आक्रम्, प्लु, वल्ग् ।

ताज़द् तूख्त् तूख्तन्

२० । तूज़्; to desire; इष्, वाञ्छ् ।

तूज़द् तूख्त तूख्तन्

२१ । दूज़्; to sew, stitch; सिव् ।

दूज़द् दूख्त् दूख्तन्

२२ । रीज़्; to pour, to break in pieces; स्रु, अवसिच्, भञ्ज्, स्फुट् ।

रीजद् रीख्त् रीख्तन्

२३ । साज़्; to make, to do; कृ, साध् ।

साज़द् साख्त् साख्तन्

२४ । सबुर्ज् ; to pierce; व्यध्; निर्भिद् ।

सबुर्जद् सबुख्त् सबुख्तन्

२५ । सूर्ज् ; to burn; दह्, दीप् (दीपयति), सन्धुक्ष् (सन्धुक्षयति)।

सूर्जद् सूख्त् सूख्तन्

२६ । सन्र्ज् ; to burn; दह्, दीप्, सन्धुक्ष् ।

सन्र्जद् सुख्त् सुख्तन्

२७ । शिनास् ; to know; ज्ञा, परिचि, अभिज्ञा ।

शिनासद् शिनाख्त् शिनाख्तन्

२८ । फरार्ज् ; to exalt; उन्नम् (उन्नमयति), उच्छ्रि ।

फरार्जद् फराख्त् फराख्तन्

२९ । फरूश् ; to sell; विक्री, पण् ।

फरूशद् फरूख्त् फरूख्तन्

३० । गुदार्ज् ; to melt, to dissolve; विली, (विलाययति, विलीयते) ।

गुदार्जद् गुदाख्त् गुदाख्तन्

३१ । गुरीर्ज् ; to flee, desert; पलाय्, द्रु, त्यज् ।

गुरीर्जद् गुरीख्त् गुरीख्तन्

३२ । गुसिल् ; to tear, to twist off; दृ, व्यावृत् ।

गुसिलद् गुसीख्त् गुसीख्तन्

३३ । निशार्ज् ; to fix in the ground, to establish; स्थापि (स्थापयति), निविश् (निवेशयति) ।

निशार्जद् निशाख्त निशाख्तन्

३४ । नवार्ज् ; to caress, soothe, to play on an instrument; आलिङ्ग्, स्वञ्ज्, परिरभ्, वद् (वादयति) ।

नवार्जद् नवाख्त् नवाख्तन्

३५। हूर्ज् ; to draw out, unsheath; निष्कृष् , विकोष् ।

हूर्जद् हूख्त् हूख्तन्

३६। यार्ज् ; to draw (a sword), to strike, to throw; विकोष् (विकोषयति खड्गम्), अभिहन्, प्रहृ, क्षिप् , पत् (पातयति) ।

यार्जद् याख्त् याख्तन्

आब्यादीनां स्तादेशोऽवर्त्तमाने ॥ २६

आबि-आदीनां धातूनामन्ते स्त् आगमः स्याद् वर्त्तमान-भिन्नेऽर्थे पारसीकभाषायाम् । आविस्त् , आबिस्तन् इत्यादि ।

आरायादीनां यलोपोऽवर्तमाने ॥ २७

आराय् आदीनां धातूनामन्त्यस्य यकारस्य लोपः स्याद् वर्त्तमानभिन्नार्थे पारसीकभाषायाम् । आरायादयः—आराय् , पय्राय् , जूय् , रूय् , रीय् , जिय् , जीय् , शूय् , गिरीय् ।

वर्त्तमाने वा ॥ २८

वर्त्तमानेऽर्थेऽप्येतेषां धातूनामन्त्यस्य यकारस्य लोपो वा भवेत् । नतु रीय् , जिय् , जीय् , शूय् , गिरीय इत्येतेषाम् । आराद् , पाद् , जूद् , रुद् ।

नतु रीयादेः ॥ २९

रीयादीनां वर्त्तमानेऽर्थे यकारलोपो न स्याद् । रीयादयः रीय् , जिय् , जीय् , शूय् , गिरीय् ।

रीयदो रीनद् वर्त्तमाने वा ॥ ३०

रीयद् इत्यस्य धातोर्वर्त्तमानार्थे रीनद् आदेशो भवति वा । रीयद् रीनद् ।

बन्दादेरन्त्यस्वरादूर्ध्वं व्यञ्जनानां लोपोऽवर्त्तमाने ॥ ३१

बन्द् आदीनां धातूनामन्त्यस्वरादूर्ध्वं स्थितानां व्यञ्जनानां

लोपोऽवर्त्तमानेऽर्थे पारसीकभाषायाम्। व्यञ्जनानामित्यत्र बहुवचनमुपलक्षणमात्रम्। वन्दादयः—बन्द्, जह्, खीज्, ख्वाह्, रह्, रिस्, रीस्, शिकन्, काह्, गुजार्, गुजर्, गुसिल्, निशीन्, निशान्।

खीजगुसिलनिशीनानां खागुसुनिशाः॥ ३२

खीज् आदीनां धातूनां यथाक्रमं खा, गुसु, निश आदेशा भवन्ति वर्त्तमानभिन्नेऽर्थे। खांस्त्, गुसुस्त्, निशस्त्। गुसिलोऽन्त्यस्वरस्योत्वं विभाषयेति वक्तव्यम्।

बायादीनामिकारागमोऽवर्त्तमाने॥ ३३

वाय् आदीनां धातूनामन्त्यस्य व्यञ्जनस्य परत इकारागमो भवेदवर्त्तमानेऽर्थे पारसीकभाषायाम्। बायादयः—बाय्, पाय्, तबान्, दान्, मान्, निगर्, यार्।

यारो वा॥ ३४

यार् इत्यस्य धातोरिकारागमो विभाषयेति वक्तव्यम्। अवर्त्तमानेऽर्थे विभाषयेति बोध्यम्।

निगर इकारस्येत्वं वा॥ ३५

निगर इत्येतस्य धातोरिकारस्य ईत्वं स्याद्।

आघूश ऊकारस्येत्वमवर्त्तमाने॥ ३६

आघूश् इत्यस्य धातोरूकारस्य इत्वं स्यादवर्त्तमानेऽर्थे पारसीकभाषायाम्। आघिस्त्, आघिस्तन्।

पय्रायदः पीरा विभाषया॥ ३७

पय्राय् इत्यस्य धातो पीरा आदेशः स्याद् वा। पय्रायद्, पीराद्।

आरायदोऽन्त्यस्वरस्य ह्रस्वत्वमवर्त्तमाने वा॥ ३८

आरास्त, आरस्त, आरास्तन्, आरस्तन्।

जहोऽस्येत्वं वा॥ ३९

जह् इत्यस्य धातोरवर्तमानेऽर्थेऽकारस्य ईत्वं वा स्यात्।

७। आब्यादयः

१। आबि; to conceive, to be pregnant; गर्भं लभ्, गर्भं ग्रह्, गर्भं धृ।

आबिद्	आबिस्त्	आबिस्तन्

२। आराय् or to adorn, to put in order; पूज्, अर्च्, आरा; विन्यस्, सज्जीकृ।

{ आरायद्	आरास्त	आरास्तन्
{ आराद्	आरस्त्	आरस्तन्

३। आघूश्; to moisten, pollute; क्लिद्, दुष्, कलुष्, लिप्।

आघूशद्	आघिस्त्	आघिस्तन्

४। बाय्; to be necessary; आवश्यकं जायते, आवश्यकं भवति, आवश्यकमस्ति।

बायद्	बायिस्त्	बायिस्तन्

५। बन्द्; to bind; बन्ध्।

बन्दद्	बस्त्	बस्तन्

६। पाय्; to stand firm, endure, to look steadfastlly at, to trample under foot; दृढं स्था, निरीक्ष्, अवमृद्।

{ पायद	पायिस्त्	पायिस्तन्
{ पाद्		

७। पय्राय्; to adorn, to prune, to clip; भूष्, अलङ्कृ, शोभि, मण्ड्।

{ पय्रायद्	पय्रास्त	पय्रास्तन्
{ पीराद्	पीरास्त्	पीरास्तन्

८। पय्बन्द्; to join, to be joined; संयुज्, (संश्लिष्टः)।

पयबन्दद्	पय्वस्त	पय्बस्तन्

९ । तवान् ; to be able; शक्, क्षम् ।

तवानद्   तवानिस्त्   तवानिस्तन्

१० । जह् ; to jump, to leap, to spring; प्लु, वल्ग्, उद्भिद् ।

जहद्   जस्त्   जस्तन्

जीस्त्   जीस्तन्

११ । जूय् ; to search; अन्विष्, अनुसन्धा ।

{ जूयद्
{ जूद्   जुस्त्   जुस्तन्

१२ । खीज्; to wish, desire, to want; इष्, अभिलष्, कांक्ष् ।

खीजद्   खास्त्   खास्तन्

१३ । ख्वाह् ; to rise up, to happen; घट्, निपत्, उदयति ।

ख्वाहद्   ख्वास्त्   ख्वास्तन्

१४ । दान्; to know, acknowledge; ज्ञा, परिज्ञा, अभिज्ञा ।

दानद्   दानिस्त्   दानिस्तन्

१५ । रह् ; to be liberated, to escape, to let go; अपक्रम्, प्रद्रु, मोचि, मोक्षि, अवमुच् ।

रहद्   रस्त्   रस्तन्

१६ । रूय् ; to grow; रुह् ।

{ रूयद्
{ रूद्   रुस्त्   रुस्तन्

१७ । रिस् ; to spin, to twist; तन्तुवायं कृ, व्यावृत्, आवृत्, समावृत् ।

रिसद्   रिस्त्   रिस्तन्

१८ । रीस्; to spin; तन्तुवायं कृ ।

रीसद्   रीस्त्   रीस्तन्

१९। रीय्; to twist, to ease nature; व्यावृत, मुच्, त्यज्, (मलमूत्रकर्मकस्थले)।

रीयद् / रीनद्	रीस्त्	रीस्तन्

२०। जिंय्; to live; जीव्।

जिंयद्	जिंस्त्	जिंस्तन्

२१। जीʹय्; to live; जीव्।

जीʹयद्	जीʹस्त्	जीʹस्तन्

२२। शूय्; to wash; मृज्, प्रक्षल्, शुध्।

शूयद्	शुस्त्	शुस्तन्

२३। शिकन; to break, to defeat; पराजि, विजि, भिद्, भञ्ज्, त्रुट्।

शिकनद्	शिकस्त्	शिकस्तन्

२४। काह्; to lessen, to decrease; ह्रस्, क्षि, अपचि।

काहद्	कास्त	कास्तन्

२५। गुज़ार्; to quit, to leave, to present, to allow; अनूज्ञा, सह्, अनुमुद्, त्यज्, हा, उपस्था।

गुज़ारद्	गुज़ास्त्	गुज़ास्तन्

२६। गुज़र्; to pass; अतिक्रम्।

गुज़रद्	गुज़स्त्	गुज़स्तन्

२७। गिरीय्; to weep, to cry; क्रन्द्।

गिरीयद्	गिरीस्त्	गिरीस्तन्

२८। गुसिल्; to break off, to snap; त्यज्, स्फुट्।

गुसिलद्	गुसिस्त् / गुसुस्त्	गुसिस्तन् / गुसुस्तन्

२९ । मान् to resemble; सदृशीम् ;

मानद् मानिस्त् मानिस्तन्

३० । निशीन् to sit fowr, to secline, to extinguish; उपविश्, अवलम्ब्, समाश्रि, निर्वापयति, उपशम्, प्रशम्, शमयति;

निशीनद् निशस्त् निशस्तन्

३१ । निशान् to plece; न्यस्, स्था, निधा;

निशानद् निशास्त् निशास्तन्

३२ । निगर्, to look at, view; दृश्, वीक्ष्, आलोक्;

निगरद् { निगरिस्त् / निगरीस्त् } { निगरिस्तन् / निगरीस्तन् }

३३ । यार् to lec able, शक्, क्षम्, सह्;

यारद् { यारिस्त् / यारस्त् } { यारिस्तन् / यारीस्तन् }

अफ्रारादेरन्त्यस्य श्तः । ४०

अफ्रार् आदीनां धातूनामन्त्यस्य वर्णस्य स्थाने श्त आदेशः स्यात्, वर्तमानभिन्नेऽर्थे पारसीकभाषायाम् । अफ्राश्त् इत्यादि ।

कार उपधाया इत्वं वा । ४१

कार् इत्यस्य धातोरुपधाया आकारस्येत्वं भवति विभाषया वर्तमान-भिन्नेऽर्थे पारसीकभाषायाम् । काश्त्, किश्त् ।

८ । अफ्रारादयः

१ । अफ्रार् to exalt; to extol (?) उन्नमयति, समुच्छ्रि; प्रशंस्, अभिष्टु;

अफ्रारद् अफराश्त् अफ्राश्तन्

२ । अम्बार् to fill, to spinkle, सिच्, परिषिच्, पॄ, सम्पॄ;

अम्बारद् अम्बाश्त् अम्बाश्तन् ।

३। अन्गार् to think; चिन्त्, तर्क्, ध्यै, विमृश्;

अन्गारद् अन्गाश्त अन्गास्तन्।

४। अवबार् to fill, to devour; आपॄ, पूरयति, ग्रस्,

अव्बारद् अव्बाश्त् अव्बाश्तन्।

५। बुरुर् to fry, to broil; भृज्, भृञ्ज्, तप्यते, पच्यते।

बुरुर्द बुरुश्त बुरुश्तन्।

६। पिन्दार् to think, suppose; चिन्त्, तर्क्;

पिन्दारद् पिन्दाश्त् पिन्दाश्तन्।

७। दार् to have, to hold, keop; धा, धृ, भृ;

दारद् दाश्त् दाश्तन्

८। रिस् रीस् } to spin to twist, तन्तुवायं कृ; व्यावृत;

रिसद् रीसद् } रिश्त् रिश्तन्।

९। सिरिश् to mix, to knead मृद् (हस्ताभ्यां मृद्नाति), अवमृद्, पिष्;

सिरिशद् सिरिश्त् सिरिश्तन्।

१०। कार to sow, to cultivata the laud, to tik, वप्, विकृ, कृष्;

कारद् { काश्त् किश्त { काश्तन् किश्तन्

११। कुश् to kill; हन्; हिंस्, बध्;

कुशद् कुश्त् कुश्तन्।

१२। गुजोर् to place, put on, leave; धा, न्यस्, त्यज्,

गुजेरद् गुजोश्त् गुजोश्तन्।

१३। गुजेर् to pass, pass by; अतिक्रम्, अतिगम्, अतिचर्,

गुजेरद् गुजेश्त् गुजेश्तन्

१४ । गुमार् ; to appoint for a purpose; नियुज्, अभिषिच् ।

गुमारद्   गुमाश्त्   गुमाश्तन्

१५ । नबीस् ; to write; लिख् ।

नबीसद्   नबिश्त्   नबिश्तन्

१६ । निगार् ; to palnt, portray, embroider, to write; चित्र्, लिख्, वर्ण्, सिव् ।

निगारद्   निगाश्त्   निगाश्तन्

१७ । यार् ; to supplicate, to intercede; to mutter prayers; (साञ्जलिबन्धम्) अभ्यर्थ्, याच्, अन्तर्गम्, अन्तर्वृत्, अन्तःस्था; नीचैर्जप् ।

यारद्   याश्त्   याश्तन्

१८ । हिश् ; to let down, to quiet ; अवतॄ, अवरुह्, अवपत्, शम्, शान्त्व्, निवृत् ;

हिशद्   हिश्त्   हिश्तन्

आशूबादेरन्त्यस्य फ्तोऽवर्तमाने ।। ४२

आशूबादेर्धातोरन्त्यस्य वर्णस्य स्थाने फ्त् इत्यादेशो भवति वर्तमानभिन्नेऽर्थे पारसीकभाषायाम् । आशुफ्त्, आशुफ्तन् इत्यादि ।

पाजीरादीनां फ्तागमो वक्तव्यः ।। ४३

पाजीरादीनां धातूनामन्ते फ्तागमो भवति, वर्तमानभिन्नेऽर्थे पारसीकभाषायाम् । पाजीरादयः-पाजीर् गीर् इत्यादि । पाजीरफ्तन् इत्यादि ।

गीरः इडागम आद्यस्वरह्रस्वत्वं च ।। ४४

गीर् इत्यस्य धातोः फ्त् इत्यस्यादौ इडागमो भवति, आद्यस्य स्वरस्य च ह्रस्वत्वमपि वक्तव्यम् । गिरिफ्त् इत्यादि ।

आशूबादेरन्त्यस्वरस्य ह्रस्वत्वमवर्तमानेऽर्थे ।। ४५

आशुफ्त्, आशुफ्तन्। आशूबादयः--आशूब्, कूब्, गूय्
इत्यादि। कूबो ह्रस्वत्वं विभाषयेति वक्तव्यम्।

सुम्बोऽन्त्यस्योपान्त्यसहितस्य फ्तादेशो वक्तव्यः ॥ ४६

सुम्ब् इत्यस्य धातोरुपान्त्यवर्णेन सहान्त्यस्य वर्गस्य फ्तादेशो भवति, वर्तमानभिन्नेऽर्थे पारसीकभाषायाम्। सुम्बद्, सुफ्त्, सुफ्तन्।

शिनव्शनवोरन्त्यस्वरस्योत्वमवर्तमाने ॥ ४७

शिनव् इत्यस्य शनव् इत्यस्य च धातोरन्त्यस्य स्वरस्य उत्वं भवति, वर्तमानभिन्नेऽर्थे पारसीकभाषायाम्। शिनुफ्त्, शनुफ्त् इत्यादि।

सिताबः सस्य शः ॥४८

सिताब् इत्यस्य धातोः सकारस्थाने शकारः स्यादवर्तमानेऽर्थे।

६। आशूबादयः।

१। आशूब्; to disturb; क्षुभ्, उपरुध्, मन्थ्।

आशूबद्	आशुफत्	आशुफ्तन्

२। बाफ्; to weave; वे, वप।

बाफद्	बाफ्त्	बाफ्तन्

३। ताब्; to twist, to spin, to turn away; तापि, काश्, द्युत्, व्यावृत्, पराङ्मुखीभू।

ताबद्	ताफ्त	ताफ्तन्

४। खुफ्त्; to sleep; स्वप्।

खुफ्तद्	खुफ्त्	खुफ्तन्

५। रव्; to go; गम्, या, चर्।

रवद्	रफ्त्	रफ्तन्

६ । रूब् ; to sweep; मृज्, शुध् ;

रूबद् रुफ्त् रुफ्तन्

७ । सुम्ब् ; to bore, pierce; व्यध्, छिद्र, भिद् ;

सुम्बद् सुफ्त् सुफ्तन्

८ । सिताब् ; to make haste; त्वर्, सत्वरं कृ ;

सिताबद् शिताफ्त् शिताफ्तन् ;

९ । शिगुफ्त् ; to expand (of a flower) to smile विकस्, फुल्ल्, स्मि ;

शिगुफ्तद् शिगुफ्त् शिगुफ्तन्

१० । शिनव् ; to hear; श्रु ;

शनवद् शिनुफ्त् शिनुफ्तन्

११ । शनव् ; to hear श्रु ;

शनवद् शनुफ्त् शनुफ्तन्

१२ । फरीब् ; to deceive; वञ्च्, विप्रलभ्, छल् ;

फरीबद् फरीफ्त् फरीफ्तन्

१३ । काव् ; to dig, to root up खन्, हृ, उन्मूल् ;

कावद् काफ्त् काफ्तन्

१४ । कूब् ; to break, bruise, knook, trample, under foot भञ्ज, भिद्, त्रुद्, चूर्ण, मृद् ;

{ कूफ्त् / कुफ्त् } { कूफ्तन् / कुफ्तन् }

१५ । गीर् ; to seize; हृ ग्रह, ग्रस् ;

गीरद् गिरिफ्त् गिरिफ्तन्

१६ । गूय् ; to say, वद्, वच्, जल्प् ;

गूयद् गुफ्त् गुफ्तन्

१७ । निहुफ्त् ; to conceal; निह्नु, गुह् , तिरोधा ;

निहुफ्तद् निहुफ्त् निहुफ्तन्

१८ । याब् ; to get, obtain; आप् , अर्ज् , अधिगम् , प्रचर् , प्रचल् ;

याबद् याफ्त् याफ्तन्

—

संस्कृतशब्दानुक्रमणी

—

पारसीकशब्दानुक्रमणी
